श्री महागणपतिसपर्या पद्धतिः



ANANTANANDA PRAKASHAN

SRI MAHAGANAPATHI

SAPARYA PADDHATI

Compiled By :

Srividya Marthanda ; Srividya Vachaspathi

Sri C. V. SWAMI SASTRI

Published By :

Dr. P. V. B. MAHADEV, M.Com., M.H.M.,

Ananthananda Prakasan

No. 21, Papathi Ammal Street,

Kodambakkam, Madras - 24.

1993 **Second Edition**

First Edition 1961 1000 Copies
Second Edition 1993 1000 Copies

Price : Rs. 60/-

For Copies :

1) ANANTHANANDA PRAKASAN,
No. 21, Papathi Ammal Street,
Kodambakkam, Madras-24.
Phone : 427824.

2) P. SAMBA MOORTHY, B. Arch
Modulor
6-3-1086/1/1, Raj Bhavan Road,
Somajiguda, Hyderabad-4.
Phone : 211046.

3) ARUNA PUBLISHING HOUSE,
Loan Sqair
Broadway
G. T. Madras-1.

Artists : **Anand & Ankayya**

Printed at : Stree Seva Mandir Press, Saligramam, Madras-93.

Tirumala Tirupati Devastanams

THIS BOOK IS PUBLISHED WITH THE
FINANCIAL ASSISTANCE OF

Tirumala Tirupati Devastanams
Under their Scheme

'AID TO PUBLISH RELIGIOUS BOOKS"

A HUMBLE OFFERING

AT THE FEET OF

THE FOUNDER PRESIDENT

Sri N. SUBRAMANYA IYER

Chidananda Nadha

OF

THE GUHANANDA MANDALI

MADRAS.


श्री अनन्तानन्द प्रकाशन ग्रन्थावलि नं ५

श्रीमहागणपति सपर्यापद्धतिः

श्रीविद्यामार्तण्ड, श्रीविद्यावाचस्पति
श्री स्वामिशास्त्रिणा
सङ्कलिता

प्रकाशक :
अनन्तानन्द प्रकाशन्
२१, पापात्ति अम्माल स्ट्रीट
कोडम्बाकम्
मद्रास–२४.
१९९३

GURUTRAYAM-गुरुत्रयम्



श्रीचिदानन्दनाथः Sri Chidanandanatha

श्रीगुहानन्दनाथः Sri Guhanandanatha

श्रीअनन्तानन्दनाथ Sri Anantanandanatha

॥ ओं ॥

॥ नमो भगवत्यै सच्चिदानन्दरूपिण्यै ॥

विषयानुक्रमणिका

Sri Mahaganapati Saparya Paddhati

CONTENTS

श्री काञ्चीकामकोटि पीठाधिपैः जगद्गुरुभिः

अनुगृहीता श्रीमुखपत्रिका

श्रीमत्परमहंस परिव्राजकाचार्यवर्य जगद्गुरु
श्रीमच्छंकर भगवत्पादाचार्य प्रतिष्ठित श्रीकाञ्ची
कामकोटिपीठाधिप श्रीपादैः अस्मदत्यन्त
प्रियशिष्याय श्री स्वामिशास्त्रिणे सर्वाभीष्ट
सिद्धये क्रियते नारायणस्मृतिः

भवत्प्रणीतं "श्रीमहागणपतिसपर्यापद्धतिः" नामकं पुस्तकं
प्राप्तं अवलोकितं च।

सर्वासां किल देवतानां पूजारंभे निर्विघ्नपरिसमाप्तये श्रीमहागणपतेः पूजा क्रियते ततः तत्तद्देवताः पूजयित्वा तत्तद्देवतानां प्रसादेन अभीष्टसिद्धिर्भवतीति सुप्रसिद्धोऽयं क्रमः। परं सर्वेषामपि देवगणानां पतिः महांश्चायं सर्वेषाम् अमुत्रामफलानां दाता सुमुखः पद्धतिमनुसृत्य भक्त्या पूजितः सर्वानभीष्टान् साधयेदिति तद्धेतुन्यायेन सपरिवारः पूज्यएवेति निस्संशयमभ्युपगतः पण्डितलोकैः।

तादृशमहत्पूजाकार्ये जिज्ञासूनां मार्गदर्शी सुग्रन्थोऽयं आसेतुहिमाचलं अविरलप्रचारमनुभूय सर्वजनानन्दकरः श्रीचन्द्रमौलीश्वरस्य कृपया वर्द्धतामित्याशास्महे "

विजयमंगलाभ्यासस्थानं तीर्थं
शार्वरि पुष्य शुक्लाष्टमी

नारायणस्मृतिः

श्री काञ्चीकामकोटि पीठाधिपैः जगद्गुरुभिः

अनुगृहीता श्रीमुखपत्रिका

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य जगद्गुरु
श्रीमच्छंकर भगवत्पादाचार्यप्रतिष्ठित श्रीकाञ्ची
कामकोटिपीठाधिपश्रीपादैः अस्मदत्यन्त
प्रियशिष्याय श्रीस्वामिशास्त्रिणे सर्वाभीष्ट
सिद्धये क्रियते नारायणस्मृतिः

भवत्प्रणीतं "श्रीमहगणपतिसपर्या पद्धतिः" नामकं पुस्तकं प्राप्तं अवालोकितं च ।

सर्वासां किल देवतानां पूजारंभे निर्विघ्नपरिसमाप्तये श्री महागणपतेः पूजा क्रियते ततः तत्तद्देवताः पूजयित्वा तत्तद्देवतानां प्रसादेन अभीष्टसिद्धिर्भवतीति सुप्रसिद्धोयं क्रमः। परं सर्वेषामपि देवगणानां पतिः महांश्चायं सर्वेषाम प्युत्तमफलानां दाता सुमुखः पद्धतिमनुसृत्य भक्त्या पूजितः सर्वानभीष्टान् साधयेदिति तद्धेतुन्याये सपरिवारः पूज्यएवेति निस्संशयमभ्युपगतः पण्डितलोकैः ।।

तादृशमहत्पूजाकार्ये जिज्ञासूनां मार्गदर्शी सुग्रन्थोयं आसेतु-हिमाचलं अविरलप्रचारमनु भूय सर्वजनानन्दकरः श्रीचन्द्रमौलीश्वरस्य कृपया वर्द्धतामित्याशास्महे ।।

विजयंयात्रस्तानंतोट्टयं
शार्वरिपुष्यशुक्लाष्टमि

नारायणस्मृतिः

PRAKASAN

SRI GURUBHYO NAMAHA

Mantra sastra has a long History. Words chanted in concert haunt and hypnotise, and so are phrases and rhythms in the Vedas. These words teach the magical effect of throwing pregnant vigour into a concentrated word or phrase. Repetition influences the sub-concious and induces lasting changes in the psychic equilibrium. Mantras have liquidity of meaning and fluidity of suggestion, marvellous in the case of mono-syllables (bijaksharas). Their significance varies at each stage of spiritual progress.

Playing with power is like playing with fire. The Guru studies impulses and habits of the deciple, prepares his spirit for the seed-mantra and guides and studies his progress at every step. Hence the dependence on a *Guru* and its liability to abuse. Vidyas are sealed books to the rank and file, and experts who know have beaten their muffled drums in notes monopolist and monotonous. The responsibility of Guru is hedged in with safeguards. The traditional teaching (Sampradayas) checks the aberrations due to individual idio-syncracy. So stress is laid not on what the Guru teaches but what he is and how he does.

The ideal Guru like Dakshinamoorthy teaches by silence more significant than speech, as the mystery of Reality eludes all the machinery of speech and symbols. Lastly the desciple is taken over to the conception that the highest Guru is in himself, the *Gurupitha* being in his cerebrum, where Godhood reveals Itself in the manner suiting his preparedness and his aspirations. The mystic who had surrendered everything to the cosmic *mother* now witnessess Beauty all around him. The soul is lifted above words and wonders, which are seen as facets of Reality.

Upasana consists in the constant practice of identifying himself with Brahman. Saparya is the pooja or worship. The poojas are of Three kinds. 1. Para (highest) 2. Apara (ordinary) 3. Parapara (intermediate).

The supreme forms of worship where there is no trace of duality (Dwitha Bhavana) of any kind where every thought, word, or deed is worship. The attitude of the worshipper towards the daily routine of life concentrating every thought, word and deed as an offering in one unceasing worship is *Parapooja*. The *Apara* Pooja is the purely external worship of an image or chakra and consists in bringing together the several articles needed for worship and offering them in prescribed manner with appropriate chanting of mantras. It is primarily meant for the beginners and qualifies for maturity. Pooja is Yagna or Sacrifice. It is Saparya or worship. It is Upasana or continued meditation. It aims at the realisation of identity of the individual self with Brahman.

Saparya consists of three parts.

1. The formula or the Mantra.
2. The Image or the Chakra.
3. A *ritual or the Pooja proper.*

Just as the meaning of the sentence can't be understood without knowing the meanings of the words comprising it. So also the meaning of the whole Upasana (Angi) cannot be learnt without understanding the meaning of its constituent parts (Angas).

The hidden Philosophical import of each of the parts is termed into 1. Mantra sanketa, 2. Chakra sanketa and 3. Pooja sanketa.

Thus the Upasana of Mahaganapathi has been laid down in this valuable book by the benevelent revered author Sri C.V. Swami Sastriji (Anantananda Natha) at first. He has prepared the manuscript for himself during 1950's and he was performing the pooja, Chaturavrithi Tarpana and Ganapathi Homam constantly for the benefit of the Ganesh devotees. During 1961 for the benefit of the devotees at large this book has been published by the grace of the author as "Sri Maha Ganapathi Saparya Paddhati"

The first edition has exhausted long back. The reprinting of this book has been felt necessary due to the constant request by the Ganesh Devotees.

In this task, the T.T.D. has readily extended their financial aid and enabled the Publication of the Second edition of "Sri Maha Ganapathi Saparya Paddathi". I thank the Executive Officer of T.T.D. and the other officers in their administration. Our thanks are extended to Sri K. Subba Rao, the Editor T.T.D. We owe our gratitude to Sri M. Ramakrishna Sastri the controller of T.T.D. publications by guiding us in all aspects of this publication.

This book has been brought out as the first Publication under the auspicious of ANANTHANANDA PRAKASAN which has been established on the 93rd Jayanthi of Sri C. V. Swami Sastri (ANANTHANANDA NATHA) during March 1992.

We give our humble thanks to Sri C. V. Venkateswaran the only son of Sri C. V. Swami Sastri for giving the necessary permission and providing all important material for this publication. We also thank Sri Arul Sakthi Nagarajan for having provided material connected with Ganapathi Homam.

We thank the *donars* and *patrons* who have libarally extended their financial help and moral support for our Ananthananda Prakasan in bringing out this publication. This gesture has inculcated immense confidence in us in pursuit of publishing some more valuable literature in the field of spiritual and religious magnitude of eminent authors.

We are grateful to Sri Krishnamoorthy Sastrigal of Tanjore Saraswathi Mahal for having given valuable suggestions in this publication.

We wish allround prosperity to Smt. Yrra Subbalakshmi and Sri Goteti Sreenivasa Rao who have given their time in the process of printing this script. We thank the Stree Seva Mandir management and staff and our special thanks to Sri Kannan, Manager and Sri Mohan of Stree Seva Mandir Press, Saligramam, Madras in printing this book with total devotion.

Sri B. Venugopal Reddy, Managing Director, Prasad Process (P) Ltd., Madras, has provided us with an attractive cover design and the Mahaganapathi Picture in pleasant colours. We pray Mahaganapathi to shower His grace on him and his family members.

We pray Lord Ganesha for allround prosperity of Sri Y. S. R. Moorthy, Sri Yaswant Rao Mudaliar, Sri Sistla Murali, Sri R.G.R. and Sri S.R.K. of Prasad Process for their wholehearted co-operation and help in bringing up this book.

Sri Guru Padadhuli

Dr. P. V. B. MAHADEV

Ananthananda Prakasan

Madras

॥ श्रीः ॥

॥ गं गणपतये नमः ॥

FOREWORD

In the Preface to the *Ucchishta Ganapati Sahasranama* which I edited sometime back for my friend, Dr. A. Srinivasan, I drew attention to the literature devoted to Ganapati-worship and its different aspects. But literature, in print or manuscript, is only the first step; *Mantra* is just the formula and it requires the *Tantra* or the technology of application or utilisation. There is yet the further help needed, the most essential in such matters, namely, the personal expert who can initiate, show the *modus operandi*, and be, for one on the path, a constant source of confidence and inspiration; this is the GURU, the Teacher; without this igniting spark, which makes Knowledge or Spiritual Experience an undying Light, with one lamp lit by another, प्रवर्तितो दीप इव प्रदीपात्, all writings remain a faggot, अनग्नाविव शुष्केधः। Luckily the line of practical *upasaskas* has not yet become extinct, and among those amidst us now, who can, so to say, 'deliver the goods' so far as Ganapati-worship is concerned, is Brahmasri Swami Sastrigal who has given us this publication.

The *Mahaganapati Saparya Paddhati* offered in this volume would serve as a *vade mecum* for votaries of Ganapati, as it brings together all the material necessary for the different aspects of the worship, the *mantras*, the *dhyanas*, the *japas*, with the details of *nyasas*, *mudras* etc., the ritual of *shadanga-puja*, the *chakras* of the different *avaranas*, the *homa*, the prayers, *stotras*, and lastly the philosophical and esoteric sacred texts, *Suktas* and *Upanishads*. In the end, there is also a *Ganapati Sahasranama*

given in *namavali* - form. Special mention may be made of the *Vallabhesa Upanishad* which explains the symbolism of the form of Ganapati accompanied by the *Sakti.*

The compiler, Sri Swami Sastrigal, I can ısay from personal knowlege, is one who has received in himself the blessings of Lord Ganesa, and is always ready to help ardent devotees to partake of them. I am sure that not only through this publication of his, but by direct contact with him also the circle of Ganapati-bhaktas desiring this participation will expand.

Makara Sankramana,
14th January, 1961.

V. RAGHAVAN
University of Madras

INTRODUCTION

This book is a compilation based on as extensive study of several *Kalpas* that have been in vogue, for Ganapati worship. The compiler brings to the task a wide knowledge and long experience in the field of *Mantra Sastra* and *Puja Kalpas* in general.

God Ganapati figures prominently in all Hindu worship. In fact, it is with an invocation or initial *puja* to this deity that any *puja*, project or programme of worship is ever started by a Hindu. Ganapati worship, it is believed obviates all obstacles and ensures success to every scheme.

Reference about Ganapati can be quoted even from the Vedas and Brahmanas. There is a separate Upanishad called *Ganapathi Upanishad,* devoted to this deity. The Puranas too mention Ganapathi here and there ; and the *Vinayaka Purana* is fully about this elephant-faced God. It is an accepted legend that Ganapati acted as the scribe for Vedavyasa's *Mahabharata.* A research would show that a prominent place is given to Ganapati in most Tantras, Agamas and Stotra literature of our country.

But the highest aspect of Ganapati worship is be had in the *Mahaganapati* of the Upanishads and the Tantras. Here, He is not considered a subordinate deity, occupying a minor place, but is accepted as the *Para-Brahman* of the Vedanta, the all-pervasive, all-knowing and all-blissful and as indicated by the *Pranava.* His consort, Sakti, is depicted as being in no way different from Himself *(Brahmabhinna)* and she never parts from his company. She has on her hand the *lilakamalam,* suggesting to the devotee that the world is a sport (*lokavattu lilakaivalyam*). The Ayudhas that Maha Ganapati carries on his ten hands have great significance and the *ratna kalasa* he bears is ever ready to shower blessings on the upasaka.

It is neither necessary nor worthwhile to attempt to find out a plausible reason for Ganapati having been endowed an elephant's head. Mystics may find some meaning, the Puranas can give some incidents and others may expound apparently esoteric significance. These may satisfy some temperaments but they cannot gain universal acceptance. Many instances of such combinations of human bodies and heads of animals can be had in the *Vedas* and in the *Puranas*. To cite only a few, *Varahavatara, Narsimha, Hayagriva* and *Adisesha* may be mentioned. There are also combinations like that of *Vyaghrapada* where the limbs are those of animals and the heads are human. Whatever may be the real reason for this strange variety, such forms have in deed stood the test of time and sustained through the ages, the faith of the upasakas by conferring the desired objects. It is perhaps wiser, therefore, to take a pragmatic view of the matter. It is enough if we believe earnestly - for, nothing can be had without the belief that the *Paramatma* takes those forms and that the early seers conceived of those forms. That form too may disappear when *Atmasakshtakara* arises and one loses one's identity in the *Akhanda-Brahman*.

But an upasaka for whom such a vision of the Universal unit has not dawned in spite of constant study of the *sostras*, should get into the practice of *upasana*. It should include *japa*, *puja* and *parayana*. All these must be centred on the *Ishta-Devata*. For such upasakas are meant all the do's and dont's of daily procedure and practice. A conscientious adherence to this routine takes one to the cherished goal.

Such an upasaka has two routes open to him. One is the ordinary *Shodasopachara-puja*, made elaborate if necessary with additions of the Suktas and Archanas. The other is the *saparya* that is based on tantric texts in conformity with the *Vaidika Marga*. It is again purposeless to decide which is the better route for each individual. Some people are made for one path and some others for the other. Heredity, personal aptitude or

inclination and *Purvajanma-vasana* decide the choice. Yet some upasakas look askance at others, forgetting that all roads lead to the goal, that it is the sincere faith and constant devotion that succeed and that the paths are only incidental.

The *saparya paddhati* published now supplies the scheme for the second type of worship mentioned obove. It may be considered in a way a sister volume to *Sri Vidya Saparya paddhati* of the Guhananda Mandali, as the methods adopted are almost the same. Every section of the present book has a counterpart in that Mandali publication, the only difference being perhaps the change necessitated by the difference in the deities worshipped. In the *Nyasakanda* particularly much pain has been taken to include the necessary details, such items which form special features for *Sri Devi* Worship—for example, the *64 upacharas*—have been left out, and whatever is special to Ganapati has been included.

The book also contains two *Stotras* composed by Sri Swami Sastri pertaining to *Ganapati Upasana* and *nitya homa*, a short sketch of *Diksh-karama*, the *Vallabhesa Upanishad* that, supplies the philosophic background of *Ganapati Upasana*, the *Sahasranama* and the *Kavacha* and a garland of verses which are really appealing and suggestive.

As one of the prominent *sishyas* of N. Subrahmanya Iyer (Sri Chidananda Natha,) the President-Founder of the Guhananda Mandali, Sri Swami Sastri, the compiler, has played a prominent part in all ritualistic compilations and performances of the Mandal. Under his Guru's guidance, the present compiler has performed *Kumbhabhishekams*, *Yantra-pratishthas* and *Dikshapurvangas*. The procedure in the performance of the *Chandi Homa* as fallowed by the Mandali may be said to have been given the present shape by the compiler. It was this compiler again that collaborated with the President in bringing out the *Ajapa-kalpa*. In addition, the compiler has the gift of

verse and the stotras that he has so far composed are quite a number. His *Srividya Gadya* and *Subrahmanya Gadya* deserve to be memorised by every upasaka. The compiler has all the background and qualifications required for bringing out a book of this kind and it is hoped that the book will be welcome to all upasakas.

It is a matter of satisfaction that the good work started by the President-Founder of the Mandali is being carried on by his sishyas, and that the Message of the Master is speading. Sri Swami Sastri's share in this service of propagation is no small one. His scholarship in *Mantra Sastra* has won deserved praise not only in South India but in the North also. His articles in the *"Chandi"* are unique in their approach and have had many a critic's praise.

Two more works in Tamil from this author's pen are awaiting publication, the *Chidananda Vilasa* and the *Sri Vidya Saparya Vasana.* Both are being written out in Sanskrit. It is trusted the sufficient encouragement will be forthcoming to accelerate the release of these books also.

Om Tat Sat

Madras-17,
21-12-1960.

A. Nataraja Aiyar

प्रशस्तिः

धर्मार्थकाममोक्षाख्यसकलपुरुषार्थानां वैदिकधर्मसाध्यत्वं सकलास्तिकाभ्युपेतम् । वैदिकधर्मश्च कर्मोपासनाज्ञानात्मकः । कर्मोपासनयोः ज्ञानसाधनानां चारम्भे सम्भावितसकलविघ्ननिवृत्तये श्रीमहागणपतिः पूजनीय इति धर्मशास्त्रात् सदाचाराच्चावगम्यते । स चेत् महागणपतिः स्वयमेव निखिलपुरुषार्थप्रदाने चतुरः किमित्यन्योपासनेन वृथा मनः खिद्यते इति 'तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन' इति न्यायविदामुद्गारः । श्रीमहागणपतिः न केवलं अभ्युदयस्य, अपि तु तत्त्वज्ञानोपदेशेन निःश्रेयसस्यापि प्रदाने चतुर इति गणेशगीताविदां स्पष्बतरन् । सोऽयं महागणपतिः कथं पूजनीयः? कथं होमः? कानि द्रव्याणि? का आवरणदेवताः? इत्यादि विषयान् ज्ञातुमिच्छतां भोगमोक्षलिप्सूनां आस्तिकमहाजनानामुपकाराय अस्मत्प्रियस्निग्धैः मन्त्रशास्त्रार्थतत्त्वज्ञैः श्रीकामकोटिपीठाधिपानामपि मान्यतमै श्रीपुरीमठाधिपानुग्रहीत 'श्रीविद्यामार्तण्ड' बिरुदभूषितैः श्रीस्वामिशास्त्रिभिः कल्पसूत्रादिबहुग्रन्थेभ्यः संकलितोऽयं महागणपति–सपर्यापद्धत्याख्यो ग्रन्थः तद्गुरुभिरनुगृहीत-श्रीविद्यासपर्यापद्धतिवत् आस्तिकलोकापेक्षितं महान्तमर्थं पूरयति ।

अत्र ग्रन्थे मूलशक्तिगणेशस्नपनाध्यायः, गणेशदुर्गकवचं, वल्लभेशोपनिषत्, आवरणदेवताध्यानं इत्यादयः विषयाः अनेकग्रन्थेभ्यः इदंप्रथमतया उद्धृत्य प्रकशिता विलसन्ति । अत्र मूलमन्त्राक्षरबीजाक्षरन्यासध्यानप्रकाराः सपरिकरं सप्रमाणं निरूपिताः । देव्या नवावरणपूजावत् श्रीमहागणपतेः आवरणपूजाप्रकारः नित्यहोमविधिः काम्यहोमकल्पाश्च तत्र तत्रोपयुक्तद्रव्यविशेषाश्च विशेषतः उपवर्णिता ।

किञ्च श्रीशास्त्रिपादैः अम्बाया अनुग्रहविशेषेण विरचिते मधुरतरे श्रीगणेशमूलमन्त्रपदमालस्तुतिः श्रीवक्रतुण्डषडक्षरीस्तुतिश्च विदुषां हृदयहारिण्यौ अत्र संयोजिते । एतद्ग्रन्थमुद्रापयितॄणां श्रीशास्त्रिपादानां सर्वेऽप्यास्तिकाः अधमर्णा इति निःसंशयं वक्तुं पार्यते ।

तमिमं ग्रन्थं आस्तिकाः गृहीत्वा गुरूपदेशपूर्वकं तदुक्त सपर्यामनुष्ठाय निखिलपुरुषार्थान् लभन्तामिति विज्ञापयति-

एस्. सुब्रह्मण्यशास्त्री, एम्. ए.,
पण्डितप्रवरः, पण्डितराजः,
चेन्नपुरी

॥ ओं ॥

॥ नमो भगवत्यै सच्चिदानन्दरूपिण्यै ॥

भूमिका

सर्वासु देवतासु सर्वकर्मस्वपि प्रथमतः महागणपतिरेव पूज्यते। अत्र कोऽपि न विवादः। महागणपतिप्रभावः गणेशपुराणादिषु वर्णितः। विशेषतः वल्लभेशोपनिषदि तत्स्वरूपं, आयुधादिस्वरूपं तत्प्रभावः, तस्य यन्त्रं, तत्पूजादिकमपि विस्तरेण प्रतिपादितम्। तन्मन्त्रं गुरुमुखाद् ज्ञात्वा तत्पूजादिकमनुष्ठितं चेत् इहलोकसुखं पारलौकिकसुखं च निश्चयेन भवेदेव। अयं विषयः शास्त्रसम्मतः साधूनां सम्मतश्च। तद्विधिजिज्ञासूनां उपकाराय अयमुद्यमः।

उपास्तौ - उपास्यदेवतायाः यथार्थज्ञानं अत्यावश्यकमेव। ज्ञानादेव मोक्षः। तस्मात् प्रथमतः महागणपतेः आयुधादितत्त्वं तस्यातिप्रियाष्टद्रव्यतत्त्वं च विमृश्यते।

अविद्यावासनाबीजपूर्णमायारूपबीजापूरफलं, अविद्याकार्यमस्तक-भेदिविद्यारूपगदा, मनोरूपेक्षुकार्मुकं, त्रिपुटीरूपत्रिशूलं, संसार रूप चक्रं, अज्ञाननिद्रोद्बोधकरनाद करशङ्खं, रागरूपपाशं, शुद्धज्ञान-विकासितहृदयरूपोत्पलं, जीवमोदकरव्रीह्यग्रं, खण्डज्ञानरूपभिन्नदन्तं, ज्ञानविज्ञानरत्नपूरितामृतरत्नकलशं: च दशभिः करैः शुण्डादण्डेन च धारयन्तं, मायाकारनरशरीरं कण्ठाधस्तात्, पुरुषाकारगजवदनं कण्ठोपरि, प्रपञ्चत्रयसाक्षिभूतत्रिनेत्रं, ब्रह्मशक्तिरूपसिद्धलक्ष्म्याश्लिष्टं-प्रपञ्चोत्पत्तिरक्षाविनाशककरं, पुर्यष्टकाकारं, नामरूपकवचाच्छादित सच्चिदानन्दपूर्णमोदक - संसारबाधावारिसन्तप्तानेककष्टमुसलाहत-मनोवृत्तिरूपपृथुक - तपोविशुद्धसत्त्वगुणरूपलाज दृढमानसचूर्णी कृतेन्द्रियाहृतविषयरूपसक्तु - विविधमनोरूपेक्षुपर्व - जीवन्मुक्तस्थिति-रूपनालिकेर - जीवरूपतिल - पक्वमनोरूपफलाख्याष्टद्रव्य - होमप्रियं, कालरूपविघ्नहरं, अष्टाविंशतिवर्णरूपमन्त्रलक्ष्यं, पञ्चकोशमयपञ्चा-वरणं महागणपतिं स्वाभेदेन ये भजन्ते तेषां मोक्षः करस्थ एव। तत्त्वजिज्ञासूनामुपकाराय मया संकलितोऽयं विषयः।

शास्त्राणि नाधीतानि मया । केवलं श्रीगुरुकृपैव । अयं ग्रन्थः निर्मलहृदयानां साधूनां तोषदश्चेत् मदुद्यमः सफल एव ।

भगवंता परशुरामेण निर्मितकल्पसूत्रमनुसृत्यैव आवरणपूजा लिखिता । विशेषन्यासध्यानादिकं सारसंग्रह-श्रीविद्यार्णवादिग्रन्थानवलोक्य संकलितम् । गच्छतां स्खलनं स्वभावः । स्खलनं यदि दृष्टं तत् साधवः शोधयन्तु । मदज्ञतां क्षाम्यन्तु ।

अस्य ग्रन्थस्य श्रीमुखपत्रदानरूपतः अनुग्रहं कृतवतीं मदन्तःस्थां सच्चिदानन्दबोधप्रदां, जयप्रदां, श्रीकामकोटिपीठस्थितां, चन्द्रचूडां, करुणापूर्णलोचनां, दयार्द्रहृदयां, सद्गुरुरूपिणीं दर्शनादेव अनन्तानन्ददां कामाक्षीं त्रिकरणैस्सदा नमस्ये ।

अप्रकाशितगणेशदुर्गकवचमूलगणेशस्नपनाध्यायादिग्रन्थान् दत्वा अनुग्रहं कृतवतां श्रीपुरीमठस्थितानां श्रीशङ्करभगत्पादानां चरणौ बहुशः प्रणमामि ।

अस्य ग्रन्थस्थ आमुखादिदानेन मां अनुगृहीतवतां कविकोकिलादिबिरुदभाजां डाक्टर् वे. राघवशर्मणां, श्रीगुहानन्दमण्डलीकार्यदर्शिनां ए. नटराजशर्मणां, पण्डितराज एस्. सुब्रह्मण्यशास्त्रिणां च तत्तदभीष्टं पुरयितुं मदन्तःस्थां परदेवतां प्रार्थये ।

इतः पूर्वं संस्कृतलिपिलेखने असमर्थस्य मम एतद्ग्रन्थलेखनादिना साहाय्यं कृतवतां आर्. वि. दवे महाशयानां अनुग्रहं करोतु महागणपतिः ।

अस्य ग्रन्थस्य प्रकाशनार्थं कृतवतां सर्वेषामपि द्रव्यसहाय्यां महागणपतिप्रसादेन सर्वाभीष्टसिद्धिर्भूयात् ।

एतद्ग्रन्थप्रकाशनविषये मूलकारणभूतस्य महालिङ्गशर्मणः, त्रिकरणैश्चापि उद्युक्तयोः भानुप्रसाद-महादेवशर्मणोश्च क्षेमार्थं मदन्तःस्थां परदेवतां सदा प्रार्थये ।

मद्रपुरी
शार्वरी-माघशुक्ल-नवमी
26–1–1961

श्रीगुरुपादधूळिः
स्वामिशास्त्री



बीजापूरगदेक्षु कार्मुकरुजा चक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः ।
ध्येयो वल्लभया सपद्मकरयाश्लिष्टोज्ज्वलद्भूषया

॥ श्रीगुरुभ्यो नमः ॥

॥ ओं नमो भगवत्यै सच्चिदानन्दरूपिण्यै ।

॥ श्रीमहागणपतये नमः ॥

॥ अथ श्रीमहागणपतिसपर्या पद्धतिः ॥

चिदानंदमयीं नौमि वामोरुन्यस्तवल्लभां
मूर्तिं श्रीविघ्नराजस्य दशहस्तां शुभाप्तये।
रमारमापतिमुखैः ऋद्ध्यामोदादिभिस्तथा
षडङ्गैः मातृभिः दिक्पैः आवृतं सुमुखं भजे ॥

श्रीमान् साधकः ब्राह्मे मुहुर्ते उत्थाय श्रीगुरुपादुकास्मरणपूर्वकं हृदयकमले उद्यदरुणकिरणपाटलस्य देवस्य करटिवदनस्य ध्यानेन परिप्लुष्टनिःशेषदोषत्वं आत्मनः तत्प्रभारुणतनुत्वंञ्च भावयित्वा शय्यां त्यक्त्वा श्रीविद्यासपर्याक्रमोक्त शौचदन्तधावनादि कृत्वा स्नात्वा धौते वाससी परिधाय सन्ध्यावन्दनादि कृत्वा ओं गं आत्मतत्त्वाय स्वाहा । ओं गं विद्यातत्त्वाय स्वाहा । ओं गं शिवतत्त्वाय स्वाहा । ओं गं सर्वतत्त्वाय स्वाहा । इति तत्त्वाचमनं कृत्वा मूलेन प्राणनायम्य "ओं तत्पुरुषाय विद्महे वक्रतुंडाय धीमही तन्नो दन्तिः प्रचोदयात्" इति गणपतिगायत्र्या ओं सूर्यमण्डलस्थाय महागणपतये एषोऽर्घ्यः स्वाहा, इति त्रिः अर्घ्यं दत्वा, ऋष्यादि षडङ्गन्यास पूर्वकं अष्टोत्तरशतवारं वा अष्टाविंशतिवारं वा मूलमन्त्रं जप्त्वा, अनेन कर्मणा भगवान् श्रीमहागणपतिः प्रीयतां । इति सन्ध्यां गणपतये निवेदयेत् ॥

॥ अथ चतुरावृत्तितर्पणम् ॥

आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य मम श्रीमहागणपति प्रसादसिद्धये सर्वविघ्ननिवारणार्थं चतुरावृत्तितर्पणं करिष्य इति संङ्कल्प्य नद्यादौ हस्तमात्रं चतुरश्रमण्डलं परिगृह्य –

ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे।
तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥

इति मन्त्रेण सूर्यमभ्यर्थ्य—

आवाहयामि त्वां देवि तर्पणायेहसुन्दरि।
एहि गङ्गे नमस्तुभ्यं सर्वतीर्थसमन्विते ॥

इति गङ्गां प्रार्थ्य ह्वां ह्वीं ह्वूं ह्वैं ह्वौं ह्वः इत्युच्चार्य क्रों इत्यङ्कुशमुद्रया गङ्गाऽऽदितीर्थान्यावाह्य वं इत्यमृतबीजेन सप्तवारमभिमन्त्र्य तत्र चतुरश्राष्टदलषट्कोणत्रिकोणात्मकं महागणपतियन्त्रं विचिन्त्य स्वदेहे ऋष्यादिन्यासान् न्यस्य यन्त्रे सावरणं देवमावाह्य – ततः

अस्य श्रीमहागणपति महामन्त्रस्य गणक ऋषिः निचृद्गायत्री-छन्दः महागणपतिर्देवता महागणपतितर्पणे विनियोगः।

अथ न्यासः–

श्रीं ह्रीं क्लीं ओं गां अङ्गुष्ठाभ्यां –– हृदयाय नमः।
३ श्रीं गीं तर्जनीभ्यां — शिरसे स्वाहा।
३ ह्रीं गूं मध्यमाभ्यां — शिखायै वषट्।
३ क्लीं गैं अनामिकाभ्यां — कवचाय हुं।
३ ग्लौं गौं कनिष्ठिकाभ्यां — नेत्रत्रयाय वौषट्।
३ गं गः करतलकरपृष्ठाभ्यां — अस्त्राय फट्।

अथ ध्यानम्ः—

ध्याये हृदब्जे शोणाङ्गं वामोत्सङ्गविभूषया ।
सिद्धलक्ष्म्या समाश्लिष्टपार्श्वमर्धेन्दुशेखरम् ॥
वामाघः करतो दक्षाधःकरान्तेषु पुष्करे ।
परिष्कृतं मातुलुङ्ग गदा पुण्ड्रेक्षुकार्मुकैः ॥
शूलेन शङ्खचक्राभ्यां पाशोत्पलयुगेन च ।
शालिमञ्जरिकास्वीयदन्ताञ्जलमणीघटैः ॥
स्रवन्मदं च सानन्दं श्रीश्रीपत्यादिसंवृतम् ।
अशेषविघ्नविध्वंसनिघ्नं विघ्नेश्वरं भजे ॥

इति ध्यात्वा तद्यन्त्रे मूर्तिं च गन्धपुष्पदूर्वाङ्कुरैः पञ्चोपचारैः अर्चयेत् ।
तद्यथा—

श्रीं ह्रीं क्लीं महागणपतये लं पृथिव्यात्मकं गन्धं कल्पयामि नमः (त्रिवारम्) ।

श्रीं ह्रीं क्लीं महागणपतये हं आकाशात्मकं पुष्पं कल्पयामि नमः (त्रिवारम्) ।

३ महागणपतये यं वाय्वात्मकं धूपं कल्पयामि नमः ,, ।
३ महागणपतये रं वह्न्यात्मकं दीपं कल्पयामि नमः ,, ।
३ महागणपतये वं अमृतात्मकं नैवेद्यं कल्पयामि नमः ,, ।

तदङ्गत्वन

३ महागणपतये सं सर्वात्मकं ताम्बूलं कल्पयामि नमः,, इति ॥

प्रथमं प्रत्यावृति मूलान्ते महागणपतिं तर्पयामीति द्वादशवारं तर्पयित्वा ततः स्वाहान्तेन मूलस्यैकैकेन वर्णेन चतुश्चतुर्वारं प्रति-

वर्णान्तमावृत्तेन मूलेन च प्राग्वत् चतुश्चतुर्वारं देवं त्रयोदशसु मिथुनेषु श्रीश्रीपत्यादिषु एकैकां देवतां द्वितीयान्तेन तत्तन्नाम्ना चतुश्चतुर्वारं प्रतिदेवतामावृतेन च मूलेन देवं चतुश्चतुर्वारं तर्पयेत् । यथा—

३ मूलं । महागणपतिं तर्पयामि । द्वादशवारम् ॥

३ ओं स्वाहा	।	महागणपतिं	त०	।	चतुर्वारम् ॥	३ मूलं	।	महाग०	त०	।	चतुर्वारम् ॥
३ श्रीं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ ह्रीं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ क्लीं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ ग्लौं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ गं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ गं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ णं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ पं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ तं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ यें स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ वं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ रं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ वं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ रं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ दं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ सं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥
३ र्वं स्वाहा	।	,,	,,	॥		,,		,,		,,	॥

३ जं स्वाहा । महागणपतिं त० । चतुर्वारम् ॥

३ मूलं । महाग० त० । चतुर्वारम्

३ नं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ में स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ वं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ शं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ मां स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ नं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ यं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ स्वां स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ हां स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ श्रियं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ श्रीपतिं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ गिरिजां स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ गिरिजापतिं स्वाहा । ,, ॥ ,, ,, ,, ॥

३ रतिं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ रतिपतिं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ महीं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ महीपतिं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ महालक्ष्मीं स्वाहा । ,, ॥ ,, ,, ,, ॥

३ महागणपतिं स्वाहा । ,, ॥ ,, ,, ,, ॥

३ ऋद्धिं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ आमोदं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ समृद्धिं स्वाहा । ,, ,, ॥ ,, ,, ,, ॥

३ प्रमोदं स्वाहा । महागणपतिं त० । चतुर्वारम् ॥
३ मूलं । महाग० त० । चतुर्वारम् ॥

३ कान्तिं स्वाहा ।	,,	,, ॥	,,	,,	,, ॥
३ सुमुखं स्वाहा ।	,,	,, ॥	,,	,,	,, ॥
३ मदनावतीं स्वाहा ।	,,	,, ॥	,,	,,	,, ॥
३ दुर्मुखं स्वाहा ।	,,	,, ॥	,,	,,	,, ॥
३ मदद्रवां स्वाहा ।	,,	,, ॥	,,	,,	,, ॥
३ अविघ्नं स्वाहा ।	,,	,, ॥	,,	,,	,, ॥
३ द्राविणीं स्वाहा ।	,,	,, ॥	,,	,,	,, ॥
३ विघ्नकर्तारं स्वाहा ।		,, ॥	,,	,,	,, ॥
३ वसुधारां स्वाहा ।	,,	,, ॥	,,	,,	,, ॥
३ शङ्खनिधिं स्वाहा ।		,, ॥	,,	,,	,, ॥
३ वसुमतीं स्वाहा ।	,,	,, ॥	,,	,,	,, ॥
३ पद्मनिधिं स्वाहा ।	,,	,, ॥	,,	,,	,, ॥

इत्याहत्य तर्पणसङ्ख्यापिण्डश्चतुश्चत्वारिंशदुत्तरचतूशती(४४४)भवति॥ तर्पणांते उत्तरन्यासान् विधाय पुनर्मूलेन देवं उक्तरीत्या पञ्चोपचारैः संपूजयेत् ॥

गुह्यातिगुह्यगोप्ता त्वं गृहाण कृततर्पणम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्मयि स्थिरा ॥
आयुरारोग्यमैश्वर्यं बलं पुष्टिर्महद्यशः ।
कवित्वं भुक्तिमुक्ती च चतुरावृत्तितर्पणात् ॥

अनेन कृत तर्पणेन भगवान् श्रीसिद्धलक्ष्मीसहितः श्री-महागणपतिः प्रीयताम् ॥

॥ इति चतुरावृत्ति तर्पण विधिः ॥

॥ यागमन्दिरागमनादिविन्घोत्सारणान्तम् ॥

आब्रह्मलोकादाशेषादालोकालोकपर्वतात् ।
ये वसन्ति द्विजा देवास्तेभ्यो नित्यं नमाम्यहम् ॥

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशर्षिभ्यो नमो गुरुभ्यः। सर्वोपप्लवरहितप्रज्ञानघनप्रत्यगर्थो ब्रह्मैवाहमस्मि सोहमस्मि, ब्रह्माहमस्मि ॥

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं वटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।
वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकम्
श्रीमन्मालिनिमन्त्रराजसहितं वन्दे गुरोर्मण्डलम् ॥
गुरुर्ब्रह्मा गुरुर्विष्णु र्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

यागमन्दिरप्रवेशः

ततो यागगृहमागत्य स्थण्डिलं गोमयेनोपलिप्य यागमन्दिरं च रङ्गवल्लीपुष्पमालिकावितानादिभिः अलङ्कृत्य च द्वारस्य दक्षवामभागयोः ऊर्ध्वभागे च क्रमेण–

3 1 श्रीं ह्रीं क्लीं भद्रकाल्यै नमः ॥ दक्ष शाखायाम् ॥

वाम 2 | | 1 दक्ष 2 ३ भैरवाय नमः ॥ वाम शाखायाम् ॥

3 ३ लम्बोदराय नमः ॥ ऊर्ध्व शाखायाम् ॥

इति द्वारदेवतास्संपूज्य

तत्वाचमनम्

ओं गं आत्मतत्त्वाय स्वाहा ॥

ओं गं विद्यातत्त्वाय स्वाहा ॥

ओं गं शिवतत्त्वाय स्वाहा ॥

ओं गं सर्वतत्त्वाय स्वाहा ॥ इत्याचम्य

श्रीगुरुपादुकामन्त्रः ।

श्रीं ह्रीं क्लीं ऐं क्लीं सौः ऐं ग्लौं हंसः शिवः सोहं स्वरूप-निरूपणहेतवे श्रीगुरवे नमः अमुकानन्दनाथश्रीपादुकां पूजयामि नमः ॥

श्रीं ह्रीं क्लीं ऐं क्लीं सौः ऐं ग्लौं सोहं हंसः शिवः स्वच्छ–प्रकाशविमर्शहेतवे श्रीपरमगुरवे नमः अमुकानन्दनाथ श्रीपादुकां पूजयामि नमः ॥

श्रीं ह्रीं क्लीं ऐं क्लीं सौः ऐं ग्लौं हंसः शिवः सोहं हंसः स्वात्मारामपञ्जरविलीनतेजसे श्रीपरमेष्ठिगुरवे नमः अमुकानन्द–नाथ श्रीपादुकां पूजयामि नमः ॥

इति मृगीमुद्रया गुरुपादुकामुच्चार्य सुमुख-सुवृत्त-चतुरश्र मुद्गर-योन्या-ख्याभिः पञ्चभिर्मुद्राभिः श्रीगुरून् वामभुजे प्रणम्य गणपतिमूलेन स्वदक्षभुजे योनिमुद्रया महागणपतिं प्रणमेत् ॥

॥ घण्टापूजा ॥

आगमार्थं च देवानां गमनार्थं च रक्षसाम् ।
कुर्याद् घंटारवं तत्र देवताह्वानलाञ्छनम् ॥

इति घण्टानादं कृत्वा ॥

॥ सङ्कल्पः ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

मूलेन प्राणानायम्य । देशकालौ संकीर्त्य-मम श्रीसिद्धलक्ष्मी सहित महागणपतिप्रीत्यर्थं यथासंभवद्रव्यैः यथाशक्ति सपर्याक्रमं निर्वर्तयिष्ये, तेन परमेश्वरं प्रीणयामि ॥

आत्मानं अलङ्कृत्य ताम्बूलेन सुरभिलवदनः सन् प्रमुदितचित्तः शिवोहं इति भावयेत् ॥

॥ आसनपूजा ॥

आसनमास्तीर्य दक्षिणहस्ते जलमादाय सौः इति द्वादशवारमभिमन्त्र्य तज्जलेन मूलमन्त्रेण आसनं प्रोक्षयेत् ॥

अस्य श्री आसनमहामन्त्रस्य-पृथिव्या मेरुपृष्ठऋषिः- सुतलं छन्दः-कूर्मो देवता-आसने विनियोगः-

पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

योगासनाय नमः। वीरासनाय नमः शरासनाय नमः ॥ श्रीं ह्रीं क्लीं आधारशक्तिकमलासनाय नमः इति पुष्पाक्षतैः आसनमभ्यर्च्य आसने उपविशेत् ॥

३ रक्तद्वादशशक्तियुक्ताय द्वीपनाथाय नमः ॥ इति भूमौ पुष्पाञ्जलिं विकिरेत् ॥

३ समस्तगुप्तप्रकटसिद्धयोगिनीचक्रश्रीपादुकाभ्यो नमः ॥ इति मूर्ध्नि बद्धाञ्जलिः ॥

३ ऐं ह्लः अस्त्राय फट्— इति अस्त्रमन्त्रेण मुहुरावृत्तेन अङ्गुष्ठादिकनिष्ठिकान्तं करतलयोः कूर्परयोः देहे च व्यापकं कुर्यात् ॥

॥ दीपपूजा ॥

स्वदक्षभागे गन्धपुष्पाक्षतादीन्निधाय दीपानभितः प्रज्वाल्य ॥

घृतदीपो दक्षिणे स्यात्तैलदीपस्तु वामतः ।
सितवर्तियुतो दक्षे रक्तवर्तिस्तु वामतः ॥

(दक्षवामभागौ देवस्यैव ।)

३ दीपदेवि महादेवि शुभं भवतु मे सदा ।
यावत्पूजासमाप्तिः स्यात्तावत्प्रज्वल सुस्थिरा ॥

इति पुष्पाञ्जलिं दद्यात् ॥

मूलेन यन्त्रमध्ये पुष्पाञ्जलिं विकीर्य मूलत्रिखण्डेन स्वाग्र-वामदक्षकोणेषु पुष्पाञ्जलीन् दद्यात् ॥

।। भूतशुद्ध्यादि विघ्नोत्सारणान्तम् ।।

।। भूतशुद्धिः ।।

श्वाससमीरं पिङ्गलया अन्तराकृष्य—

३ मूलश्रृङ्गाटकात् सुषुम्नापथेन जीवशिवं परमशिवपदे योजयामि स्वाहा। इति मन्त्रेण मूलाधारस्थितं जीवात्मानं सुषुम्नावर्त्मना ब्रह्मरन्ध्रं नीत्वा परमशिवेन एकीभूतं विभाव्य इडया वायुं रेचयेत् ।।

३ यं १६ (इडया पूरयित्वा) सङ्कोचशरीरं शोषय शोषय स्वाहा—इति निजशरीरं शोषितं विभाव्य पिङ्गलया रेचयेत् ।।

३ रं १६ (पिङ्गलया पूरयित्वा) सङ्कोचशरीरं दह दह पच पच स्वाहा—इति प्लुष्टं भस्मीकृतं च विभाव्य रेचयेत् ।।

३ वं १६ (इडया पूरयित्वा) परमशिवामृतं वर्षय वर्षय स्वाहा—इति तद्भस्मं सहस्रारेन्दुमण्डलविगलदमृतरसेन सिक्तं च विभाव्य पिङ्गलया रेचयेत् ।।

३ लं १६ (पिङ्गलया पूरयित्वा) शाम्भवशरीरमुत्पादयोत्पादय स्वाहा—इति तद्भस्मनो दिव्यशरीरमुत्पन्नं विभाव्य इडया रेचयेत् ।।

३ हंसः सोहं (इडया पूरयित्वा) अवतर अवतर शिवपदात् जीव सुषुम्नापथेन प्रविश मूलश्रृङ्गाटकं उल्लसोल्लस ज्वल ज्वल प्रज्वल प्रज्वल हंसः सोहं स्वाहा—इति परमशिवेनैकीकृतं जीवं पुनः सुषुम्नावर्त्मना मूलाधारे स्थापितं चिन्तयेत् ।।

॥ आत्मप्राणप्रतिष्ठा ॥

हृदि दक्षकरतलं निधाय-३ आं सोहं-इति त्रिः पठेत् ॥
अथ मूलेन षोडशधा दशधा त्रिधा वा प्रणानायम्य ॥

॥ विघ्नोत्सारणम् ॥

३ अपसर्पन्तु ते भूता ये भूता भुवि संस्थिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

इति मन्त्रमुच्चार्य युगपद्वामपार्ष्णिभूतलाघातत्रय - करास्फोटनत्रय-क्रूरदृष्ट्यवलोकनपूर्वक-तालत्रयेण भौमान्तरिक्षदिव्यान् भेदावभासकान् विघ्नानुत्सारयेत् ॥

अथ नमः इति अङ्गुष्ठमन्त्रमुच्चरन् अङ्कुशमुद्रया शिखां बध्नीयात् ॥

न्यासाः ॥

मातृकान्यासः

अस्य श्रीमातृकासरस्वतीन्यासमहामन्त्रस्य ब्रह्माऋषिः गायत्री-छन्दः । श्रीमातृकासरस्वती देवता । हल्भ्यो बीजेभ्यो नमः । स्वरेभ्यः शक्तिभ्यो नमः । बिन्दुभ्यः कीलकेभ्यो नमः । श्रीमहागणपतिपूजाङ्गत्वेन न्यासे विनियोगः ॥ सर्वमातृकया सर्वाङ्गे अञ्जलिना त्रिर्व्यापकं कुर्यात् ॥

श्रीं ह्रीं क्लीं ऐं क्लीं सौः अं कं खं गं घं ङं आं—अंगुष्ठाभ्यां—
हृदयाय नमः ॥

,, ,, इं चं छं जं झं ञं ईं—तर्जनीभ्यां—
शिरसे स्वाहा ॥

,, ,, उं टं ठं डं ढं णं ऊं—मध्यमाभ्यां—
शिखायै वषट् ॥

,, ,, एं तं थं दं धं नं ऐं—अनामिकाभ्यां—
कवचाय हुं ॥

,, ,, ओं पं फं बं भं मं औं—कनिष्ठिकाभ्यां—
नेत्रत्रयाय वौषट् ॥

,, ,, अं यं रं लं वं शं षं सं हं ळं क्षं अः—
करतलकरपृष्ठाभ्यां—अस्त्राय फट् ॥

भूर्भुवस्सुवरोम् इति दिग्बन्धः ॥

ध्यानं

पंचाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षो-
देशां भास्वत्कपर्दाकलितशशिकलामिन्दुकुन्दावदाताम् ।
अक्षस्रक्कुम्भचिन्तालिखितवरकरां त्रीक्षणामब्जसंस्था-
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥

लमित्यादि पंचपूजां कृत्वा ॥

बहिर्मातृका ।

मातृकाः त्रितारीबालापूर्विकाः नमः हंसः इत्यन्ताः स्वाङ्गेषु न्यसेत् ।

श्रीं ह्रीं क्लीं ऐं क्लीं सौः	अं	नमः	हंसः	शिरसि ।
६	आं	नमः	हंसः	मुखवृत्ते ।
६	इं	नमः	हंसः	दक्षनेत्रे ।
६	ईं	नमः	हंसः	वामनेत्रे ।
६	उं	नमः	हंसः	दक्षकर्णे ।
६	ऊं	नमः	हंसः	वामकर्णे ।
६	ऋं	नमः	हंसः	दक्षनासापुटे ।
६	ॠं	नमः	हंसः	वामनासापुटे ।
६	ऌं	नमः	हंसः	दक्षकपोले ।
६	ॡं	नमः	हंसः	वामकपोले ।
६	एं	नमः	हंसः	ऊर्ध्वोष्ठे ।
६	ऐं	नमः	हंसः	अधरोष्ठे ।
६	ओं	नमः	हंसः	उर्ध्वदन्तपङ्क्तौ ।
६	औं	नमः	हंसः	अधोदन्तपङ्क्तौ ।
६	अं	नमः	हंसः	जिह्वाग्रे ।
६	अः	नमः	हंसः	कण्ठे ।
६	कं	नमः	हंसः	दक्षबाहुमूले ।
६	खं	नमः	हंपः	दक्षकूर्परे ।
६	गं	नमः	हंसः	दक्षमणिबन्धे ।
६	घं	नमः	हंनः	दक्षकराङ्गुलिमूले ।
६	ङं	नमः	हंसः	दक्षकराङ्गुल्यग्रे ।

श्रीं ह्रीं क्लीं ऐं क्लीं सौः चं नमः हंसः वामबाहुमूले ।

६ छं नमः हंसः वामकूर्परे ।

६ जं नमः हंसः वाममणिबन्धे ।

६ झं नमः हंसः वामकराङ्गुलिमूले ।

६ ञं नमः हंसः वामकराङ्गुल्यग्रे ।

६ टं नमः हंसः दक्षोरुमूले ।

६ ठं नमः हंसः दक्षजानुनि ।

६ डं नमः हंसः दक्षगुल्फे ।

६ ढं नमः हंसः दक्षपादाङ्गुलिमूले ।

६ णं नमः हंसः दक्षपादाङ्गुल्यग्रे ।

६ तं नमः हंसः वामोरुमूले ।

६ थं नम. हंसः वामजानुनि ।

६ दं नमः हंसः वामगुल्फे ।

६ धं नमः हंसः वामपादाङ्गुलिमूले ।

६ नं नमः हंसः वामपादाङ्गुल्यग्रे ।

६ पं नमः हंसः दक्षपार्श्वे ।

६ फं नमः हंसः वामपार्श्वे ।

६ बं नमः हंसः पृष्ठे ।

६ भं नमः हंसः नाभौ ।

६ मं नमः हंसः जठरे ।

६ यं नमः हंसः हृदये ।

६ रं नमः हंसः दक्षकक्षे ।

६ लं नमः हंसः गलपृष्ठे ।

६ वं नमः हंसः वामकक्षे ।

श्रीं ह्रीं क्लीं ऐं क्लीं सौः शं नमः हंसः हृदयादिदक्षकराङ्गुल्यन्तम् ।
६ षं नमः हंसः हृदयादिवामकराङ्गुल्यन्तम् ।
६ सं नमः हंसः हृदयादिदक्षपादाङ्गुल्यन्तम् ।
६ हं नमः हंसः हृदयादिवामपादाङ्गुल्यन्तम् ।
६ ळं नमः हंसः कटयादिपादाङ्गुल्यन्तम् ।
६ क्षं नमः हंसः कटयादिब्रह्मरन्धान्तम् ।

अन्तर्मातृकान्यासः ।

६ अं नमः हंसः आं नमः हंसः +++ अः नमः हंसः ॥
कण्ठे विशुद्धिचक्रे षोडशदलकमले ॥

६ कं नमः हंसः +++ ठं नमः हंसः ॥
हृदये अनाहते द्वादशदलकमले ॥

६ डं नमः हंसः +++ फं नमः हंसः ॥
नाभौ मणिपूरे दशदलकमले ॥

६ बं नमः हंसः +++ लं नमः हंसः ॥
लिङ्गमूले स्वाधिष्ठाने षड्दलकमले ॥

६ वं नमः हंसः +++ सं नमः हंसः ॥
गुदोपरि मूलाधारे चतुर्दलकमले ॥

६ हं नमः हंसः क्षं नमः हंसः ॥ भ्रुवोर्मध्ये आज्ञाचक्रे द्विदले ॥

६ अं नमः हंसः आं नमः हंसः +++ क्षं नमः हंसः ॥
५१ वर्णाः मूर्ध्नि सहस्रारे ॥

❀ ❀ ❀

गणेशन्यासः ।

तरुणादित्यसङ्काशान् गजवक्त्रांस्त्रिलोचनान्।
पाशाङ्कुशवराभीतिकरान् शक्तिसमन्वितान् ॥
ते तु सिन्दूरवर्णाभाः सर्वालङ्कारभूषिताः ।
एकहस्तधृताम्भोजा इतरालिङ्गितप्रियाः ॥

वामोर्ध्वकरमारभ्य वामाधः करपर्यन्तं गणेशानां पाशादि-ध्यानम् । शक्तीनां तु वामकरे कमले दक्षिणे च प्रियाश्लेष- इति ध्यात्वा, मातृकास्थानेषु त्रितारिमातृकापूर्वकं गणेशान् न्यसेत् । यथा

श्रीं ह्रीं क्लीं अं श्रीयुक्ताय विघ्नेशाय नमः । शिरसि ।।
३ आं ह्रीयुक्ताय विघ्नराजाय नमः । मुखवृत्ते ।।
३ इं तुष्टियुक्ताय विनायकाय नमः । दक्षनेत्रे ।।
३ ईं शान्तियुक्ताय शिवोत्तमाय नमः । वामनेत्रे ।।
३ उं पुष्टियुक्ताय विघ्नहृते नमः । दक्षकर्णे ।।
३ ऊं सरस्वतीयुक्ताय विघ्नकर्त्रे नमः । वामकर्णे ।।
३ ऋं रतियुक्ताय विघ्नराजे नमः । दक्षनासापुटे ।।
३ ॠं मेधायुक्ताय गणनायकाय नमः । वामनासापुटे ।।
३ लृं कान्तियुक्ताय एकदन्ताय नमः । दक्षगण्डे ।।
३ लॄं कामिनीयुक्ताय द्विदन्ताय नमः । वामगण्डे ।।
३ एं मोहिनीयुक्ताय गजवक्त्राय नमः । उर्ध्वोष्ठे ।।
३ ऐं जटायुक्ताय निरञ्जनाय नमः । अधरोष्ठे ।।
३ ओं तीव्रायुक्ताय कपर्दभृते नमः । उर्ध्वदन्तपङ्क्तौ ।।

श्रीं ह्रीं क्लीं औं ज्वालिनीयुक्ताय दीर्घमुखाय नमः। अधोदन्तपङ्क्तौ ॥

३ अं नन्दायुक्ताय शङ्कुकर्णाय नमः। जिह्वाग्रे ॥

३ अः सुरसायुक्ताय वृषध्वजाय नमः। कण्ठे ॥

३ कं कामरूपिणीयुक्ताय गणनाथाय नमः। दक्षबाहुमूले ॥

३ खं सुभ्रूयुक्ताय गजेन्द्राय नमः। दक्षकूर्परे ॥

३ गं जयिनीयुक्ताय शूर्पकर्णाय नमः। दक्षमणिबन्धे ॥

३ घं सत्यायुक्ताय त्रिलोचनाय नमः। दक्षकराङ्गुलिमूले ॥

३ ङं विघ्नेशीयुक्ताय लम्बोदराय नमः। दक्षकराङ्गुल्यग्रे ॥

३ चं सुरूपायुक्ताय महानादाय नमः। वामबाहुमूले ॥

३ छं कामदायुक्ताय चतुर्मूर्त्तये नमः। वामकूर्परे ॥

३ जं मदविह्वलायुक्ताय सदाशिवाय नमः। वाममणिबन्धे ॥

३ झं विकटायुक्ताय आमोदाय नमः। वामकराङ्गुलिमूले ॥

३ ञं पूर्णायुक्ताय दुर्मुखाय नमः। वामकराङ्गुल्यग्रे ॥

३ टं भूतिदायुक्ताय सुमुखाय नमः। दक्षोरुमूले ॥

३ ठं भूमियुक्ताय प्रमोदाय नमः। दक्षजानुनि ॥

३ डं शक्तियुक्ताय एकपादाय नमः। दक्षगुल्फे ॥

३ ढं रमायुक्ताय द्विजिह्वाय नमः। दक्षपादाङ्गुलिमूले ॥

३ णं मानुषीयुक्ताय शूराय नमः। दक्षपादाङ्गुल्यग्रे ॥

३ तं मकरध्वजायुक्ताय वीराय नमः। वामोरुमूले ॥

३ थं वीरिणीयुक्ताय षण्मुखाय नमः। वामजानुनि ॥

३ दं भ्रुकुटीयुक्ताय वरदाय नमः। वामगुल्फे ॥

३ धं लज्जायुक्ताय वामदेवाय नमः। वामपादाङ्गुलिमूले ॥

३ नं दीर्घघोणायुक्ताय वक्रतुण्डाय नमः। वामपादाङ्गुल्यग्रे॥

श्रीं ह्रीं क्लीं पं धनुर्धरायुक्ताय द्वितुण्डकाय नमः। दक्षपार्श्वे ॥

३ फं यामिनीयुक्ताय सेनान्ये नमः । वामपार्श्वे ॥

३ बं रात्रियुक्ताय ग्रामण्ये नमः । पृष्ठे ॥

३ भं चन्द्रिकायुक्ताय मत्ताय नमः । नाभौ ॥

३ मं शशिप्रभायुक्ताय विमत्ताय नमः। जठरे ॥

३ यं लोलायुक्ताय मत्तवाहनाय नमः। हृदये ॥

३ रं चपलायुक्ताय जटिने नमः। दक्षस्कन्धे ॥

३ लं ऋद्धियुक्ताय मुण्डिने नमः। गलपृष्ठे (ककुदि) ॥

३ वं दुर्भगायुक्ताय खड्गिने नमः। वामस्कन्धे ॥

३ शं सुभगायुक्ताय वरेण्याय नमः।

हृदयादिदक्षकराङ्गुल्यन्तम् ॥

३ षं शिवायुक्ताय वृषकेतनाय नमः ।

हृदयादिवामकराङ्गुल्यन्तम् ॥

३ सं दुर्गायुक्ताय भक्ष्यप्रियाय नमः ।

हृदयादिदक्षपादाङ्गुल्यन्तम् ॥

३ हं कालीयुक्ताय गणेशाय नमः ।

हृदयादिवामपादाङ्गुल्यन्तम् ॥

३ ळं कालकुब्जिकायुक्ताय मेघनादाय नमः।

हृदयादिपादान्तम् ॥

३ क्षं विघ्नहारिणीयुक्ताय गणेश्वराय नमः।

हृदयादिमूर्धान्तम् मूलेन त्रिः व्यापकं कुर्यात् ॥

ततः षडध्व न्यासः—सोपि द्विधा वाच्यवाचकभेदेन ।

तत्रापि वाच्यं त्रिविधं—कला-तत्त्व-भुवन भेदेन ।

वाचकमपि त्रिविधं—वर्ण-पद-मन्त्र भेदेन ।

तत्र कलान्यासः—

श्रीं ह्रीं क्लीं ह्रौं नमः पराय शान्त्यतीतकलात्मने नमः । शिरसि ॥

३ ह्र्यैं नमः पराय शान्तिकलात्मने नमः । भ्रूमध्ये ॥

३ ह्रूं नमः पराय विद्याकलात्मने नमः । हृदये ॥

३ ह्रीं नमः पराय प्रतिष्ठाकलात्मने नमः । गुह्ये ॥

३ ह्रां नमः पराय निवृत्तिकलात्मने नमः । पादयोः ॥

मूलेन त्रिः सर्वाङ्गे व्यापकं कुर्यात् ॥

अथ तत्त्वन्यासः—

श्रीं ह्रीं क्लीं मं नमः पराय जीवात्मने नमः ।
३ भं नमः पराय प्राणात्मने नमः । } शिरसि ॥

३ बं नमः पराय बुद्ध्यात्मने नमः ।
३ फं नमः पराय अहङ्कारात्मने नमः ।
३ पं नमः पराय मनआत्मने नमः । } हृदये ॥

३ नं नमः पराय शब्दतन्मात्रात्मने नमः । शिरसि ॥

३ धं नमः पराय स्पर्शतन्मात्रात्मने नमः । भ्रूमध्ये ॥

३ दं नमः पराय रूपतन्मात्रात्मने नमः । हृदये ॥

३ थं नमः पराय रसतन्मात्रात्मने नमः । गुह्ये ॥

३ तं नमः पराय गन्धतन्मात्रात्मने नमः । पादयोः ॥

३ णं नमः पराय श्रोत्रात्मने नमः । श्रोत्रयो ॥

श्रीं ह्रीं क्लीं ढं नमः पराय त्वगात्मने नमः । त्वचि ॥

३ डं नमः पराय चक्षुरात्मने नमः । चक्षुषोः ॥

३ ठं नमः पराय जिह्वात्मने नमः । जिह्वायां ॥

३ टं नमः पराय घ्राणात्मने नमः । नासिकयोः ॥

३ ञं नमः पराय वागात्मने नमः । वाचि ॥

३ झं नमः पराय पाण्यात्मने नमः । करयोः ॥

३ जं नमः पराय पादात्मने नमः । पादयोः ॥

३ छं नमः पराय पाय्वात्मने नमः । पायौ ॥

३ चं नमः पराय उपस्थात्मने नमः । गुह्ये ॥

३ ङं नमः पराय आकाशात्मने नमः । शिरसि ॥

३ घं नमः पराय वाय्वात्मने नमः । मुखे ॥

३ गं नमः पराय तेज आत्मने नमः । हृदये ॥

३ खं नमः पराय अबात्मने नमः । गुह्ये ॥

३ कं नमः पराय पृथ्व्यात्मने नमः । पादयोः ॥

३ शं नमः पराय हृत्पुण्डरीकात्मने नमः । हृदये ॥

३ षं नमः पराय सूर्यमण्डलाय द्वादशकलात्मने नमः। हृदये ॥

३ सं नसः पराय सोममण्डलाय षोडशकलात्मने नमः।हृदये॥

३ हं नमः पराय वह्निमण्डलाय दशकलात्मने नमः । हृदये ॥

३ गों नमः पराय शान्त्यतीतकलात्मने नमः । शिरसि ॥

३ गें नमः पराय शान्तिकलात्मने नमः । मुखे ॥

३ गूं नमः पराय विद्याकलात्मने नमः । हृदये ॥

३ गीं नमः पराय प्रतिष्ठाकलात्मने नमः । गुह्ये ॥

३ गं नमः पराय निवृत्तिकलात्मने नमः । पादयोः ॥

मूलेन सर्वाङ्गे त्रिः व्यापकं कुर्यात् । इति तत्त्वन्यासः ॥

अथ भुवन न्यासः—

श्रीं ह्रीं क्लीं गां भूर्लोकाय नमः । पादादिनाभ्यन्तम् ॥

३ गीं भुवर्लोकाय नमः । नाभ्यादि कण्ठान्तम् ॥

३ गूं सवर्लोकाय नमः । कण्ठादिशीर्षान्तम् ॥

मूलेन सर्वाङ्गे त्रिः व्यापकं कुर्यात् । इति भुवनन्यासः ॥

अथ वर्णन्यासः—तद्यथा गणपतिमूलमन्त्रेण पुटितान् मातृका-वर्णान् मातृकास्थानेषु न्यसेत् ॥

श्रीं ह्रीं क्लीं मूलं अं मूलं नमः । शिरसि ॥

३ ,, आं ,, नमः । मुखवृत्ते ॥

३ ,, इं ,, नमः । दक्षनेत्रे ॥

३ ,, ईं ,, नमः । वामनेत्रे ॥

३ ,, उं ,, नमः । दक्षकर्णे ॥

३ ,, ऊं ,, नमः । वामकर्णे ॥

३ ,, ऋं ,, नमः । दक्षनासापुटे ॥

३ ,, ॠं ,, नमः । वामनासापुटे ॥

३ ,, लुं ,, नमः । दक्षकपोले ॥

३ ,, लूं ,, नमः । वामकपोले ॥

३ ,, एं ,, नमः । ऊर्ध्वोष्ठे ॥

३ ,, ऐं ,, नमः । अधरोष्ठे ॥

३ ,, ओं ,, नमः । ऊर्ध्वदन्तपङ्क्तौ ॥

३ ,, औं ,, नमः । अधोदन्तपङ्क्तौ ॥

३ ,, अं ,, नमः । जिह्वाग्रे ॥

३ ,, अः ,, नमः । कण्ठे ॥

श्रीं ह्रीं क्लीं	मूलं	कं	मूलं	नमः ।	दक्षबाहुमूले ॥
३	,,	खं	,,	नमः ।	दक्षकूर्परे ॥
३	,,	गं	,,	नमः ।	दक्षमणिबन्धे ।
३	,,	घं	,,	नमः ।	दक्षकराङ्गुलिमूले ॥
३	,,	ङं	,,	नमः ।	दक्षकराङ्गुल्यग्रे ॥
३	,,	चं	,,	नमः ।	वामबाहुमूले ॥
३	,,	छं	,,	नमः ।	वामकूर्परे ॥
३	,,	जं	,,	नमः ।	वाममणिबन्धे ॥
३	,,	झं	,,	नमः ।	वामकराङ्गुलिमूले ॥
३	,,	ञं	,,	नमः ।	वामकराङ्गुल्यग्रे ॥
३	,,	टं	,,	नमः ।	दक्षोरुमूले ॥
३	,,	ठं	,,	नमः ।	दक्षजानुनि ॥
३	,,	डं	,,	नमः ।	दक्षगुल्फे ॥
३	,,	ढं	,,	नमः ।	दक्षपादाङ्गुलिमूले ॥
३	,,	णं	,,	नमः ।	दक्षपादाङ्गुल्यग्रे ॥
३	,,	तं	,,	नमः ।	वामोरुमूले ॥
३	,,	थं	,,	नमः ।	वामजानुनि ॥
३	,,	दं	,,	नमः ।	वामगुल्फे ॥
३	,,	धं	,,	नमः ।	वामपादाङ्गुलिमूले ॥
३	,,	नं	,,	नमः ।	वामपादाङ्गुल्यग्रे ॥
३	,,	पं	,,	नमः ।	दक्षपार्श्वे ॥
३	,,	फं	,,	नमः ।	वामपार्श्वे ॥
३	,,	बं	,,	नमः ।	पृष्ठे ॥

श्रीं ह्रीं क्लीं मूलं भं मूलं नमः। नाभौ ॥
३ ,, मं ,, नमः। जठरे ॥
३ ,, यं ,, नमः। हृदये ॥
३ ,, रं ,, नमः। दक्षकक्षे ॥
३ ,, लं ,, नमः। गलपृष्ठे ॥
३ ,, वं ,, नमः। वामकक्षे ॥
३ ,, शं ,, नमः। हृदयादिदक्षकराङ्गुल्यन्तम् ॥
३ ,, षं ,, नमः। हृदयादिवामकराङ्गुल्यन्तम् ॥
३ ,, सं ,, नमः। हृदयादिदक्षपादाङ्गुल्यन्तम् ॥
३ ,, हं ,, नमः। हृदयादिवामपादाङ्गुल्यन्तम् ॥
३ ,, ळं ,, नमः। हृदयादिगुह्यान्तम् ॥
३ ,, क्षं ,, नमः। हृदयादिमूर्धान्तम् ॥

मूलेन त्रिः व्यापकं कुर्यात्। इति वर्णन्यासः॥

अथ पदन्यासः—

श्रीं ह्रीं क्लीं तत्पुरुषाय नमः। शिरसि ॥
३ विद्महे नमः। फाले ॥
३ वक्रतुण्डाय नमः। मुखे ॥
३ धीमही नमः। कण्ठे ॥
३ तत् नमः। नाभौ ॥
३ नो नमः। ऊर्वोः ॥
३ दन्तिः। जान्वाः ॥
३ प्रचोदयात् नमः। पादयोः ॥

मूलेन त्रिः व्यापकं कुर्यात् इति पदन्यास ॥

अथ मन्त्रन्यासः—

श्रीं ह्रीं क्लीं गणानां नमः । शिरसि ॥

३ त्वा नमः । फाले ॥

३ गणपतिं नमः । वदने ॥

३ हवामहे नमः । उपकण्ठे ॥

३ कविं नमः । कण्ठे ॥

३ कवीनाम् नमः । मुखे ॥

३ उपमश्रवस्तमम् नमः । गळे ॥

३ ज्येष्ठराजम् नमः । अंसयोः ॥

३ ब्रह्मणाम् नमः । हृदये ॥

३ ब्रह्मणः नमः । नाभौ ॥

३ पते नमः । गुह्ये ॥

३ आ नमः । दक्षिणजानुनि ॥

३ नः नमः । वामजानुनि ॥

३ शृण्वन् नमः । दक्षिणाङ्घ्रौ ॥

३ ऊतिभि नमः । वामाङ्घ्रौ ॥

३ सीद नमः । पृष्ठे ॥

३ सादनम् नमः । ककुदि ॥

मूलेन त्रिः व्यापकं कुर्यात् । इति मन्त्रन्यासः ॥
एवं सूक्ष्मशरीरकल्पनार्थे षडध्वन्यासं कुर्यात् ॥

अथ दशविघ्नन्यासः—

श्रीं ह्रीं क्लीं विघ्नगणपतये नमः । मूर्ध्नि ॥

३ विनायक गणपतये नमः । दक्षनेत्रे ॥

३ वीरगणपतये नमः । वामनेत्रे ॥

श्रीं ह्रीं क्लीं शूरगणपतये नमः । जिह्वायाम् ॥
३ वरदगणपतये नमः । हृदये ॥
३ हस्तिमुखगणपतये नमः । नाभौ ॥
३ एकदन्तगणपतये नमः । गुह्ये ॥
३ लम्बोदरगणपतये नमः । दक्षजानुनि ॥
३ क्षिप्रगणपतये नमः । वामजानुनि ॥
३ महागणपतये नमः । चरणाग्रयोः ॥
मूलेन त्रिः व्यापकं सर्वाङ्गे कुर्यात् ॥

श्रीं ह्रीं क्लीं ओं श्रीं नमः । अङ्गुष्ठाभ्यां नमः ॥
३ ,, ह्रीं नमः । तर्जनीभ्यां नमः ॥
३ ,, क्लीं नमः । मध्यमाभ्यां नमः ॥
३ ,, ग्लौं नमः । अनामिकाभ्यां नमः ॥
३ ,, गं नमः । कनिष्ठिकाभ्यां नमः ॥
मूलमंत्रावशिष्टेन करतलयोः व्यापकं कुर्यात् ॥

श्रीं ह्रीं क्लीं ओं गां नमः । अङ्गुष्ठयोः ॥
३ ,, गीं नमः । तर्जन्योः ॥
३ ,, गूं नमः । मध्यमयोः ॥
३ ,, गैं नमः । अनामिकयोः ॥
३ ,, गं नमः । कनिष्ठिकयोः ॥
मूलेन त्रिः सर्वाङ्गे व्यापकं कुर्यात् ॥

श्रीं ह्रीं क्लीं ओं श्रीं नमः । मूर्ध्नि ॥
३ ,, ह्रीं नमः । भ्रूमध्ये ॥
३ ,, क्लीं नमः । हृदये ॥

श्रीं ह्रीं क्लीं ओं ग्लौं नमः। गुह्ये ॥

३ ,, गं नमः। पादयोः॥

३ गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।

मन्त्रेण उक्तस्थानेषु व्यापकं न्यसेत् ॥

श्रीं ह्रीं क्लीं ओं श्रीं नमः। मूर्ध्नि ॥

३ ,, ह्रीं नमः। मुखे ॥

३ ,, क्लीं नमः। दक्षकर्णे ॥

३ ,, ग्लौं नमः। वामकर्णे ॥

३ ,, गं नमः। चोरकूपे ॥

३ गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।

मन्त्रेण उक्तस्थानेषु व्यापकं कुर्यात् ॥

श्रीं ह्रीं क्लीं ओं श्रीं नमः। शिरसि ॥

३ ,, ह्रीं नमः। भ्रूमध्ये ॥

३ ,, क्लीं नमः। वामनेत्रे ॥

३ ,, ग्लौं नमः। दक्षनेत्रे ॥

३ ,, गं नमः। मुखे ॥

३ गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।

मन्त्रेण उक्तस्थानेषु व्यापकं कुर्यात् ॥

श्रीं ह्रीं क्लीं ओं श्रीं नमः। दक्षकरांसे ॥

३ ,, ह्रीं नमः। दक्षकरकूर्परे ॥

३ ,, क्लीं नमः। दक्षमणिबन्धे ॥

श्रीं ह्रीं क्लीं ओं ग्लौं नमः। दक्षकराङ्गुलिमूले ।।

३ ,, गं नमः। दक्षकराङ्गुल्यग्रे ।।

३ गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।

मन्त्रेण उक्तस्थानेषु व्यापकं कुर्यात् ।।

श्रीं ह्रीं क्लीं ओं श्रीं नमः।। वामकरांसे ।।

३ ओं ह्रीं नमः। वामकरकूर्परे ।।

३ ओं क्लीं नमः। वाममणिबन्धे ।।

३ ओं ग्लौं नमः। वामकराङ्गुलिमूले ।।

३ ओं गं नमः। वामकराङ्गुल्यग्रे ।।

३ गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।

मन्त्रेण उक्तस्थानेषु व्यापकं कुर्यात् ।।

श्रीं ह्रीं क्लीं ओं श्रीं नमः। दक्षोरुमूले ।।

३ ओं ह्रीं नमः। दक्षजानुनि ।।

३ ओं क्लीं नमः। दक्षगुल्फे ।।

३ ओं ग्लौं नमः। दक्षपादाङ्गुलिमूले ।।

३ ओं गं नमः। दक्षपादाङ्गुल्यग्रे ।।

३ गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।

मन्त्रेण उक्तस्थानेषु व्यापकं कुर्यात् ।।

श्रीं ह्रीं क्लीं ओं श्रीं नमः। वामोरुमूले ।।

३ ओं ह्रीं नमः। वामजानुनि ।।

३ ओं क्लीं नमः। वामगुल्फे ।।

श्रीं ह्रीं क्लीं ओं ग्लौं नमः। वामपादाङ्गुलिमूले ॥

३ ओं गं नमः। वामपादाङ्गुल्यग्रे ॥

ओं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।

न्त्रेण उक्तस्थानेषु व्यापकं कुर्यात् ॥

श्रीं ह्रीं क्लीं ओं श्रीं नमः। वामकट्यां ॥

३ ओं ह्रीं नमः। दक्षकट्यां ॥

३ ओं क्लीं नमः। वामांसे ॥

३ ओं ग्लौं नमः। दक्षांसे ॥

३ ओं गं नमः। हृदये ॥

३ गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।

मन्त्रेण उक्तस्थानेषु व्यापकं कुर्यात् ॥

श्रीं ह्रीं क्लीं ओं श्रीं नमः। वामजानुनि ॥

३ ओं ह्रीं नमः। दक्षजानुनि ॥

३ ओं क्लीं नमः। वामगुल्फे ॥

३ ओं ग्लौं नमः। दक्षगुल्फे ॥

३ ओं गं नमः। नाभौ ॥

३ गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा।

मंत्रेण उक्तस्थानेषु व्यापकं कुर्यात् ॥

श्रीं ह्रीं क्लीं ओं श्रीं नमः। वामस्तने ॥

३ ओं ह्रीं नमः। दक्षस्तने ॥

३ ओं क्लीं नमः। गळे ॥

श्रीं ह्रीं क्लीं ओं ग्लौं नमः। पृष्ठे ॥

३ ओं गं नमः। उपकण्ठे ॥

३ गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा। मन्त्रेण उक्तस्थानेषु व्यापकं कुर्यात् ॥

मूलमन्त्रावशिष्ठवर्णैः तत्तन्न्यासान्ते उक्तस्थानेषु व्यापकत्वेन न्यसेत् ॥

मूलमंत्रवर्णन्यासः–

श्रीं ह्रीं क्लीं ओं ओं नमः । मूर्ध्नि ॥

३ ओं श्रीं नमः । भ्रूमध्ये ॥

३ ओं ह्रीं नमः । वामनेत्रे ॥

३ ओं क्लीं नमः । दक्षनेत्रे ॥

३ ओं ग्लौं नमः । कण्ठे ॥

३ ओं गं नमः । उपकण्ठे ॥

३ ओं गं नमः । मुखे ॥

३ ओं णं नमः । दक्षकरमूले ॥

३ ओं पं नमः । दक्षकूर्परे ॥

३ ओं तं नमः । दक्षमणिबन्धे ॥

३ ओं यें नमः । दक्षकराङ्गुलिमूले ॥

३ ओं व नमः । दक्षकराङ्गुल्यग्रे ॥

३ ओं रं नमः । वामकरमूले ॥

३ ओं वं नमः । वामकूर्परे ॥

३ ओं रं नमः । वाममणिबन्धे ॥

३ ओं दं नमः । वामकराङ्गुलिमूले ॥

श्रीं ह्रीं क्लीं ओं सं नमः । वामकराङ्गुल्यग्रे ॥
३ ओं वं नमः । दक्षोरुमूले ॥
३ ओं जं नमः । दक्षजानुनि ॥
३ ओं नं नमः । दक्षगुल्फे ॥
३ ओं में नमः । दक्षपादाङ्गुलिमूले ॥
३ ओं वं नमः । दक्षपादाङ्गुल्यग्रे ॥
३ ओं शं नमः । वामोरुमूले ॥
३ ओं मां नमः । वामजानुनि ॥
३ ओं नं नमः । वामगुल्फे ॥
३ ओं यं नमः । वामपादाङ्गुलिमूले ॥
३ ओं स्वां नमः । वामपादाङ्गुल्यग्रे ॥
३ ओं हां नमः । हृदये ॥
मूलेन त्रिः सर्वाङ्गे व्यापकं न्यसेत् ॥

अथ मूलमंत्रपदाष्टकन्यासः–

श्रीं ह्रीं क्लीं ओं ओं नमः । अधःसहस्रारे ॥
३ ओं श्री नमः । मूलाधारे ॥
३ ओं ह्रीं नमः । स्वाधिष्ठाने ॥
३ ओं क्लीं नमः । मणिपूरके ॥
३ ओं ग्लौं नमः । अनाहते ॥
३ ओं गं नमः । विशुद्धौ ॥
३ ओं गणपतये वरवरद नमः । आज्ञायाम् ॥
३ ओं सर्वजनं मे वशमानय स्वाहा । ब्रह्मरन्ध्रे ॥
मूलेन त्रिः सर्वाङ्गे व्यापकं न्यसेत् ॥

श्रीं ह्रीं क्लीं ओं ओं नमः । मूलाधारे ॥
३ ओं श्रीं नमः । लिङ्गमूले ॥
३ ओं ह्रीं नमः । नाभौ ॥
३ ओं क्लीं नमः । हृदये ॥
३ ओं ग्लौं नमः । गळे ॥
३ ओं गं नमः । लम्बिकाग्रे ॥
३ ओं गणपतये वरवरद नमः । मूर्ध्नि ॥
३ ओं सर्वजनं मे वशमानय स्वाहा ॥ ब्रह्मरन्ध्रे ॥
मूलेन त्रिः सर्वाङ्गे व्यापकं न्यसेत् ॥

मूलमन्त्रपदनवकन्यासः :-

श्रीं ह्रीं क्लीं ओं ओं नमः । मूलाधारे ॥
३ ओं श्रीं नमः । लिङ्गमूले ॥
३ ओं ह्रीं नमः । नाभौ ॥
३ ओं क्लीं नमः । हृदये ॥
३ ओं ग्लौं नमः । गळे ॥
३ ओं गं नमः । लम्बिकाग्रे ॥
३ ओं गणपतये नमः भ्रूमध्ये ॥
३ ओं वरवरद नमः । ललाटे ॥
३ ओं सर्वजनं मे वशमानय स्वाहा नमः । मूर्ध्नि ॥
मूलेन त्रिः सर्वाङ्गे व्यापकं न्यसेत् ॥

अथ मूलमन्त्रपदचतुर्दशकन्यासः :-

श्रीं ह्रीं क्लीं ओं ओं नमः । मूलाधारे ॥
३ ओं श्रीं नमः । वृषणे: ॥
३ ओं ह्रीं नमः । लिङ्गमूले ॥

श्रीं ह्रीं क्लीं ओं क्लीं नमः । जठरे ॥
३ ओं ग्लौं नमः । नाभौ ॥
३ ओं गं नमः । उदरे ॥
३ ओं गणपतये नमः । हृदये ॥
३ ओं वर नमः । उरसि ॥
३ ओं वरद नमः । गळे ॥
३ ओं सर्वजनं नमः ॥ लम्बिकाग्रे ॥
३ ओं मे नमः । भ्रूमध्ये ॥
३ ओं वशं नमः । ललाटे ॥
३ ओं आनय नमः । केशान्ते ॥
३ ओं स्वाहा नमः । मूर्ध्नि ॥

मूलेन त्रिः व्यापकं न्यसेत् ॥

अथ मूलमन्त्रपददशकन्यासः —

श्रीं ह्रीं क्लीं ओं ओं नमः । मूलाधारे ॥
३ ओं श्रीं नमः । लिङ्गमूले ॥
३ ओं ह्रीं नमः । नाभौ ॥
३ ओं क्लीं नमः । हृदये ॥
३ ओं ग्लौं नमः । गळे ॥
३ ओं गं नमः । लम्बिकाग्रे ॥
३ ओं गणपतये नमः । भ्रूमध्ये ॥
३ ओं वरवरद नमः । ललाटे ॥
३ ओं सर्वजनं नमः । केशान्ते ॥
३ ओं मे वशमानय स्वाहा नमः । मूर्ध्नि ॥

मूलेन त्रिः व्यापकं न्यसेत् ॥

३ ओं श्रीं नमः सर्वजनं मे वशमानय स्वाहा । मूर्ध्नि ॥
३ ,, ह्रीं नमः सर्वजनं मे वशमानय स्वाहा । भ्रूमध्ये ॥
३ ,, क्लीं नमः सर्वजनं मे वशमानय स्वाहा । वामनेत्रे ॥
३ ,, ग्लौं नमः सर्वजनं मे वशमानय स्वाहा । दक्षनेत्रे ॥
३ ,, गं नमः सर्वजनं मे वशमानय स्वाहा । मुखे ॥

मूलेन त्रिः व्यापकं कुर्यात् ॥

३ ओं श्रीं नमः सर्वजनं मे वशमानय स्वाहा । दक्षकरमूले ॥
३ ,, ह्रीं नमः सर्वजनं मे वशमानय स्वाहा । दक्षकरमणिबन्धे ॥
३ ,, क्लीं नमः सर्वजनं मे वशमानय स्वाहा । दक्षकरकूर्परे ॥
३ ,, ग्लौं नमः सर्वजनं मे वशमानय स्वाहा । दक्षकराङ्गुलिमूले ॥
३ ,, गं नमः सर्वजनं मे वशमानय स्वाहा । दक्षकराङ्गुल्यग्रे ॥

मूलेन त्रिः व्यापकं कुर्यात् ॥

३ ओं श्रीं नमः सर्मजनं मे वशमानय स्वाहा । वामकरमूले ॥
३ ,, ह्रीं नमः सर्वजनं मे वशमानय स्वाहा । वामकरमणिबन्धे ॥
३ ,, क्लीं नमः सर्वजनं मे वशमानय स्वाहा । वामकूर्परे ॥
३ ,, ग्लौं नमः सर्वजनं मे वशमानय स्वाहा । वामकराङ्गुलिमूले ॥
३ ,, गं नमः सर्वजनं मे वशमानय स्वाहा । वामकराङ्गुल्यग्रे ॥

मूलेन त्रिः व्यापकं कुर्यात् ॥

३ ओं श्रीं नमः सर्वजनं मे वशमानय स्वाहा । दक्षोरुमूले ॥
३ ,, ह्रीं नमः सर्वजनं मे वशमानय स्वाहा । दक्षजानुनि ॥
३ ,, क्लीं नमः सर्वजनं मे वशमानय स्वाहा । दक्षगुल्फे ॥
३ ,, ग्लौं नमः सर्वजनं मे वशमानय स्वाहा । दक्षपादाङ्गुलिमूले ॥
३ ,, गं नमः सर्वजनं मे वशमानय स्वाहा । दक्षपादाङ्गुल्यग्रे ॥

मूलेन त्रिः व्यापकं कुर्यात् ॥

३ ओं श्रीं नमः सर्वजनं मे वशमानय स्वाहा । वामोरुमूले ॥
३ ,, ह्रीं नमः सर्वजनं मे वशमानय स्वाहा । वामजानुनि ॥
३ ,, क्लीं नमः सर्वजनं मे वशमानय स्वाहा । वामगुल्फे ॥
३ ,, ग्लौं नमः सर्वजनं मे वशमानय स्वाहा । वामपादाङ्गुलिमूले ॥
३ ,, गं नमः सर्वजनं मे वशमानय स्वाहा । वामपादाङ्गुल्यग्रे ॥

मूलेन त्रिः व्यापकं कुर्यात् ॥

३ ओं श्रीं नमः सर्वजनं मे वशमानय स्वाहा । वामकटयाम् ॥
३ ,, ह्रीं नमः सर्वजनं मे वशमानय स्वाहा । वामांसे ॥
३ ,, क्लीं नमः सर्वजनं मे वशमानय स्वाहा । दक्षांसे ॥
३ ,, ग्लौं नमः सर्वजनं मे वशमानय स्वाहा । दक्षकटयाम् ॥
३ ,, गं नमः सर्वजनं मे वशमानय स्वाहा । हृदये ॥

मूलेन त्रिः व्यापकं कुर्यात् ॥

३ ओं श्रीं नमः सर्वजनं मे वशमानय स्वाहा । वामजानुनि ॥
३ ,, ह्रीं नमः सर्वजनं मे वशमानय स्वाहा । वामगुल्फे ॥
३ ,, क्लीं नमः सर्वजनं मे वशमानय स्वाहा । दक्षजानुनि ॥
३ ,, ग्लौं नमः सर्वजन मे वशमानय स्वाहा । दक्षगुल्फे ॥
३ ,, गं नमः सर्वजनं मे वशमानय स्वाहा । नाभौ ॥

मूलेस त्रिः व्यापकं कुर्यात् ॥

३ ओं श्रीं नमः सर्वजनं मे वशमानय स्वाहा । वामस्तने ॥
३ ,, ह्रीं नमः सर्वजनं मे वशमानय स्वाहा । दक्षस्तने ॥
३ ,, क्लीं नमः सर्वजनं मे वशमानय स्वाहा । कण्ठे ॥

३ ओं ग्लौं नमः सर्वजनं मे वशमानय स्वाहा । पृष्ठे ॥
३ ,, गं नमः सर्वजनं मे वशमानय स्वाहा । ककुदि ॥

मूलेन त्रिः व्यापकं कुर्यात् ॥

(सर्वन्यासान्ते मूलेन त्रिः व्यापकं कुर्यात्)

श्रीं ह्रीं क्लीं ओं श्रीं नमः । मूर्ध्नि ॥
३ ,, ह्रीं नमः । भ्रूमध्ये ॥
३ ,, क्लीं नमः । दक्षनेत्रे ॥
३ ,, ग्लौं नमः । वामनेत्रे ॥
३ ,, गं नमः । मुखे ॥

३ सर्वजनं मे वशमानय स्वाहा । मन्त्रेण सर्वाङ्गे व्यापकं कुर्यात् ॥

श्रीं ह्रीं क्लीं ओं रमारमेशाभ्यां नमः मूर्ध्नि ॥
३ ,, उमामहेश्वराभ्यां नमः । भ्रूमध्ये ॥
३ ,, रतिपुष्पबाणाभ्यां नमः । हृदये ॥
३ ,, महीवराहाभ्यां नमः । गुह्ये ॥
३ ,, महालक्ष्मीमहालक्ष्मीपतिभ्यां नमः । पादयोः ॥
३ ,, महापुष्टिविनायकौ पंचभूतस्थानेषु न्यसेत् ॥

(पञ्चभूत स्थानानि = मूलाधार — स्वाधिष्ठान—मणिपूर—अनाहत—विशुद्धयः ॥)

मूलेन त्रिः व्यापकं कुर्यात् ॥

श्रीं ह्रीं क्लीं ओं ऋध्यामोदाभ्यां नमः । नाभौ ॥
३ ,, समृद्धिप्रमोदाभ्यां नमः । तद्वामपार्श्वे ॥
३ ,, कान्तिसुमुखाभ्यां नमः । तद्दक्षपार्श्वे ॥

श्रीं ह्रीं क्लीं ओं मदनावतीदुर्मुखाभ्यां नमः । कण्ठे ॥

३ ,, मदद्रवा अविघ्नाभ्यां नमः । तद्वामपार्श्वे ॥

३ ,, द्राविणीविघ्नकर्तृभ्यां नमः । तद्दक्षपार्श्वे ॥

३ ,, वसुधाराशङ्खनिधिभ्यां नमः । वामस्तनाधः ॥

३ ,, वसुमतीपद्मनिधि ':' नमः । दक्षस्तनाधः ॥

मूलेन त्रिः व्यापकं कुर्यात् ॥

श्रीं ह्रीं क्लीं ओं ब्राह्म्यै नमः । पादाङ्गुष्ठे ॥

३ ,, माहेश्वर्यै नमः । दक्षपार्श्वे ॥

३ ,, कौमार्यै नमः । शिरसि ॥

३ ,, वैष्णव्यै नमः । वामपार्श्वे ॥

३ ,, वाराह्यै नमः । वामजानुनि ॥

३ ,, इन्द्राण्यै नमः । दक्षजानुनि ॥

३ ,, चामुण्डायै नमः । दक्षांसे ॥

३ ,, महालक्ष्म्यै नमः । वामांसे ॥

मूलेन त्रिः सर्वाङ्गे व्यापकं कुर्यात् ॥

✠ ✠ ✠

अस्य श्रीमहागणपतिमहामन्त्रस्य । गणक ऋषिः । निचृद्गायत्रीछन्दः । महागणपतिर्देवता । श्रीं बीजं । ह्रीं शक्तिः । क्लीं कीलकं । सिद्धलक्ष्मीसहित श्रीमहागणपतिप्रसादसिद्ध्यर्थे न्यासे विनियोगः—

अथ करषडङ्गन्यासौ—

श्रीं ह्रीं क्लीं ओं गां । अङ्गुष्ठाभ्यां—हृदयाय नमः ॥

३ श्रीं गीं । तर्जनीभ्यां —शिरसे स्वाहा ॥

श्रीं ह्रीं क्लीं ह्लीं गूं । मध्यमाभ्यां—शिखायै वषट् ॥
३ क्लीं गैं । अनामिकाभ्यां—कवचाय हुं ॥
३ ग्लौं गौं । कनिष्ठिकाभ्यां—नेत्रत्रयाय वौषट् ॥
३ गं गः । करतलकरपृष्ठाभ्यां—अस्त्राय फट् ॥

भूर्भुवस्सुवरोम् इति दिग्बन्धः ॥

अथ पात्रासादनम्

वर्धनीकलशस्थापनम्

स्वपुरतः वामभागे त्रिकोणवृत्तचतुरश्रात्मकं मण्डलं मत्स्य-मुद्रया विलिख्य-मण्डलं मूलेन समभ्यर्च्य कर्पूरादिवासितजलपूरितं कलशं गन्धपुष्पाक्षतैः अलङ्कृत्य मण्डलोपरि संस्थापयेत् ॥

ओं कलशस्य मुखे बिष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणः स्मृतः ॥
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ॥
अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रितः ॥

ओं आपो वा इदँ सर्वँ विश्वाभूतान्यापः प्राणा वा आपः पशवः आपोऽन्नमापोऽमृतमापः सम्राडापो विराडापः स्वराडापश्छन्दाँ-स्यापो ज्योतींष्यापो यजूँष्यापः सत्यमापः सर्वा देवता आपो भूर्भुवस्सुवराप ओं ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिं कुरु ॥

सर्वे समुद्राः सरितस्तीर्थानि च नदा ह्रदाः ।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥

मूलेन अष्टवारमभिमन्त्र्य धेनुमुद्रां प्रदर्श्य तज्जलेन पूजोपकरणानि आत्मानं च प्रोक्षयेत् ॥

समान्यार्घ्यविधिः

वर्धनीपात्रस्य दक्षिणतः वर्धनीपात्रगतेन जलेन बिन्दु–त्रिकोण षट्कोण—वृत्त—चतुरश्रात्मकं मण्डलं मत्स्यमुद्रया निर्माय ॥

चतुरश्रे अग्नीशासुरवायुकोणेषु मध्ये दिक्षु च गणपतिषडङ्गैः संपूजयेत् । यथा—

श्रीं ह्रीं क्लीं ओं गां हृदयाय नमः । हृदयशक्तिश्रीपादुकां पूजयामि नमः ॥

३ श्रीं गीं शिरसे स्वाहा । शिरः शक्तिश्रीपादुकां पूजयामि नमः ॥

३ ह्रीं गूं शिखायै वषट् । शिखाशक्तिश्रीपादुकां पूजयामि नमः ॥

३ क्लीं गैं कवचाय हुं । कवचशक्तिश्रीपादुकां पूजयामि नमः ॥

३ ग्लौं गौं नेत्रत्रयाय वौषट् । नेत्रशक्तिश्रीपादुकां पूजयामि नमः ॥

३ गं गः अस्त्राय फट् । अस्त्रशक्तिश्रीपादुकां पूजयामि नमः ॥

षट्कोणे स्वाग्रादि प्रादक्षिण्येन—

श्रीं ह्रीं क्लीं ओं गां हृदयाय नमः । हृदयशक्तिश्रीपादुकां पूजयामि नमः ॥

श्रीं ह्रीं क्लीं श्रीं गीं शिरसे स्वाहा । शिरःशक्तिश्रीपादुकां पूजयामि नमः ॥

३ ह्रीं गूं शिखायै वषट् । शिखाशक्तिश्रीपादुकां पूजयामि नमः ॥

३ क्लीं गैं कवचाय हुं । कवचशक्तिश्रीपादुकां पूजयामि नमः ॥

३ ग्लौं गौं नेत्रत्रयाय वौषट् । नेत्रशक्तिश्रीपादुकां पूजयामि नमः ॥

३ गं गः अस्त्राय फ़ट् । अस्त्रशक्ति श्रीपादुकां पूजयामि नमः ॥

त्रिकोणे स्वाग्रादि प्रादक्षिण्येन—

३ ओं श्रीं ह्रीं क्लीं ग्लौं गं नमः ॥

३ गणपतये वरवरद नमः ॥

३ सर्वजनं मे वशमानय स्वाहा नमः ॥

३ मूलम् नमः (बिन्दौ)

ततः अस्त्राय फ़ट् इति सामान्यार्घ्यपात्रस्य आधारं प्रक्षाल्य,

३ अं अग्निमण्डलाय धर्मप्रद्दशकलात्मने श्रीसिद्धलक्ष्मी-सहित श्रीमहागणपतेः सामान्यार्घ्यपात्राधाराय नमः ॥ इति मण्डलोपरि संस्थाप्य ॥

३ अग्निं दूतं वृणीमहे होतारं विश्विवेदसम्। अस्य यज्ञस्य सुक्रतुम्। रां रीं रूं रैं रौं रः रमलवरयूं अग्निमण्डलाय नमः। इति अग्निमण्डलं विभाव्य। दशवह्निकलाः सपूजयेत्। तद्यथा—

श्रीं ह्रीं क्लीं यं धूम्रार्चिष्कलायै नमः ॥

३ रं ऊष्माकलायै ममः ॥

३ लं ज्वलिनी कलायै नमः ॥

३ वं ज्वालिनीकलायै नमः ॥

३ शं विस्फुलिङ्गिनोकलायै नमः ॥

३ ,लायै नमः ॥

३ सं सुरूपाकलायै नमः ॥

३ हं कपिलाकलायै नमः ॥

३ ळं हव्यवाहिनीकलायै नमः ॥

३ क्षं कव्यवाहिनीकलायै नमः ॥

अस्त्राय फट्—इति क्षालितंशङ्खं गृहीत्वा—

श्रीं ह्री क्लीं उं सूर्यमण्डलायाऽर्थप्रदद्वादशकलात्मने श्रीसिद्ध-लक्ष्मीसहिम श्रीमहागणपतेः सामान्यार्घ्यपात्राय नमः—इति संस्थाप्य.

श्री ह्रीं क्लीं आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिण्ययेन सविता रथेनाऽऽदेवो याति भुवना विपश्यन्। ह्रां ह्रीं ह्रूं ह्रैं ह्रौं हः। हमलवरयूम्। सूर्यमण्डलाय नमः—इति सूर्यमण्डलं विभाव्य द्वादश सूर्यकलाः संपूजयेत्। तद्यथा—

श्रीं ह्रीं क्लीं कं भं तपिनीकलायै नमः ॥

३ खं बं तापिनीकलायै नमः ॥

३ गं फं धूम्राकलायै नमः ॥

श्रीं ह्रीं क्लीं घं पं मरीचिकलायै नमः ॥
३ ङं नं ज्वालिनीकलायै नमः ॥
३ चं धं रुचिकलायै नमः ॥
३ छं दं सुषुम्नाकलायै नमः ॥
३ जं थं भोगदाकलायै नमः ॥
३ झं तं विश्वकलायै नमः ॥
३ ञं णं बोधिनीकलायै नमः ॥
३ टं ढं धारिणीकलायै नमः ॥
३ ठं डं क्षमाकलायै नमः ॥

श्रीं ह्रीं क्लीं मं सोममण्डलाय कामप्रदषोडशकलात्मने । श्रीसिद्धलक्ष्मीसहितमहागणपतेः सामान्यार्घ्यामृताय नमः— इति वर्धनीसलिलमापूर्य क्षीरबिन्दुं दत्वा ।

श्रीं ह्रीं क्लीं आप्यायस्व समेतु ते विश्वतः सोमवृष्णियं । भवावाजस्य संगथे । सां सीं सूं सैं सौं सः समलवरयूं सोममण्डलाय नमः— इति सोममण्डलं विभाव्य षोडश सोमकलाः संपूजयेत् । तद्यथा—

श्रीं ह्रीं क्लीं अं अमृताकलायै नमः ॥
३ आं मानदाकलायै नमः ॥
३ इं पूषाकलायै नमः ॥
३ ईं तुष्टिकलायै नमः ॥
३ उं पुष्टिकलायै नमः ॥
३ ऊं रतिकलायै नमः ॥
३ ऋं धृतिकलायै नमः ॥

श्रीं ह्रीं क्लीं ॠं शशिनीकलायै नमः ॥

३ लुं चन्द्रिकाकलायै नमः ॥

३ लूं कान्तिकलायै नमः ॥

३ एं ज्योत्स्नाकलायै नमः ॥

३ ऐं श्रीकलायै नमः ॥

३ ओं प्रीतिकलायै नमः ॥

३ औं अङ्गदाकलायै नमः ॥

३ अं पूर्णाकलायै नमः ॥

३ अः पूर्णामृताकलायै नमः ॥

ततस्तस्मिन्शङ्खे अग्नीशासुरवायुकोणेषु मध्ये दिक्षु च क्रमेण षडङ्गैः संपूज्य, अस्त्राय फट् इति संरक्ष्य, कवचाय हुं इति अवकुण्ट्य, धेनु योनिमुद्रे प्रदर्श्य, मूलेन सप्तवारमभिमन्त्र्य, तत्सलिलपृषतैः पूजोपकरणानि आत्मानं च प्रोक्ष्य, शङ्खजलात् किञ्चित् वर्धन्यां क्षिपेत् ॥

विशेषार्घ्यविधिः

सामान्यार्घ्योदकेन तद्दक्षिणतः बिन्दु-त्रिकोण-षट्कोण-वृत्त-चतुरश्रात्मकं मण्डलं मत्स्यमुद्रया विलिख्य, बिन्दौ सानुस्वारं तुरीयस्वरं विलिख्य ॥

चतुरश्रे प्राग्वत् षडङ्गं विन्यस्य षट्कोणे स्वाग्रकोणादि प्रादक्षिण्येन षडङ्गैरभ्यर्च्य त्रिकोणे मूलत्रिखण्डैः अभ्यर्च्य, मूलेन बिन्दुं च अर्चयेत् । तद्यथा–

चतुरश्रे अग्नीशासुरवायुकोणेषु मध्ये दिक्षु च—

श्रीं ह्रीं क्लीं ओं गां हृदयाय नमः । हृदयशक्ति
श्रीपादुकां पूजयामि नमः ।।

३ श्रीं गीं शिरसे स्वाहा । शिरःशक्ति ,, ,, ।।

३ ह्रीं गूं शिखायै वषट् । शिखाशक्ति ,, ,, ।।

श्रीं ह्ल क्ल [illegible] । कवचशक्ति ,, ,, ।।

३ ग्लौं गौं नेत्रत्रयाय वौषट् । नेत्रशक्ति ,, ,, ।।

३ गं गः अस्त्राय फट् । अस्त्रशक्ति ,, ,, ।।

ततः षट्कोणे स्वाग्रादि प्रादक्षिण्येन—

श्रीं ह्रीं क्लीं ओं गां हृदयाय नमः । हृदयशक्ति
श्रीपादुकां पूजयामि नमः ।।

३ श्रीं गीं शिरसे स्वाहा । शिरःशक्ति ,, ,, ।।

३ ह्रीं गूं शिखायै वषट् । शिखाशक्ति ,, ,, ।।

३ क्लीं गैं कवचाय हुं । कवचशक्ति ,, ,, ।।

३ ग्लौं गौं नेत्रत्रयाय वौषट् । नेत्रशक्ति ,, ,, ।।

३ गं गः अस्त्राय फट् । अस्त्रशक्ति ,, ,, ।।

ततःस्त्रिकोणे स्वाग्रादिप्रादक्षिण्येन—

श्रीं ह्रीं क्लीं ओं श्रीं ह्रीं क्लीं ग्लौं गं नमः ।।

३ गणपतये वरवरद नमः ।।

३ सर्वजनं मे वशमानय स्वाहा नमः ।।

३ मूलम् नमः (बिन्दौ) ।।

अथ—३ अस्त्राय फट् इति आधारं प्रक्षाल्य ।

श्रीं ह्रीं क्लीं अं अग्निमण्डलाय धर्मप्रदशकलात्मने श्रीसिद्धलक्ष्मीसहित श्रीगणपतेः विशेषार्घ्यपात्राधाराय नमः— इति आधारं संस्थाप्य ।

श्रीं ह्रीं क्लीं अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् । रां रीं रूं रैं रौं रः रमलवरयूं अग्निमण्डलाय नमः— इति अग्निमण्डलं विभाव्य दशवह्निकलाः पूजयेत् । यथा—

श्रीं ह्रीं क्लीं यं धूम्रार्चिष्कलायै नमः ॥
३ रं ऊष्माकलायै नमः ॥
३ लं ज्वलिनीकलायै नमः ॥
३ वं ज्वालिनीकलायै नमः ॥
३ शं विस्फुलिङ्गिनीं कलायै नमः ॥
३ षं सुश्रीकलायै नमः ॥
३ सं सुरूपाकलायै नमः ॥
३ हं कपिलाकलायै नमः ॥
३ ळं हव्यवाहिनीकलायै नमः ॥
३ क्षं कव्यवाहिनीकलायै नमः ॥

ततः-श्रीं ह्रीं क्लीं अस्त्राय फट् इति मन्त्रेण विशेषार्घ्यपात्रं प्रक्षाल्य—

श्रीं ह्रीं क्लीं उं सूर्यमण्डलाय अर्थप्रदद्वादशकलात्मने श्रीसिद्धलक्ष्मीसहित श्रीमहागणपतेः विशेषार्घ्यपात्राय नमः– इति आधारोपरि संस्थाप्य ।

श्रीं ह्रीं ऐं श्रीमहाक्ष्मीश्वरि परमस्वामिनि ऊर्ध्वशून्यप्रवाहिनि सोमसूर्याग्निभक्षिणि परमाकाशभासुरे आगच्छागच्छ विश विश पात्रं प्रतिगृह्ण प्रतिगृह्ण हुं फट् स्वाहा इति पुष्पाञ्जलिं विकीर्य ।।

श्रीं ह्रीं क्लीं आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता रथेनाऽदेवो याति भुवना विपश्यन् । ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ह्मलवरयूं सूर्यमण्डलाय नमः– इति सूर्यमण्डलं विभाव्य द्वादश सूर्यकलाः पूजयेत् । यथा—

श्रीं ह्रीं क्लीं	कं	भं	तपिनीकलायै	नमः	।।
३	खं	बं	तापिनीकलायै	नमः	।।
३	गं	फं	धूम्राकलायै	नमः	।।
३	घं	पं	मरीचिकलायै	नमः	।।
३	ङं	नं	ज्वालिनीकलायै	नमः	।।
३	चं	धं	रुचिकलायै	नमः	।।
३	छं	दं	सुषुम्नाकलायै	नमः	।।
३	जं	थं	भोगदाकलायै	नमः	।।
३	झं	तं	विश्वाकलायै	नमः	।।
३	ञं	णं	बोधिनीकलायै	नमः	।।
३	टं	ढं	धारिणीकलायै	नमः	।।
३	ठं	डं	क्षमाकलायै	नमः	।।

ततः शुद्धिसंस्कारः ।

विशेषार्घ्यस्य दक्षिणतः सामान्यार्घ्योदकेन त्रिकोणवृत्त-चतुरश्रात्मकं मण्डलं मत्स्यमुद्रया विलिख्य—

श्रीं ह्रीं क्लीं ओं ह्रीं ह्रौं नमः शिवाय ।

इति मण्डलं अभ्यर्च्य शुद्धिपात्रं संस्थाप्य

३ ओं श्लीं पशु हुं फट् । इति अष्टवारमभिमन्त्र्य ।।

३ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ।

३ भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ।।

३ वाम देवाय नमो जेष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः ।

कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ।।

श्रीं ह्रीं क्लीं अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ।।

श्रीं ह्रीं क्लीं तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ।।

श्रीं ह्रीं क्लीं ईशानस्सर्वविद्यानां ईश्वरस्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ।

श्रीं ह्रीं क्लीं मं सोममण्डलाय कामप्रदषोडशकलात्मने श्री सिद्धलक्ष्मीसहित श्रीमहागणपतेः विशेषार्घ्यामृताय नमः– इति तत्त्वमुद्रया गृहीतनागरखण्डोपरि सबिन्दु अकारादि क्षकारान्तं क्षकाराद्यकारान्तं मातृकया अर्पितेन अमृतेन आपूर्य अष्टगंधलोलितं पुष्पं निधाय नागरखण्डं निक्षिप्य ।।

श्रीं ह्रीं क्लीं आप्यायस्व समेतु ते विश्वतः सोमवृष्णियम् । भवा वाजस्य संगथे ।। सां सीं सूं सैं सौं सः समलवरयूं सोममण्डलाय नमः– इति सोममण्डलं पूजयेत् । यथा—

श्रीं ह्रीं क्लीं अं अमृताकलायै नमः ॥
३ आं मानदाकलायै नमः ॥
३ इं पूषाकलायै नमः ॥
३ ईं तुष्टिकलायै नमः ॥
३ उं पुष्टिकलायै नमः ॥
३ ऊं रतिकलायै नमः ॥
३ ऋं धृतिकलायै नमः ॥
३ ॠं शशिनीकलायै नमः ॥
३ लुं चन्द्रिकाकलायै नमः ॥
३ लूं कान्तिकलायै नमः ॥
३ एं ज्योत्स्नाकलायै नमः ॥
३ ऐं श्रीकलायै नमः ॥
३ ओं प्रीतिकलायै नमः ॥
३ औं अङ्गदाकलायै नमः ॥
३ अं पूर्णकलायै नमः ॥
३ अः पूर्णामृताकलायै नमः ॥

ततः श्रीं ह्रीं क्लीं ओं जुं सः स्वाहा । इति अष्टवारमभिमन्त्य ॥

तत्राघ्यामृते स्वाग्राद्यप्रादक्षिण्येन अकथादिषोडशवर्णात्मक-रेखात्रयं त्रिकोणं विलिख्य, तदन्तः स्वाग्रादि कोणेषु अप्रादक्षिण्येन हळक्षान् बहिः प्रादक्षिण्येन महागणपतिमूलखण्डत्रयं बिन्दौ सबिन्दु-तुरीयस्वरं, तद्वामदक्षयोः क्रमेण हंसः इति च विलिख्य—

श्रीं ह्रीं क्लीं हंसः नमः इति आराध्य त्रिकोणस्य परितः वृत्तं तद्बहिश्च षट्कोणं निर्माय स्वाग्रकोणादि प्रादक्षिण्येन षडङ्गमन्त्रैः षट्कोणमभ्यर्च्य ।

श्रीं ह्रीं क्लीं मूलं तां चिन्मयीं आनन्दलक्षणां अमृतकलश-पिशितहस्तद्वयां प्रसन्नां देवीं पूजयामि नमः स्वाहा—इति सुधा-देवीं समभ्यर्च्य तदर्घ्यात्किंचित् पात्रान्तरेण,

श्रीं ह्रीं क्लीं वषट् । इत्युद्धृत्य
३ स्वाहा । इति तत्रैव निक्षिप्य
३ हुं । इति अवकुण्ठ्य
३ वौषट् । इति धेनुमुद्रया अमृतीकृत्य
३ फट् । इति संरक्ष्य
३ नमः । इति पुष्पं दत्वा
३ मूलेन । गालिन्या निरीक्ष्य
३ ऐं । इति योनिमुद्रया नत्वा

श्रीं ह्रीं क्लीं मूलेन सप्तवारमभिमन्त्र्य सुधादेवीं षोडशोपचारैः संपूज्य तद्बिन्दुभिः सपर्यासाधनानि प्रोक्ष्य सर्वं महागणपतिमयं विभावयेत् ॥

ततः विशेषार्घ्यपात्रं करेण संस्पृश्य वक्ष्यमाणगणपतिगायत्र्या ऋचा च अभिमन्त्रयेत्—

तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥

गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिः सीदसादनम् ॥
(श्रीक्रमोक्तचतुर्नवतिमन्त्राद्यभिमन्त्रणं अत्र नास्ति ॥)

शुद्धिपात्रस्य अधः त्रिकोण-वृत्त-चतुरश्रात्मकं मण्डलद्वयं विलिख्य । प्रथममण्डले—

श्रीं ह्रीं क्लीं हंसः शिवः सोहं-सोहं हंसश्शिवः, हंसश्शिवस्सोहं हंसः नमः । इत्यभ्यर्च्य गुरुपात्रं निधाय । द्वितीयमण्डले—

श्रीं ह्रीं क्लीं हंसः नमः । इत्यभ्यर्च्य आत्मपात्रं निधाय । ततः विशेषार्घ्यामृतात् किञ्चित् गुरुपात्रे ऊद्धृत्य गुरुत्रयं भजेत् । गुरौ सन्निहिते यदि तस्मै निवेदयेत् । पुनः आत्मपात्रे किञ्चिद्विशेषार्घ्यामृतमुद्धृत्य, मूलाधारे वालाग्रमात्रं अनादिवासनारूपेन्धनप्रज्वलितं कुण्डलिन्यधिष्टितचिदग्निमण्डलं ध्यात्वा,

श्रीं ह्रीं क्लीं कुण्डलिन्यधिष्ठितचिदग्निमण्डलाय नमः । इति मनसासंपूज्य,

श्रीं ह्रीं क्लीं मूलं पुण्यं जुहोमि स्वाहा
३ ,, पापं जुहोमि स्वाहा
३ ,, कृत्यं जुहोमि स्वाहा
३ ,, अकृत्यं जुहोमि स्वाहा
३ ,, सङ्कल्पं जुहोमि स्वाहा
३ ,, विकल्पं जुहोमि स्वाहा
३ ,, धर्मं जुहोमि स्वाहा
३ ,, अधर्मं जुहोमि स्वाहा
३ ,, अधर्मं जुहोमि वौषट्

श्रीं ह्रीं क्लीं इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः । जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यां उदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा- इति पूर्णाहुतिं विभाव्य—

श्रीं ह्रीं क्लीं आर्द्रं ज्वलति ज्योतिरहमस्मि ।
ज्योतिर्ज्वलति ब्रह्माहमस्मि ।
योऽहमस्मि ब्रह्माहमस्मि ।
अहमस्मि ब्रह्माहमस्मि ।
अहमेवाहं मां जुहोमि स्वाहा ॥

इति आत्मनः कुण्डलिनीरूपे चिदग्नौ होमबुद्ध्या जुहुयात् । विशेषार्घ्यपात्रात्किंचित्क्षीरं कारणकलशे निक्षिपेत् ॥

पीठे प्राणप्रतिष्ठा

पुरतो रक्तचन्दनादिभिः निर्मिते पीठे कलधौतादिविरचितां महागणपतिप्रतिमां वा ध्यानोक्तरूपां चतुरश्राष्टदलषडारत्रिकोणात्मकं सिन्दूरादिना लिखितं लेखितं वा यन्त्रं धातुमयं वा निवेश्य—

श्री गणेशयन्त्रस्य प्राणाः इह प्राणाः श्रीगणेशयन्त्रस्य जीव इह स्थितः श्री गणेशयन्त्रस्य सर्वेन्द्रियाणि श्री गणेशयन्त्रस्य वाङ्मनः- प्राणाः इह अयान्तु स्वाहा ॥ इति मन्त्रेण प्राणप्रतिष्ठां विदध्यात् ॥

पीठशक्तिपूजा

तस्य त्रिकोणे स्वाग्रादि प्रादक्षिण्येन परितो मध्ये च क्रमेण-

श्रीं ह्रीं क्लीं तीव्रायै नमः ॥ श्रीं ह्रीं क्लीं उग्रायै नमः ॥

३ ज्वालिन्यै नमः ॥ ३ तेजोवत्यै नमः ॥

३ नन्दायै नमः ॥ ३ सत्यायै नमः ॥

३ भोगदायै नमः ॥ ३ विघ्ननाशिन्यै नमः ॥

३ कामरूपिण्यै नमः ॥ ३ सर्वशक्तिकमलासनायै नमः ॥

इति नवगणेशपीठशक्तिरभ्यर्च्य ॥

धर्माद्यष्टकपूजा

तत्रैव आग्नेय्यादि विदिक्षु प्रागाद्यासु च दिक्षु क्रमेण—

श्रीं ह्रीं क्लीं ॠं धर्माय नमः ॥ श्रीं ह्रीं क्लीं ॠं अधर्माय नमः ॥

३ ॠं ज्ञानाय नमः ॥ ३ ॠं अज्ञानाय नमः ॥

३ लुं वैराग्याय नमः ॥ ३ लुं अवैराग्याय नमः ॥

३ लूं ऐश्वर्याय नमः ॥ ३ लूं अनैश्वर्याय नमः ॥

इति अर्चयेत् ॥

अन्तर्याग:

द्वादशान्ते सहस्रदलकमलकर्णिकामध्ये निविष्टगुरुचरणयुगल-विगलदमृतरसविसरपरिप्लुताखिलाङ्गो हृदयकमलमध्ये ज्वलन्तमुद्यद-रुणकोटिपाटलमशेषदोषनिर्वेषभूतमनेकपाननं पुर्यष्टकाकारं साङ्गं

सावरणम् भक्तानुग्रहार्थं तेजोरूपेण परिणतं प्रापय्य ब्रह्मरन्ध्रं, वहन्नासापुटेन निर्गमय्य त्रिखंडमुद्रामण्डितशिखण्डे कुसुमाञ्जलौ हस्ते समानीय—

ऐक्षवे जलधौ द्वीपे नवरत्नमये शुभे ।
तत्तरंगोल्लसत्तोये धौते शीततलेऽमले ॥ १ ॥

तत्तोयकणसंपृक्तगंधवाहनिषेविते ।
कल्पपादपसंशोभिभूभागसमलंकृते ॥ २ ॥

नानाकुसुमसंकीर्णे नानापक्षिविराजिते ।
अनेकफलसंकीर्णे सेवितेचाप्सरोगणैः ॥ ३ ॥

उद्यद्बालातपोद्योतिचंद्रज्योत्स्नासमाकुले ।
विलसत्पद्मरागौघकुट्टिमारुणभूतले ॥ ४ ॥

कल्पपादपपुष्पस्थषट्पदस्वनमञ्जुले ।
पारिजातं कल्पतरुं तस्य मध्ये विचिंतयेत् ॥ ५ ॥

युगपदृतुषट्केन सेवितं पुष्पशोभितम् ।
नवरत्नमयं तस्याऽधस्तात् सिंहासनं स्मरेत् ॥ ६ ॥

तन्मध्ये लिपिपद्मं च षडस्रं तस्य मध्यतः ।
कर्णिकायां त्रिकोणं च तत्संस्थं च महागणम् ॥ ७ ॥

नानारत्नविभूषाढ्यं एकदन्तं गजाननम् ।
बीजापूरगदाचापशूलचक्राम्बुजान्यपि ॥ ८ ॥

पाशोत्पले च व्रीह्यग्रं स्वदन्तं रत्नपात्रकम् ।
धारयन्तं दशभुजै भक्ताभीष्टप्रदायकम् ॥ ९ ॥

सर्वाङ्गभूषोज्वलया पद्मसंशोभिहस्तया ।
आश्लिष्टवामपार्श्वं च देव्या वल्लभया सदा ॥ १० ॥

विघ्नेशं विघ्नहर्तारं फुल्लपद्माभविग्रहम् ।
पुष्करोद्धृतरत्नौघमयकुंभमुखस्नुतान् ॥ ११ ॥

मणिमुक्ताप्रवालादीन् वर्षन्तं धारयामुहुः ॥
सर्वतः साधकस्याग्रे स्वदानजललोलुपान् ॥ १२ ॥

षट्पदाळीन् कर्णतालैः वारयन्तं मुहुर्मुहुः ।
अमरासुरसंसेव्यं सद्रत्नमुकुटोज्वलन् ॥ १३ ॥

उरूदरं गजमुखं नानाभरणभूषितम् ।
इति ध्यात्वा गणपतिं यजेत् सर्वोपचारकैः ॥ १४ ॥

बीजापूरगदेक्षुकार्मुकरुजा चक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः ।
ध्येयो वल्लभया सपद्मकरयाश्लिष्टोज्ज्वलद्भूषया
विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नेश इष्टार्थदः ॥ १४ ॥

इति ध्यात्वा, गणानांत्वेति मन्त्रेण मूलमन्त्रेण च अस्मिन् यन्त्रे बिम्बे वा श्री सिद्धलक्ष्मीसहित श्री महागणपतिं साङ्गम् सपरिवारं सावरणं आवाहयामि नमः ॥

श्रीं ह्रीं क्लीं मूलं आवाहितो भव ॥
३ मूलं संस्थापितो भव ॥
३ मूलं सन्निधापितो भव ॥
३ मूलं संनिरुद्धो भव ॥

श्रीं ह्रीं क्लीं मूलं सम्मुखो भव ॥
३ मूलं अवकुण्ठितो भव ॥
३ मूलं सुप्रसन्नो भव ॥
३ मूलं वरदो भव ॥

स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकं । तावत्त्वं प्रीति भावेन बिंबेस्मिन् (यन्त्रेस्मिन्) सन्निधिं कुरु ॥ इति मन्त्रैरावाहनादि षण्मुद्राः प्रदर्श्य, वंदनधेनुयोनिमुद्राश्च प्रदर्शयेत् । अथ हृदयादि षडङ्गमुद्राः प्रदर्शयेत् ॥

महागणपतिप्रियपाशादि सप्तमुद्राः प्रदर्शयेत् ॥

अथ षोडशोपचारपूजा

श्रीसिद्धलक्ष्मीसहित श्रीमहागणपतिदेवतायाः षोडशोपचाराना-चरेत् ।

श्रीं ह्रीं क्लीं श्रीसिद्धलक्ष्मीसहित श्रीमहागणपतये
पाद्यं कल्पयामि नमः ॥
३ ,, ,, अर्घ्यं ,, ,, ॥
३ ,, ,, आचमनीयं ,, ,, ॥
३ ,, ,, *स्नानं ,, ,, ॥

---

*स्नानसमये दुग्ध पञ्चामृत मधु फलरसादिना आभिषिञ्चेत् रुद्र चमक पुरुषसूक्त गणपत्युपनिषद् गणपतिगायन्त्र्यादि वेदमन्त्रान् उच्चरेत् ।

श्रीं ह्रीं क्लीं श्रीसिद्धलक्ष्मीसहित श्रीमहागणपतये

पुष्पम् कल्पयामि नमः ॥

३	,,	,,	वस्त्रोत्तरीयं	,,	,,	॥
३	,,	,,	भूषणम्	,,	,,	॥
३	,,	,,	गंधम्	,,	,,	॥
३	,,	,,	धूपम्	,,	,,	॥
३	,,	,,	दीपम्	,,	,,	॥
३	,,	,,	नैवेद्यं	,,	,,	॥
३	,,	,,	ताम्बूलम्	,,	,,	॥
३	,,	,,	नीराजनम्	,,	,,	॥
३	,,	,,	प्रदक्षिणाम्	,,	,,	॥
३	,,	,,	नमस्कारान्	,,	,,	॥

श्रीं ह्रीं क्लीं दन्त पाश अङ्कुश विघ्न परशु लड्डुक बीजापूराह्वयाः सप्तमुद्राः गणेशस्य प्रियामताः ॥

इति सप्तमुद्राः प्रदर्शयेत् ॥

चतुरायतनपूजा


विष्णु-शिव-सूर्य-देव्याह्वयाः चतुरायतनदेवताः ।
ईशान-आग्नेय-नैर्ऋत-वायव्येषु तत्तन्मूलमन्त्रेण यजेत् ॥



गणपति पंञ्चायतनम्

GANAPATI PANCHAYATANAM

श्रीमहागणपति चक्रम्




महागणपतितर्पणम् ।

ततो मूलान्ते श्रीमहागणपति श्रीपादुकां पूजयामीति वामकर-तत्त्वमुद्रया सन्दष्ट द्वितीयशकलगृहीत क्षीरबिन्दुं दक्षकरोपात्त कुसुमयुगपत्प्रक्षेपेण देवं दशवारं उपतर्पयेत् । तत्त्वमुद्रा उत्तरत्रापि साधारणी ।

श्रीं ह्रीं क्लीं मूलं श्रीसिद्धलक्ष्मीसहित श्रीमहागणति श्रीपादुकां पूजयामि तर्पयामि नमः । इति दशवारं सन्तर्पयेत् ।।

षडङ्गपूजा



ततो देवस्याङ्गे अग्नीशासुरवायुकोणेषु मौळौ दिक्षु च—

1 श्रीं ह्रीं क्लीं ओं गां हृदयाय नमः । हृदयशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः ।।

2 ३ श्रीं गीं शिरसे स्वाहा । शिरश्शक्तिश्रीपदुकां पू० त० नमः ।।


3 ३ ह्रीं गूं शिखायै वषट् । शिखाशक्ति ,, ,, ,, ,, ।

4 श्रीं ह्रीं क्लीं गैं कवचाय हुं । कवचशक्ति
श्रीपादुकां पू० त० नमः ॥
5 ३ ग्लौं गौं नेत्रत्रयाय वौषट् । नेत्रशक्ति ,, ,, ,, ,, ॥
6 ३ गं गः अस्त्राय फट् । अस्त्रशक्ति ,, ,, ,, ,, ॥

गुरुमण्डलार्चनम्।

देवस्य पश्चात् प्रागपवर्गरेखात्रये दक्षिणसंस्थाक्रमेण गुर्वोघत्रयं यजेत् ॥ यथा—

दिव्यौघः १



श्रीं ह्रीं क्लीं विनायकसिद्धाचार्य श्रीपादुकां पूजयामि तर्पयामि नमः ॥
३ कवीश्वरसिद्धाचार्य ,, ,, ,, ,, ॥
३ विरूपाक्षसिद्धाचार्य ,, ,, ,, ,, ॥
३ विश्वसिद्धाचार्य ,, ,, ,, ,, ॥
३ ब्रह्मण्यसिद्धाचार्य ,, ,, ,, ,, ॥
३ निधीशसिद्धाचार्य ,, ,, ,, ,, ॥

सिद्धौघः २

श्रीं ह्रीं क्लीं	गजाधिराजसिद्धाचार्य	श्रीपादुकां	पू०	त०	नमः	॥
३	वरप्रदसिद्धाचार्य	,,	,,	,,	,,	॥

मानवौघः ३

३	विजयसिद्धाचार्य	श्रीपादुकां	पू०	त०	नमः	॥
३	दुर्जयसिद्धाचार्य	,,	,,	,,	,,	॥
३	जयसिद्धाचार्य	,,	,,	,,	,,	॥
३	दुःखारिसिद्धाचार्य	,,	,,	,,	,,	॥
३	सुखावहसिद्धाचार्य	,,	,,	,,	,,	॥
३	परमात्मसिद्धाचार्य	,,	,,	,,	,,	॥
३	सर्वभूतात्मसिद्धाचर्य	,,	,,	,,	,,	॥
३	महानन्दसिद्धाचार्य	,,	,,	,,	,,	॥
३	फालचन्द्रासिद्धाचार्य	,,	,,	,,	,,	॥
३	सद्योजातसिद्धाचार्य	,,	,,	,,	,,	॥
३	बुद्धसिद्धाचार्य	,,	,,	,,	,,	॥
३	शूरसिद्धाचार्य	,,	,,	,,	,,	॥


ततः परमेष्ठिगुरुमंत्रेण परमेष्ठिगुरुं, परमगुरुमन्त्रेण परमगुरुं, स्वगुरुमन्त्रेण स्वगुरुं च यजेत् ॥

॥ आवरणदेवताध्यानम् ॥

त्रिकोणबाह्ये पूर्वादिचतुर्दिक्षु समर्चयेत्
अग्रस्थबिल्ववृक्षाध: श्रियं श्रीपतिमर्चयेत्
पद्मायुधधरा पद्मा शङ्खचक्रधरो हरिः
दक्षिणे वटवृक्षाधः गौरीं गौरीपतिं यजेत्
पाशाङ्कुशधरा गौरी टङ्कशूलधरो हरः
पश्चिमे पिप्पलस्याधो रतिं रतिपतिं यजेत्
रतिरुत्पलहस्ताढ्या कोदण्डास्त्रधरः स्मरः
सौम्ये प्रियङ्गुवृक्षाधः महापोत्रिणमर्चयेत्
शुकव्रीह्यग्रहस्ताभूर्गदाचक्रधर: पतिः
षट्कोणेषु च संपूज्या: आमोदाद्या: प्रियान्विताः
आमोदं सिद्धिसहितमग्रकोणे प्रपूजयेत्
समृद्धया युक्तमभ्यर्च्य प्रमोदं वह्निकोणके
सुमुखं कान्तिसंयुक्तमीशकोणे समर्चयेत्
दुर्मुखं मदनावत्या यजेद्वरुणकोणके
विघ्नं मदद्रवायुक्त कोणे नैशाचरे यजेत्
वायव्ये विघ्नकर्तारं द्राविण्या सह संयजेत्
पाशाङ्कुशाभयाऽभीष्टधारिणोऽरुणविग्रहा:
गण्डभित्तिगळद्दानपूरधौतमुखाम्बुजा:
विघ्नास्तत्प्रमदास्सर्वाः मदाघूर्णितलोचना:
एकहस्तधृताम्भोजाः इतरालिङ्गितप्रिया.

षट्कोणपार्श्वयोः पूज्यौ शङ्खपद्मनिधी क्रमात्
निजप्रियाभ्यां सहितौ सर्वाभरणभूषितौ
केसरेष्वङ्गपूजा स्यात् ब्राह्म्याद्याः पत्रमध्यगाः
बहिर्लोकेश्वराः पूज्याः वज्रादीनि यथाक्रमम्

प्रथमावरणम्



त्र्यश्रषडश्रयोरन्तराळे प्रागादिदिक्षु क्रमेणे—

1. श्रीं ह्रीं क्लीं श्रीश्रीपतिश्रीपादुकां पूजयामि तर्पयामि नमः ॥
2. ३ गिरिजागिरिजापति ,, ,, ,, ,, ॥
3. ३ रतिरतिपति ,, ,, ,, ,, ॥
4. ३ महीमहीपति ,, ,, ,, ,, ॥


एताः प्रथमावरणदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः सर्वोपचारैः संपूजिताः संतर्पिताः सन्तुष्टाः सन्तु नमः। इति पुष्पं दत्वा। मूलेन देवं त्रिः संतर्प्य, पञ्चोपचारं कृत्वा।

श्रीं ह्रीं क्लीं अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इति समान्यार्घ्योदकेन देवताहस्ते पूजां समर्प्य

अनेन प्रथमावरणार्चनेन भगवान् श्रीमहागणपतिः प्रीयताम् ।
इति योनिमुद्रया प्रणमेत् ॥

द्वितीयावरणम्



षडश्रे देवाग्रकोणमारभ्य प्रादक्षिण्येन तद्बहिर्वामपार्श्वयोश्च क्रमेण यजेत्—

1. श्रीं ह्रीं क्लीं ऋद्धयामोद श्रीपादुकां पू० त० नमः ॥
2. ३ समृद्धिप्रमोद ,, ,, ,, ,, ॥
3. ३ कान्तिसुमुख ,, ,, ,, ,, ॥
4. ३ मदनावतीदुर्मुख ,, ,, ,, ,, ॥
5. ३ मदद्रवाऽविघ्न ,, ,, ,, ,, ॥

6. श्रीं ह्रीं क्लीं द्राविणीविघ्नकर्तृ श्रीपादुकां पू० त० नमः ॥
7. ३ वसुधाराशङ्खनिधि ,, ,, ,, ,, ॥
8. ३ वसुमतीपद्मनिधि ,, ,, ,, ,, ॥


एताः द्वितीयावरणदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः । इति पुष्पं दत्वा । मूलेन देवं त्रिः सन्तर्प्य, पञ्चोपचारं कृत्वा ।

श्री ह्रीं क्लीं अभीष्टसिद्धिं मे देहि शरणागत वत्सल ।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥

इति सामान्यार्घ्योदकेन देवताहस्ते पूजां समर्प्य—

अनेन द्वितीयावरणार्चनेन भगवान् श्रीमहागणपतिः प्रीयताम् । इति योनिमुद्रया प्रणमेत् ॥

तृतीयावरणम्



षडश्रसन्धिषट्के प्राग्वत् षडङ्गदेवताऽर्चनम् ।—


1	श्रीं ह्रीं क्लीं	ओं	गां	हृदयशक्तिश्रीपादुकां	पू०	त०	नमः	॥
2	३	श्रीं	गीं	शिरश्शक्ति	,,	,,	,,	,, ॥
3	३	ह्रीं	गूं	शिखाशक्ति	,,	,,	,,	,, ॥
4	३	क्लीं	गैं	कवचशक्ति	,,	,,	,,	,, ॥
5	३	ग्लौं	गौं	नेत्रशक्ति	,,	,,	,,	,, ॥
6	३	गं	गः	अस्त्रशक्ति	,,	,,	,,	,, ॥

एताः तृतीयावरणदेवताः सांगाः सपरिवाराः सायुधाः सशक्तिकाः सर्वोपचारैः संपूजिताः संतर्पिताः संतुष्टाः सन्तु नमः । इति पुष्पं दत्वा । मूलेन देवं त्रिः संतर्प्य । पंचोपचारं कृत्वा ।

श्रीं ह्रीं क्लीं अभीष्टसिद्धिं.............तृतीयावरणार्चनम् ॥ इति सामान्यार्घ्योदकेन देवताहस्ते पूजां समर्प्य—

अनेन तृतीयावरणार्चनेन भगवान श्रीमहागणपतिः प्रीयताम् । इति योनिमुद्रया प्रणमेत् ॥

तुरीयावरणम्



अष्टदळे पश्चिमादि दिक्षु वायव्यादि विदिक्षु च प्रादक्षिण्य क्रमेण—


1	श्रीं ह्रीं क्लीं	आं	ब्राह्मीश्रीपादुकां	पू०	त०	नमः	॥
2	३	ईं	माहेश्वरी	,,	,,	,,	,,	॥
3	३	ऊं	कौमारी	,,	,,	,,	,,	॥
4	३	ॠं	वैष्णवी	,,	,,	,,	,,	॥
5	३	लुं	वाराहीश्रीपादुकां	पू०	त०	नमः	॥
6	३	ऐं	माहेन्द्री	,,	,,	,,	,,	॥
7	३	औं	चामुण्डा	,,	,,	,,	,,	॥
8	३	अः	महालक्ष्मी	,,	,,	,,	,,	॥

गता: तुरीयावरणदेवता: साङ्गा: सपरिवारा: सायुधा: सशक्तिका: सर्वोपचारैः संपूजिता: सन्तर्पिता: सन्तुष्टा: सन्तु नमः ।। इति पुष्पं दत्वा ।। मूलेन देवं त्रिः सन्तर्प्य । पञ्चोपचारं कृत्वा

श्रीं ह्रीं क्लीं अभीष्ट..............तुरीयावरणार्चनम् । इति सामान्यार्घ्योर्केन देवताहस्ते पूजां समर्प्य—

अनेन तुरीयावरणार्चनेन भगवान् श्रीमहागणपतिः प्रीयताम् । इति योनिमुद्रया प्रणमेत् ।।

पञ्चमावरणम् ।



अथ चतुरश्रस्य रेखायां प्रागाद्यासु अष्टसु दिक्षु क्रमेण—

श्रीं ह्रीं क्लीं लां इन्द्राय वज्रहस्ताय सुराधिपतये ऐरावतवाहनाय सपरिवाराय नमः इन्द्रश्रीपादुकां पूजयामि तर्पयामि नमः।।

३ रां अग्नये शक्तिहस्ताय तेजोधिपतये अजवाहनाय सपरिवाराय नमः अग्निश्रीपादुकां पू० त० नमः ।।

श्रीं ह्रीं क्लीं टां यमाय दण्डहस्ताय प्रेताधिपतये महिषवाहनाय
सपरिवाराय नमः यमश्रीपादुकां पू० त० नमः ॥
३ क्षां निर्ऋतये खड्गहस्ताय रक्षोऽधिपतये नरवाहनाय
सपरिवाराय नमः निर्ऋतिश्रीपादुकां पू० त० नमः ॥
३ वां वरुणाय पाशहस्ताय जलाधिपतये मकरवाहनाय
सपरिवाराय नमः वरुणश्रीपादुकां पू० त० नमः ॥
३ यां वायवे ध्वजहस्ताय प्राणाधिपतये रुरुवाहनाय
सपरिवाराय नमः वायुश्रीपादुकां पू० त० नमः ॥
३ सां सोमाय शङ्खहस्ताय नक्षत्राधिपतये अश्ववाहनाय
सपरिवाराय नमः सोमश्रीपादुकां पू० त० नमः ॥
३ हां ईशानाय त्रिशूलहस्ताय विद्यऽधिपतये वृषभवाहनाय
सपरिवाराय नमः ईशानश्रीपादुकां पू० त० नमः ॥

एताः पञ्चोमावरणदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः सर्वोपचारैः संपूजिताः सन्तर्पिताः सन्तुष्टाः सन्तु नमः इति पुष्पं दत्वा । मूलेन देवं त्रिः सन्तर्प्य । पञ्चोपचारं कृत्वा ।

श्री ह्रीं क्लीं अभीष्टसिद्धिं मे देहि शरणागतवत्सल ।
भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥

इति सामान्यार्घ्योदकेन देवताहस्ते पूजां समर्प्य—

अनेन पञ्चमावरणार्चनेन भगवान् श्रीमहागणपतिः प्रीयताम् ।
इति योनिमुद्रया प्रणमेत् ॥

पनः मूलेन दशवारं सन्तर्पयेत

श्रीं ह्रीं क्लीं मूलं श्रीसिद्धलक्ष्मीसहित श्रीमहागणपति श्रीपदुकां पू० त० नमः ॥ इति दशवारं सन्तर्पयेत् ॥

षोडशनामार्चनम्

1	श्रीं ह्रीं क्लीं	सुमुखाय	नमः ॥
2	३	एकदन्ताय	नमः ॥
3	३	कपिलाय	नमः ॥
4	३	गजकर्णकाय	नमः ॥
5	३	लम्बोदराय	नमः ॥
6	३	विकटाय	नमः ॥
7	३	विघ्नराजाय	नमः ॥
8	३	गणाधिपाय	नमः ॥
9	३	धूमकेतवे	नमः ॥
10	३	गणाध्यक्षाय	नमः ॥
11	३	फालचन्द्राय	नमः ॥
12	३	गजाननाय	नमः ॥
13	३	वक्रतुण्डाय	नमः ॥
14	३	शूर्पकर्णाय	नमः ॥
15	३	हेरम्बाय	नमः ॥
16	३	स्कन्दपूर्वजाय	नमः ॥

श्रीं ह्रीं क्लीं श्रीमहागणपतये नमः ।। नानाविधपरिमलपत्र पुष्पाणि दूर्वादीनिच समर्पयामि ।। अथ यथावकाशं सहस्रनामादिना अर्चनं कुर्यात् ।।

धूपः

श्रीं ह्रीं क्लीं धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्व यं वयं धूर्वामस्त्वं देवानामसि सस्नितमं प्रप्रितमं जुष्टतमं वह्नितमं देवहूतममन्हुतमसि हविर्धानं दृँहस्व माह्वार्मित्रस्यत्वा चक्षुषा प्रेक्षे माभेर्मा संविक्था मात्वा हिँसिषम् ।।

३ श्रीसिद्धलक्ष्मीसहित श्रीमहागणतये नमः धूपमाघ्रापयामि । धूपानन्तरं आचमनीयं समर्पयामि ।।

।। दीपः ।।

श्रीं ह्रीं क्लीं उद्दीप्यस्व जातवेदोपघ्नन्निर्ऋतिं मम । पशूँश्च मह्यमावह जीवनं च दिशोदिश । मानो हिँसीर्जातवेदो गामश्वं पुरुषं जगत् । अबिभ्रदग्न आगहि श्रिया मा परिपातय ।।

३ श्रीसिद्धलक्ष्मीसहित श्रीमहागणपतये नमः दीपं दर्शयामि । दीपानन्तरं आचमनीयं समर्पयामि ।।

ततः– दन्त-पाश-अङ्कुश-विघ्न-परशु लड्डुक बीजापूराख्याः सप्तमुद्राः प्रदर्शयेत् ।।

।। नैवेद्यम् ।।

श्रीदेवाग्रे, चतुरश्रमण्डलं, सामान्यार्घ्योदकेन विधाय, तत्र आधारोपरि स्थापितं, सौवर्ण रौप्य कांस्यादि स्थाली चषकभरितं भक्ष्य भोज्य चोष्यलेह्यपेयात्मकं रसवद्यज्वनमञ्जुलं प्राज्यकपिलाज्यं दधिदुग्धमुग्धं यथासंभव वा नैवेद्यं निधाय-मूलेन निरीक्ष्य—

श्रीं ह्रीं क्लीं ऐं ह्लं— इति अस्त्रेण प्रोक्ष्य—

३ ओं जुं मः वौषट्-इति सप्तवारमभिमन्त्रित जलेन प्रोक्ष्य—

३ चक्रमुद्रां प्रदर्श्य—

३ यं—इति वायुबीजेनाधोमुखवामकरेण सप्तवारम् जपन् तद्गत दोषान् संशोष्य—

३ रं—इति वह्निबीजेन अधोमुखदक्षकरेण संदह्य—

३ वं—इति धेनुमुद्रया अमृतीकृत्य—

३ मूलेन विशेषार्घ्यबिन्दुभिः प्रोक्ष्य—

३ मूलेन सप्तवारमभिमन्त्र्य—

३ ओं क्लीं कामदुधे अमोधे वरदे विच्चे स्फुरस्फुर श्रीं—

परश्रीं इति कामधेनुविद्यया धेनुमुद्रयाऽमृतीकृत्य देवस्य पाद्यं अर्घ्यं आचमनीयं च दत्वा—

३ मूलेन देवं त्रिः सन्तर्प्य—

पात्रान्तरे विशेषार्घ्यं किंचित् गृहीत्वा वामाङ्गुष्ठेन नैवेद्य-पात्रं स्पृशन्—

३ मूलम् साङ्गाय सपरिवाराय सशक्तये श्रीसिद्धलक्ष्मीसहित-श्रीमहागणपतये नैवेद्यं कल्पयामि नमः– इति नैवेद्य -परिसरे संस्थाप्य । कृताञ्जलिः—

३ हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतम् ।

पञ्चधा षड्रसोपेतं गृहाण परमेश्वर ॥

शर्करापायसापूपघृतव्यञ्जनसंयुतम् ।

विचित्ररुचि नैवेद्यं हृद्यमावेदयाम्यहम् ॥ इति निवेद्य—

ओं भूर्भुवस्सुवः + परिषिञ्चामि । अमृतोपस्तरणमसि– इति देवतायै आपोशनं दत्वा—वामकरेण ग्रासमुद्रां प्रदर्श्य, दक्षकरेण प्राणादिपञ्चमुद्राप्रदर्शनपूर्वकं पञ्चप्राणाहुतीः कल्पयेत् । यथा—

श्रीं ह्रीं क्लीं प्रणायस्वाहा ॥ श्रीं ह्रीं क्लीं उदानायस्वाहा ॥

३ अपानायस्वाहा ॥ ३ समानायस्वाहा ॥

३ व्यानायस्वाहा ॥ ३ ब्रह्मणेस्वाहा ॥

श्रीं ह्रीं क्लीं ओं गं आत्मतत्त्वव्यापकः श्रीसिद्धलक्ष्मीसहित–श्रीमहागणपतिस्तृप्यतु ॥

३ ओं गं विद्यातत्त्वव्यापकः ,, ,,

३ ओं गं शिवतत्त्वव्यापकः ,, ,,

३ ओं गं सर्वतत्त्वव्यापकः ,, ,,

इति किंचित्किंचित् सामान्यार्घ्योदकं दद्यात् ।

श्रीं ह्रीं क्लीं चित्पात्रे सद्धविस्सौख्यं विविधानेकभक्षणम् ।

निवेदयामि ते देव सानुगस्त्वं जुषाण तत् ॥

श्र ह्रीं क्लीं मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । मधुनक्तमुतोपसि मधुमत्पार्थिवँ रजः । मधुद्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । इति पुष्पाञ्जलिं विन्यस्य नैवेद्यजातं तादात्म्येन समर्पयेत् ।

श्रीं ह्रीं क्लीं नमस्ते देवदेवेश सर्वतृप्तिकरं परम् ।

अन्यानिवेदितं शुद्धं प्रकृतिस्थं सुशीतलम् ॥

अमृतानन्दसंपूर्णं गृहाण जलमुत्तमम् ॥

३ श्रीसिद्धलक्ष्मीसहित श्रीमहागणपतेः अमृतपानीयं समर्पयामि ।

देवं भुक्तवन्तं सुतृप्तं ध्यात्वा

ओं अमृतापिधानमसि इत्युत्तरापोशनं दत्वा–

श्रीं ह्रीं क्लीं हस्तप्रक्षालनं, गण्डूषं, पादप्रक्षालनं, आचमनीयं, । कल्पायमि नमः । ताम्रबलिपात्रे निवेदनसामग्रीः किंचित्किंचिदादाय निवेदनपात्राणि निर्गमय्य तत्स्थलं अस्त्रेण शोधयेत् ।

ताम्बूलम्

श्रीं ह्रीं क्लीं वनस्पतिदैवत्याय ताम्बूलाय नमः । इति सामान्यार्घ्योदकेन प्रोक्ष्य–

श्रीं ह्रीं क्लीं तमालदलकर्पूरपूगभागसमन्वितम् ॥

एलापत्रसुसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

३ श्रीसिद्धलक्ष्मीसहितश्रीमहागणपतये ताम्बूलं कल्पयामि नमः ॥

कुलदीपः ।

३ मूलम्– अन्तस्तेजो बहिस्तेज एकीकृत्यामितप्रभम् ।
त्रिधा दीपं परिभ्राम्य कुलदीपं निवेदये ॥

कर्पूरनीराजनम् ।

श्रीं ह्रीं क्लीं सोमोवा एतस्य राज्यमादत्ते । यो राजा सम्राज्यो वा सोमेन यजते । देवसुवामेतानि हवीँषि भवन्ति । एतावन्तो वै देवानाँ सवाः । त एवास्मै सवान् प्रयच्छन्ति । त एनं पुनः सुवन्ते राज्याय । देवसू राजा भवति ॥

श्रीं ह्रीं क्लीं साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठकं राज्यं महाराज्यमाधिपत्यम् न तत्रसूर्योभाति न चंद्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्व मिदं विभाति ।

राजाधिराजाय प्रसह्य साहिने । नमो वयं वैश्रवणाय कुर्महे । समे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः ॥ महागणपतये नमः कर्पूरनीराजनं प्रदर्शयामि ॥

मन्त्रपुष्पम् ॥

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति । चन्द्रमा वा अपां पुष्पम् । पुष्पवान प्रजावान् पशुमान् भवति ।

श्रीं ह्रीं क्लीं ओं तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥

श्रीं ह्रीं क्लीं नमो नरगजाकृते नलिनवर्णदेहाकृते
नरासुरसुरेडित श्रुतिशिरोद्यदङ्घ्रिद्वय ।

नगेश्वरवरात्मजानयनपद्मभानो नमः
नतार्तिहरणाङ्घ्रियुक् कलित एष पुष्पाञ्जलिः ॥

श्रीं ह्रीं क्लीं श्रीसिद्धलक्ष्मीसहितश्रीमहागणपतये नमः ॥ पुष्पाञ्जलिं समर्पयामि ॥

अत्र गणेशनित्य होमं तान्त्रिक विधानेन वा वैदिक पद्धत्याँ वा यथावकाशं कुर्यात ।

1. तान्त्रिक नित्यहोमम् :—

साधकः स्वस्तिपद्मं विरच्य तस्मिन गणेशं साङ्ग सावरणं षोडशोपचारैः संपूज्य तदुत्तरतः लौकिकाग्निम् प्रतिष्ठाप्य तस्मिन्नग्नौ साङ्ग सावरणं गणपतिं संपूज्य, अष्टद्रव्यैः मध्वाज्यमिश्रितैः ग्रासमितैः त्रिसंख्यं पंचसंख्यं वा हुनेत। इयं होमविधिः विस्तृतया अन्यत्र वर्तते । दृष्ट्वा आचरणीयम्

2. गणपति होमविधानम् (वैदिकम्)

विस्तरेतु गुरूपदिष्टमार्गेण
चतुष्पात्रं वा षट्पात्रप्रयोगेण होमः कर्तव्यः ।
इदं होमविधानं विस्तरेण अन्यत्र लिखितम् ।
दृष्स्वा आचरणीयम् ।
तत्पश्चात् बलिदानात् विशेषार्घ्योद्वासन
पर्यन्तं कृत्वा पूजा समाप्तिः कुर्यात् ।

बलिदानम्

देवतादक्षभागे सामान्यार्घ्योदकेन वृत्तचतुरश्रात्मकं मण्डलं परिकल्प्य श्रीं ह्रीं क्लीं ऐं व्यापकमण्डलाय नमः । इति गन्धाक्षतैरभ्यर्च्य अर्धभक्तपूरितोदकं सक्षीरादित्रयं बलिपात्रं तत्र विन्यस्य—

श्रीं ह्रीं क्लीं ओं गां गीं गूं गैं गौं गः महागणपतये वरवरद-सर्वजनं मे वशमानय सर्वोपचारसहितं इमं बलिं गृह्ण गृह्ण स्वाहा । इत्युच्चरन् । बलिपात्रे सामान्यार्घ्योदकं विसृजेत् । ततः पादौ प्रक्षाल्य आचम्य त्रिः प्रदक्षिणनमस्कारान् कृत्वा यथाशक्त मूलमन्त्र जपमाचरेत् । उत्तराङ्गं विधाय—

गुह्यातिगुह्यगोप्ता त्व गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्मयि स्थिरा ॥

इति देवस्य हस्ते जपं समर्पयेत् ॥

॥ गणेशाष्टकम् ॥

ओं विनायकैकभावनासमर्चनासमर्पितं,
प्रमोदकैः प्रमोदकैः प्रमोदमोदमोदकम् ।
यदर्पितं समर्पितं नवन्यधान्यनिर्मितं,
नखण्डितं नखण्डितं नखण्डमण्डनं कृतम् ॥ १

सजातिकृद्विजातिकृत्स्वनिष्ठभेदवर्जितं
निरञ्जनं च निर्गुणं निराकृतिं च निष्क्रियम् ।
सदात्मकं चिदात्मकं सुखात्मकं परं पदं
भजामि तं गजाननं स्वमाययाऽऽत्तविग्रहम् ॥ २

गणाधिप त्वमष्टमूर्तिरीशसूनुरीश्वरः

त्वमम्बरं च शम्बरं धनञ्जयः प्रभञ्जनः ।

त्वमेव दीक्षितः क्षितिर्निशाकरः प्रभाकरः

चराचरप्रचारहेतुरन्तरायशान्तिकृत् ॥ ३

अनेकदं तमालनीलमेकदन्तसुन्दरं

गजाननं नुमो गजाननामृताब्धिमन्दिरम् ।

समस्तवेदवादसत्कलापमन्दिरं

महान्तरायदुस्तमशमार्कमाश्रितोदरम् ॥ ४

सरत्नहेमधण्टिकानिनादनूपुरस्वनैः

मृदङ्गताळनादभेदसाधनानुरूपतः ।

धिमिद्धिमित्ततोऽङ्गतोङ्ग थेयिथेयिशब्दतो-

विनायकश्शशाङ्कशेखराग्रतः प्रणुत्यति ॥ ५

नमामि नाकनायकैकनायकं

कलाकलापकल्पनानिदानमादिपूरुषम् ।

गणेश्वरं गुणेश्वरं महेश्वरात्मसम्भवं

स्वपाजमूलसेविनामपारवैभवप्रदम् ॥ ६

भजे प्रचण्डतुन्दिलं सदन्तशूकभूषणं

सनन्दनादिवन्दितं समस्तसिद्धसेवितम्

सुरासुरौघयोस्सदा जयप्रदं जयप्रदं

समस्तविघ्नधातिनं स्वभक्तपक्षपातिनम् ॥ ७

करामबुजातकङ्कणःपदाब्जकिङ्किणीगणो
गणेश्वरो गुणार्णव फणीश्वराङ्गभूषणः ।
जगत्त्रयान्तरायशान्तिकारकऽस्तु तारको
भवार्णवादनेकदुर्ग्रहाच्छिदेकविग्रहः ॥ ८

यो भक्तिप्रवणः परावरगुरोस्स्तोत्रं गणेशाष्टकं
शुद्धस्संयतचेतसा यदि पठेन्नित्यं त्रिसन्ध्यं पुमान् ।
तस्य श्रीरतुला स्वसिद्धिसहिता श्रीशारदा सारदा
स्यातां तत्परिचारिके किल तदा काः कामनानां कथाः ॥

॥ सुवासिनीपूजा ॥

श्रीं ह्रीं क्लीं प्राङ्निमन्त्रितां सुवासिनीमाहूय तां देवीरूपां विभाव्य ३ ऐं क्लीं सौः सुवासिन्यै अर्घ्यं कल्पयामि नमः । इत्यादि-रीत्या अर्घ्य-आचमन-स्नान-गन्ध-हरिद्राकुङ्कुम-पुष्पधूप-दीप-नैवेद्य-ताम्बुलानि दद्यात् (सति विभवे वसनादीनि च) ॥

॥ वटुकपूजा ॥

श्रीं ह्रीं क्लीं प्राङ्निमन्त्रितवटुकमाहूय तं गणपतिरूपं विभाव्य ३ वं वटुकाय अर्घ्यं कल्पयामि नमः । इत्यादिरीत्या, अर्घ्य-आचमन-स्नान-वस्त्र-यज्ञो-पवीत-गन्ध-पुष्प-धूप-दीप-नैवेद्य-ताम्बूलानि दद्यात् ॥

।। सामयिकपूजा ।।

ततः सन्निहिते गुरौ गुरुं नत्वा गन्धकुङ्कुमादिभिरुपचर्य, गुरु-पदुकामन्त्रेण अभिपूज्य पात्राणि समर्पयेत् । असन्निहिते गुरौ स्वशिरसि गुरुत्रयं यजेत् । सन्निहितान् समयिकानाहूय गन्धिकुङ्कुमादिभिरुपचर्य पात्राणि दद्यात् । पश्चात् तत्त्वशोधनं कुर्यात । सामयिकाश्च पात्रमादाय समस्सतप्रकटेत्यादि समष्टिमन्त्रेण पुष्पाञ्जलिं हत्वा स्वशिरसि गुरुत्रयं, हृदये आत्मचतुष्टयं च इष्टा देवं सन्तर्प्य तत्वशोधनं यथोपदिष्टं कुर्युः ।।

।। तत्त्वशोधनम् ।।

श्रीं ह्रीं क्लीं ओं गं आत्मतत्त्वं शोधयामि स्वाहा ।।
३ ,, ,, विद्यातत्त्वं ,, ,, ।।
३ ,, ,, शिवतत्त्वं ,, ,, ।।
३ ,, ,, सर्वतत्त्वं ,, ,, ।।

।। पूजासमर्पण-देवतोद्वासने ।।

श्रीं ह्रीं क्लीं साधु वाऽसाधु वा कर्म यद्यदाचरितं मया ।
तत्सर्वं कृपया देव गृहाणराधनं मम ।।
३ देवनाथ गुरो स्वामिन् देशिक पूर्णतरां कुरु ।
त्राहि त्रहि कृपासिन्धो पूजां पूर्णतरां कुरु ।।

इति देवतावामहस्ते पूजां समर्प्य शङ्खमुद्धृत्य देवतोपरि त्रि परिभ्राम्य, तज्जलं हस्ते समादाय सामयिकानात्मानं च मूलेन प्रोक्ष्य शङ्खं प्रक्षाल्य निदध्यात् । ततो मूलेन तीर्थनिर्माल्ये स्वीकृत्य,

श्रीं ह्रीं क्लीं ज्ञानतोऽज्ञानतो वापि यन्मयाचरितं विभो ।
तव कृत्यमिति ज्ञात्वा क्षमस्व परमेश्वर ॥

इति क्षमाप्य, सर्वसागावरणदेमतानां देवताङ्गे विलयं विभाव्य खेचरीं बद्ध्वा

श्रीं ह्रीं क्लीं हृत्पद्मकर्णिकामध्ये शक्तया सह गजानन ।
प्रविश त्वं गणेशान सर्वैरावरणैः सह ॥

इति तेजोरूपेण परेणतं देवं पूर्ववत् हृदयं नीत्वा, तत्र च मूर्ति पञ्चोपचारैः सपूज्य पुनः आत्माभिन्नसंविद्रूपेण भावयेत् ॥

॥ शान्तिस्तवः ॥

सम्पूजकानां परिपालकानां यतेन्द्रियाणां च तपोधनानाम् ।
देशस्य राष्टस्य कुलस्य राज्ञां करोतु शन्तिं भगवन् कुशले : ॥
नन्दन्तु साधककुलान्यणिमाऽऽदिसिद्धाः
शापाः पतन्तु समयद्विषि योगिनीनाग् ।
सा शाम्भवी स्फुरतु काऽपि ममाऽप्यवस्था
यस्यां गुरोश्चरणपङ्कजमेव लभ्यम् ॥
शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तम्बसंयुतम् ।
कालाग्न्यादिशिवान्तं च जगद्यज्ञेन तृप्यतु ॥

इत्यादिशान्तिश्लोकान् पठित्वा—

॥ विशेपार्घ्योद्वासनम् ॥

मूलेन विशेषार्घ्यपात्रं आमस्तकमुद्धृत्य तत्क्षीरं पात्रान्तरेण-आदाय ''आर्द्रं ज्वलति'' इति मन्त्रेण आत्मनः कुण्डलिन्यग्नौ हुत्वा

ब्राह्मणान् सुवासिनीश्च भोजयित्वा स्वयमपि भुक्त्वा यथासुखं विहरेत् ॥

॥ इति शिवम् ॥

श्रीगणेशपञ्चरत्नस्तोत्रम् ॥

मुदाकरात्तमोदकं सदाविमुक्तिसाधकम् ॥
कलाधरावतंसकं विलासिलोकरक्षकम् ॥
अनायकैकनायकं विनाशितेभदैत्यकम् ॥
नताशुभाशुनाशकं नमामि तं विनायकम् ॥ १

नतेतरातिभीकरं नवोदितार्कभास्वरम् ॥
नमत्सुरारिनिर्जरं नताधिकापदुद्धरम् ॥
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरम् ॥
महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २

समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरम् ॥
दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ॥
कृपाकरं क्षमाकरं मुदाकरं यशस्करम् ॥
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३

अकिञ्चनार्तिमार्जनं चिरन्तनोक्तिभाजनम् ॥
पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम् ॥
प्रपञ्चनाशभीषणं धनञ्जयादिभूषणम् ॥
कपोलदानवारिणं भजे पुराणवारणम् ॥ ४

अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनं ।।
नितान्तकान्तिदन्तकान्तमन्तकान्तकात्मजम् ।।
हृदन्तरे निरन्तरं वसन्तमेवयोगिनां ।।
तमेकदन्तमेव संविचिन्तयामि सन्ततम् ।। ५

महागणेशपञ्चरत्नमादरेण योऽन्वहम् ।।
प्रजल्पति प्रदोषके हृदिस्मरन् गणेश्वरम् ।।
अरोगतामदोषतां सुसाहितीं सुपुत्रताम् ।।
समाहितायुरष्टभूतिमभ्युपैति सोऽचिरात् ।। ६

श्रीगणेशदुर्गस्तोत्रम् ।।

श्रीकृष्ण उवाच :–

वद शम्भो महानाथ पार्वतीकान्त ईश्वर ।
दैत्यसंग्रामवेलायां स्मरणीयं किमीश्वर ।। १ ।।

ईश्वर उवाच :–

श्रुणु कृष्ण प्रवक्ष्यामि गुह्याद्गुह्यतरं महत् ।
गणेशदुर्गं दिव्यं च श्रृणु वक्ष्यामि भक्तिदम् ।। २ ।।
त्रिपुरञ्जयवेलायां दिव्यदुर्गमहं स्मरन् ।
दिव्यदुर्गप्रसादेन त्रिपुरस्य वधः कृतः ।। ३ ।।

श्रीकृष्ण उवाच :–

हेरम्बस्य दुर्गमिदं वद त्वं भक्तवत्सल ।
श्रृणु कृष्ण प्रवक्ष्यामि दुर्गं वैनायकं शुभम् ।। ४ ।।

ईश्वर उवाच :-

सङ्ग्रामे च श्मशाने च अरण्ये धोरसंङ्कटे ।
राजद्वारे ज्वरे घोरे येनैवं मुच्यते भयात् ॥ ५ ॥

प्राच्यां रक्षतु हेरम्बश्चाग्नेय्यामग्नितेजस: ।
याम्यां लम्बोदरो रक्षेत् नैऋत्यां पार्वतीसुत: ॥
प्रतीच्यां वक्रतुण्डस्तु वायव्यां वरद: प्रभु: ।
उदीच्यां गणपः पातु ईशान्याम् ईशनन्दनः ॥ ६ ॥

एवं दश दिशो रक्षेद् ह्यवरं विघ्ननायक: ।
हेरम्बस्य दुर्गमिदं त्रिकालं यः पठेन्नर: ।
कोटिजन्मकृतं पापं एकावर्तेन नश्यति ॥ ७ ॥

श्रीगणेशकवचम् ॥

अथ श्रीमहागणपतिकवचप्रारम्भः ॥

श्रीदेव्युवाच :-

देव देव महादेव भक्तानुग्रहकारक ।
पूर्वं मे कथिता नाथ मन्त्राणां सप्तकोटयः ॥ १ ॥

इदानीं श्रोतुमिच्छामि कवचं सर्वकामदम् ।
महागणपतिर्देवो महासिद्धिप्रदायकः ॥ २ ॥

कवचं तस्य देवस्य कृपया वद मे प्रभो ॥ ३ ॥

श्री शिव उवाचः –

लक्षवारसहस्राणि वारितासि मया प्रिये ॥
स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि ।
महागोप्यतमं गुह्यं वाञ्छासिद्धिप्रदायकम् ॥ ४ ॥
गुटिकापादुकासिद्धिस्तथा खेचरसिद्धयः ।
मनोरथमयी सिद्धिस्तथा काम्यमयी परा ॥ ५ ॥
जले जलमयत्वं च वह्नौ वह्निमयं तथा ।
वायौ वायुमयत्वञ्च भवत्येव न संशयः ॥ ६ ॥

ओं अस्य श्रीमहागणपतिमन्त्रविग्रहकवचस्य श्रीशिव ऋषिः। देवीगायत्री छन्दः । श्री महागणपतिर्देवता । ओं श्रीं ह्रीं क्लीं ग्लौं गं बीजानि । गणपतये वरवरदेति शक्तिः । सर्वजनं मे वशमानय स्वाहा कीलकम् । श्रीमहागणपतिप्रसादसिद्धये जपे विनियोगः ।

ओ श्रीं ह्रीं क्लीं अङ्गुष्ठाभ्यां नमः—हृदयाय नमः ।
ग्लौं गं गणपतये तर्जनीभ्यां नमः—शिरसे स्वाहा ।
वरवरद मध्यमाभ्यां नमः—शिखायै वषट् ।
सर्वजनं मे अनामिकाभ्यां नमः—कवचाय हुं ।
वशमानय कनिष्ठिकाभ्यां नमः—नेत्रत्रयाय वौषट् ।
स्वाहा करतल करपृष्ठाभ्यां नमः—अस्त्राय फट् ।

अथ ध्यानम् :–

बीजापूरगदेक्षुकार्मुकरुजाचक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः ।

ध्येयो वल्लभया सपद्मकरयाश्लिष्टोज्वलद्‌भूपया
विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नोविशिष्टार्थदः ।।
इति ध्यात्वा । लं इत्यादि मानसोपचारैः संपूज्य कवचंपठेत् ।।

ओं कारो मे शिरः पातु श्रींकारः पातु फालकम् ।
ह्रीं बीजं मे ललाटेऽव्याद् क्लीं बीजं भ्रयुगं मम ।। ८ ।।
ग्लौं बीज नेत्रयोः पातु गं बीजं पातु नासिकाम् ।
ग बीज मुखपद्मेऽव्याद् महासिद्धिफलप्रदम् ।। ९ ।।
णकारो दन्तयोः पातु पकारो लम्बिकां मम ।
तकारः पातु मे ताल्वोर्यकार ओष्ठयोर्मम ।। १० ।।
वकारः कण्ठदेशेऽव्याद् रकारश्चोपकण्ठके ।
द्वितीयन्तु वकारो मे हृदयं पातु सर्वदा ।। ११ ।।
रकारस्तु द्वितीयं वै उभौ पार्श्वौ सदा मम ।
दकार उदरे पातु सकारो नाभिमण्डले ।। १२ ।।
वकारः पातु मे लिङ्गं जकारः पातु गुह्यके ।
नकारः पातु मे जङ्घे मेकारो जानुनोर्द्वयोः ।। १३ ।।
वकारः पातु मे गुल्फौ शकारः पादयोर्द्वयोः ।
माकारस्तु सदा पातु दक्षपादाङ्गुलीषु च ।। १४ ।।
नकारस्तु सदा पातु वामपादाङ्गुलीषु च ।
यकारो मे सदा पातु दक्षपादतले तथा ।। १५ ।
स्वाकारो ब्रह्मरूपाख्यो वामपादतले तथा ।
हाकारः सर्वदा पातु सर्वाङ्गे गणपः प्रभुः ।। १६ ।।

पूर्वे भ। पातु श्रीरुद्रो श्रीं ह्रीं क्लीं फट कलाधरः ।
आग्नेय्यां मे सदा पातु ह्रीं श्रीं क्लीं लोकमोहनः ॥ १७ ॥

दक्षिणे श्रीयमः पातु ह्रं क्रीं ऐं ह्रीं हस्रौं नमः ।
नैर्ऋत्ये निर्ऋतिः पातु आं ह्रीं क्रों क्रों नमो नमः ॥ १८ ॥

पश्चिमे वरुणः पातु श्रीं ह्रीं क्लीं फट् हस्रौं नमः ।
वायुर्मे पातु वायव्ये हूं ह्रीं श्रीं हस्फ्रें नमो नमः ॥ १९ ॥

उत्तरे धनदः पातु श्रीं ह्रों श्रीं ह्रीं धनेश्वरः ।
ईशान्ये पातु मां देवो ह्रौं ह्रीं जूं सः सदाशिवः ॥ २० ॥

प्रपन्नपारिजाताय स्वाहा मां पातु ईश्वरः ।
उर्ध्वं मे सर्वदा पातु गं ग्लौं क्लीं हस्रौ नमः ॥ २१ ॥

अनन्ताय नमः स्वाहा अधस्ताद्दिशि रक्षतु ।
पूर्वे मां गणपः पातु दक्षिणे क्षेत्रपालकः ॥ २२ ॥

पश्चिमे पातु मे दुर्गा ऐं ह्रीं क्लीं चण्डिका शिवा ।
उत्तरे वटुकः पातु ह्रीं वं वं वटुकः शिवः ॥ २३ ॥

स्वाहा सर्वार्थसिद्धेश्च दायको विश्वनायकः ।
पुनः पूर्वे च मां पातु श्रीमानसितभैरवः ॥ २४ ॥

आग्नेय्यां पातु नो ह्रीं ह्रीं ह्र क्रों क्रों रुरुभैरवः ।
दक्षिणे पातु मे क्रौं क्रों ह्रैं ह्रैं मे चण्डभैरवः ॥ २५ ॥

नैर्ऋत्ये पातु मे ह्रीं हूं ह्रौं ह्रौं ह्रीं हस्रैं नमः ।
स्वाहा मे सर्वभूतात्मा पातु मां क्रोधभैरवः ॥ २६ ॥

पश्चिमे ईश्वरः पातु क्रीं क्लीं उन्मत्तभैरवः ।
वायव्ये पातु मे ह्रीं क्लीं कपाली कमलेक्षणः ॥ २७ ॥

उत्तरे पातु म देवो ह्रीं ह्रीं भीषणभैरवः ।
ईशान्ये पातु मां देवो क्लीं ह्रीं संहारभैरवः ॥ २८ ॥

उर्ध्वं मे पातु देवेशः श्रीसम्मोहनभैरवः ।
अधस्ताद् वटुकः पातु सर्वतः कालभैरवः ॥ २९ ॥

इतीदं कवचं दिव्यं ब्रह्मविद्याकलेवरम् ।
गोपनीयं प्रयत्नेन यदीच्छेदात्मनः सुखम् ॥ ३० ॥

जननीजारवद् गोप्या विद्यैषेत्यागमा जगुः ।
अष्टम्यां च चतुर्दश्यां सङ्क्रान्तौ ग्रहणेष्वपि ॥ ३१ ॥

भौमेऽवश्यं पठेद् धीरो मोहयत्यखिलं जगत् ।
एकावृत्त्या भवेद् विद्या द्विरावृत्त्या धनं लभेत् ॥ ३२ ॥

त्रिरावृत्त्या राजवश्यं तुर्यावृत्त्याऽखिलाः प्रजाः ।
पञ्चावृत्त्या ग्रामवश्यं षडावृत्त्या च मन्त्रिणः ॥ ३३ ॥

सप्तावृत्त्या सभा वश्या अष्टावृत्त्या भुवः श्रियम् ।
नवावृत्त्या च नारीणां सर्वाकर्षणकारकम् ॥ ३४ ॥

दशावृत्तीः पठेन्नित्यं षण्मासाभ्यासयोगतः ।
देवता वशमायाति किं पुनर्मानवा भुवि ॥ ३५ ॥

कवचस्य च दिव्यस्य सहस्रावर्तनान्नरः ।
देवतादर्शनं सद्यो नात्र कार्या विचारणा ॥ ३६ ॥

अर्धरात्रे समुत्थाय चतुर्थ्यां भृगुवासरे ।
रक्तमाल्याम्बरधरो रक्तगन्धानुलेपनः ॥ ३७ ॥

सावधानेन मनसा पठेदेकोत्तरंशतम् ।
स्वप्ने मूर्तिमयं देवं पश्यत्येव न संशयः ॥ ३८ ॥

इदं कवचमज्ञात्वा गणेशं भजते नरः ।
कोटिलक्षं प्रजप्त्वाऽपि न मन्त्रः सिद्धिदो भवेत् ॥ ३९ ॥

पुष्पाञ्जल्यष्टकं दत्वा मूलेनैव सकृत्पठेत् ।
अपि वर्षसहस्राणां पूजायाः फलमाप्नुयात् ॥ ४० ॥

भूर्जे लिखित्वा स्वर्णस्थां गुटिकां धारयेद् यदि ।
कण्ठे वा दक्षिणे बाहौ सकुर्याद् दासवज्जगत् ॥ ४१ ॥

न देयं परशिष्येभ्यो देयं शिष्येभ्य एव च ।
अभक्तेभ्योऽपि पुत्रेभ्यो दत्वा नरकमाप्नुयात् ॥ ४२ ॥

गणेशभक्तियुक्ताय साधवे च प्रयत्नतः ।
दातव्यं तेन विघ्नेशः सुप्रसन्नो भविष्यति ॥ ४३ ॥

॥ इति श्रीदेवीरहस्ये श्रीमहागणपतिमन्त्रविग्रहकवचम् ॥

श्रीमूलशक्तिगजास्यस्नपनाध्यायः

श्रीगणेशाय नमः । श्रीगुरुचरणारविन्दाभ्यां नमः । श्री सरस्वत्यै नमः । अथातो मूलशक्तिगजास्यस्नपनाध्यायं व्याख्यास्यामः ॥

मन्त्राभिषेकविधिः

ओं महाकालीकामदामूलविघ्नेश्वरौ सर्वाङ्गेवसताम् । ओं भोगदावक्रतुण्डौ चरणयोर्वसताम् । ओं उग्रहेरम्बाविघ्नेशावूर्वोर्वसताम् । ओं कामदाहरिद्रागजवक्त्रौ हृदये वसताम् । ओं विघ्नहृद्युच्छिष्ट-विघ्नेशावाननेवसताम् । ओं तेजोवतीयोगेशौ मूर्धजेषुवसताम् । ओं प्राणशक्तिबालसंमोहनौ प्रजनने वसताम् । ओं व्यापिनीमहागणपती कंठे वसताम् । ओं ध्रुवाबीजगणेशौ ललाटे वसताम् । ओं रक्ताक्षिप्र-गणेशौ कर्णयोर्वसताम् । ओं कृष्णावीरगणेशौ नासिकयोर्वसताम् । ओं एते महाकालीमूलशक्तिमूलविघ्नेश्वरपुत्रदशकम् । ॥ २० ॥

ओं मङ्गलारत्नमौलीशौ नयनयोर्वसताम् । ओं वरदैकशक्ति गजास्यौ भुजयोर्वसताम् । ओं गुह्यारहस्यविघ्नेशौ नाभौ वसताम् । ओं महालक्ष्मीलक्ष्मीशविघ्नराजौ हृदये वसताम् । ओं कांताकुक्षि-गणेशौ शिखायां वसताम् । ओं जीवंतीवारिविघ्नेशौ कट्योर्वसताम् । ओं विरुपारिरविविघ्नेशौ पृष्ठे वसताम् । ओं कालिकाहरिद्रास्तंभनेशौ उर्वोर्वसताम् । दीप्तिकेवलशक्तिविघ्नेशौ स्कंधयोर्वसताम् । ओं गति-मालाहेरम्बौ भुजसंध्योर्वसताम् । ओं चित्याकाशगणेशौ ब्रह्मरंध्रे-वसताम् । ओं महालक्ष्मीमूलशक्तिमूलविघ्नेश्वरौ सर्वाङ्गेषु वसताम् । एते महालक्ष्मीमूलगजास्यपुत्रा एकादशा ॥ २२ ॥

महैश्वर्यप्रदाः सर्वविघ्ननिवारकाः साध्यस्य मोहविधायकः । वशीकरणकारकाः भक्तस्य सर्वसौख्यप्रदाः । ओं जरातीताविघ्न-संज्ञो कराङ्गुल्योर्वसताम् । ओं द्राविणीविघ्नविनायकौ करतर्जन्यो-र्वसताम् । ओं मदोद्धतावीरौ करमध्ययोर्वसताम् । ओं महारात्रिशूरौ

करनामिकयोर्वसताम् । ओं जगद्धात्रीवरदौ करकनिष्टकयोर्वसताम् । ओं मरुत्पुत्रैकदंष्ट्रौ पादतर्जन्योर्वसताम् । ओं सिंहमुखीसिंधूरास्यौ पादांगुष्ठयोर्वसताम् । ओं जगन्मातालम्बोदरौ पादमध्ययोर्वसताम् । ओं बुद्धिमहागणपति पादानांप्रकोष्ठयोर्वसताम् । ओं विचित्रांगीक्षिप्रौ पादकनिष्ठिकयोर्वसताम् । एते महासरस्वतीमूलविघ्नेश्वरपुत्रा दश सर्वविद्याप्रदाः ॥ २० ॥ ओं भुवनेशीचंद्रहस्ता च दक्षिणनयने-वसताम् । ओं वरारोहत्रिपुटा च वामनयने वसताम् । ओं सदाकीर्तिरश्वारोहा भ्रूमध्ये वसताम् । ओं महासरस्वती मूलशक्ति-विघ्नेश्वरौ सर्वाङ्गे वसताम् । ओं अन्ये शक्तिकाः सर्वे गणेशाः सर्वाङ्गे वसताम् । एते स्त्री रूपाः सशक्तिकास्त्रया सर्वविद्याप्रदाः एव ॥ २ ॥ अन्यास्त्वैवमङ्गेषु गणाधीशान् स्नपनाघ्यायेनाभिषिञ्च्य काङक्षितं लभेत् इत्योँसत्यम् ॥

ओं नमोभगवते मूलशक्तिमूलगजास्याय । ओं नमस्ते महाकालि मूल-शक्तिजननि नमस्तुभ्यं मूलविघ्नेश्वरगजास्यजनक युवाभ्यां नमो नमः ।

ओं नमस्ते भोगदे जननि नमस्तुभ्यं वक्रतुण्डगजास्यजनक युवाभ्यां नमो नमः ।

ओं नमस्ते उग्रे जननि नमस्तुभ्यं हेरम्बगजास्यजनक युवाभ्यां नमो नमः ।

ओं नमस्ते कामदेवजननि नमस्तुभ्यं हरिद्रागजास्यजनक युवाभ्यां नमो नमः ।

ओं नमस्ते विघ्नहन्त्रीजननि नमस्तुभ्यं उच्छिष्टगजास्य जनक युवाभ्यां नमो नमः ।

ओं नमस्ते तेजोवती जननि नमस्तुभ्यं योगेशगजास्यजनक युवाभ्यां नमो नमः ।

ओं नमस्ते प्राणशक्ति जननि नमस्तुभ्यं बालसंमोहनगजास्यजनकयुवाभ्यां नमो नमः ।

ओं नमस्ते व्यापिनि जननि नमस्तुभ्यं जयगणेशगजास्यजनक युवाभ्यां नमो नमः ।

ओं नमस्ते ध्रुवे जननि नमस्तुभ्यं बीजगणेशगजास्यजनक युवाभ्यां नमो नमः ।

ओं नमस्ते रक्ते जननि नमस्तुभ्यं क्षिप्रगणेशगजास्यजनक युवाभ्यां नमो नमः ।

ओं नमस्ते कृष्णे जननि नमस्तुभ्यं वीरगणेशगजास्यजनक युवाभ्यां नमो नमः ।

ओं नमोऽस्तु महद्भ्यः सर्वकर्तृभ्यः सर्वस्वतन्त्रेभ्यो विघ्नमोह-विधायकविनाशकेभ्यो निजशक्तिमद्भ्यः शत्रुसंहारेभ्यो मूलशक्ति मूलगजास्यपुत्रेभ्यो दशभ्यो भूयो भूयो नमो नमः । ओं नमो महालक्ष्मीमूलशक्तिगजास्याय नमो नमो मङ्गलायै रत्नमौलीश-गजास्याय नमो नमो वरदायै एकशक्तिगजास्याय नमो नमो गुह्यायै रहस्यविघ्नराजाय नमो नमो महालक्ष्म्यै महालक्ष्मीश-विघ्नराजाय नमो नमः । ओं कान्तायै कुक्षीशविघ्नराजाय नमो नमो जीवन्त्यै वारिविघ्ननामाधिराजाय नमो नमो विरूपायारि-विघ्नाधिराजाय नमो नमः । ओं कालिकायै हरिद्रास्तंभनेशाय नमो नमो दीप्त्यै केवलशक्तिविघ्नेश्वराय नमो नमो गतिमालायै हेरम्बाय नमश्रित्यै-व्योमविघ्नराजाय नमः । ओं नमो जग त्कर्तृभ्य

सवनितेभ्यो महदैश्वर्यपदेभ्यः सर्वविघ्ननिवारकेभ्यो महामोहविधायकेभ्यश्चराचरवशीकरणकर्तृभ्यः सर्वसौख्यप्रदेभ्यो नमो नमः ।। २६ ।। ओं नमो महाशक्त्यै मूलशक्त्यै च मूलविघ्नेश्वराय च नरातीतायै च विघ्नाय च द्राविण्यै च विनायकाय च मदोद्रिक्तायै वीराय च महाराल्यै च जगद्धात्र्यै च वरदाय च सिह्ममुख्यै सिंधूरास्याय च मरुत्पूतायै वैकदंष्ट्राय च जगन्मात्रे च लम्बोदराय च बुध्यै च महागणपतये च विचित्राङ्गा च क्षिप्राय च सवनितेभ्यो महागणेशेभ्यो गजाकारेभ्यः सशक्तिकेभ्यो नमो नमः। सर्वविद्याप्रदातृभ्यः सर्वजगत्कर्तृभ्यो महासरस्वतीमहागणेशपुत्रेभ्यः सभार्येभ्यो नमो नमः ।। २७ ।।

ओं भुवनेशी चन्द्रहस्ता ताभ्यां नमो नमः । ओं या वरारोहा त्रिपुटा ताभ्यां नमो नमः ।। २ ।। ओं या सदाकीर्तिरश्वारोहा ताभ्यां नमो नमः ।। ३ ।। ओं स्त्रीरूपेभ्यः सशक्तिकेभ्यो गजास्येभ्यो नमो नमः ।। ४ ।। ओं य इंद्रगजास्यो याचेंद्राणीतावबतं सदा माम् ।। ५ ।। ओं योऽग्निगजास्यो या स्वाहा तावबतं सदा माम् ।। ६ ।। ओं यो यमगजास्यो या संयमिनी तावबतं सदा माम् ।। ७ ।। ओं यो निर्ऋतिगजास्या या निर्ऋतिस्तावबतं सदा माम् ।। ८ ।। ओं यो वरुणगजास्यो या वारुणी तावबतं सदा माम् ।। ९ ।। ओं यो वायु गजास्यो या गन्धवती तावबतं सदा माप् ।। १० ।। ओं यः कुबेर गजास्यो या धनदा तावबतं सदा माम् ।। ११ ।। य ईशानगजास्यो या ईशानी तावबतं सदा माम् ।। १२ ।। ओं एते सर्वदिक्षुरक्षका अष्टौ ।। १३ ।। ओं यः सूर्यगजास्यो या प्रभा

ताववतं सदा माम् ॥ १४ ॥ ओं यश्चंद्रगजास्यो या प्रभा ताववतं सदा माम् ॥ १५ ॥ ओं यो मंगलगजास्यो या मंगला ताववतं सदामाम् ॥ १६ ॥ ओं यः सौम्यगजास्यो या सौम्या ताववतं सदा माम् ॥ १७ ॥ ओं यो गुरुगजास्यो या धिषणा ताववतं सदा माम् ॥ १८ ॥ ओं यः शुक्रगजास्यो या भार्गवी ताववतं सदा माम् ॥ १९ ॥ ओं यः शनिगजास्यो या असिता ताववतं सदा माम् ॥ २० ॥ एते सप्त सर्वपीडाहारकाः सुरक्षकाश्च । ओं ये स्थले जलेचाकाशे गणेशासन्ति सहस्रशः सवनिता जाग्रतं स्वपन्तं गच्छन्ते भुज्जन्तं अग्रे पुष्ठे पार्श्वयो-रुपरिष्टादधश्च पान्तु सर्वतः । एते अनन्ताः सर्वत्र सर्वदा सर्वतो-रक्षकाः । चिरायुर्दिशंतु । क्षेमंदिशंतु ऐश्वर्यं दिशंतु वश्यं दिशंतु । पुत्रं दिशंतु कलत्रंदिशंतु । कांक्षितं दिशंतु वित्तं दिशंतु । वृत्ति दिशंतु वैरीन् नाशायंतु । मृत्युं नाशयंतु । विघ्नान्नाशयंतु । वै आलस्यै नाशयंतु कलहं नाशयंतु रोगान्नाशयंतु प्रेतान्नाशयंतु । ब्रह्मराक्षसान्नाशयंतु । सर्वदुःखानि नाशयंतु । सर्वपापानि नाशयंतु । अलक्ष्मीर्नाशयंतु । अपमृत्युं नाशयंतु । धनं ममास्तु । पशवस्सन्तु । विद्याः सन्तु । सुचित्तमस्तु । सुखवृद्धिरस्तु । सुभक्तिरस्तु । चिन्तितमनोरथावाप्तिरस्तु । चिच्छक्तिरस्तु । कारुण्यमस्तु । निरुपद्रवोऽस्तु । कलिहानिरस्तु । कलयन्तु सत्यसुखौ भवतम्—सुप्रसन्नौ भवतम् । विजयौ भवतम् । विहारिणौ भवतम् । सत्फलै भवतम् । सफलौ भवतम् । सदानंदौ भवतम् । सत्सुखौ भवतम् । सुश्रियौ भवतम् ।

सुमंगलौ भवतम् । सर्वे गजास्याः सर्वसुखं दत्वा यत्र स्मृता तत्र संतु सस्त्रीकाः मां रक्षन्तु मुदिता भक्तवश्याः ये वैरिणः किङ्करास्सन्तु । ओं गणपतये नमो नमः इत्यथर्वणरहस्ये मूलशक्तिगजास्यस्नपनाध्याये चतुर्थं पटलम् । ओं श्रीं ह्रीं क्लीं श्रीश्रीपतिगिरिजागिरिजापति-रतिरतिपति महीमहीपति महालक्ष्मीमहागणपति ऋध्यामोद समृद्धि-प्रमोद कान्तिसुमुख मदनावतीदुर्मुख मदद्रवाविघ्न द्राविणीविघ्नकर्तृ-वसुधाराशङ्खनिधि वसुमतीपद्मनिधिश्रीगणेशचक्रस्थसकलदेवताभ्यो नमः ॥

॥ इति शुभम् ॥

श्रीगुरुः

॥ अथगणपतिसूक्तम् ॥

ॐ गणानांत्वा गणपतिँहवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः शृण्वन्नूतिभिः सीदसादनम् ॥
आतून इन्द्र क्षुमन्तं चित्रं ग्राभं संगृभाय ॥ महाहस्तो दक्षिणेन ॥
विद्माहि त्वा तुविकुर्मि तूविदेष्णं तुवीतमम् ॥ तुविमात्रमवोभिः ॥
नहि त्वा शूर देवा न मर्तासो दित्सन्तम् ॥ भीमं नगां वारयन्ते ।
एतोन्विन्द्रं स्तवा मेशानं वस्वः स्वराजम् ॥ न राधसा मर्धिषन्नः ॥
प्रस्तोषदुपगासिषच्छ्रवत्साम गीयमानम् ॥ अभिराधसा जुगुरत् ॥
आनो भर दक्षिणेनाभिसव्येन प्रमृश ॥ इन्द्र मानो वसोर्निर्भाक् ॥

उपक्रमस्वाभरधृषता धृष्णो जनानाम् ॥ अदाशूष्टरस्य वेदः ॥ इन्द्रय उनुते अस्ति वाजो विप्रेभिः सनित्वः ॥ अस्माभिः सुतंसनुहि ॥ सद्यो जुवस्ते वाजा अस्मभ्यं विश्वश्चन्द्राः ॥ वशैश्च मक्षूजरन्ते ॥

॥ इति गणपतिसूक्तम् ॥

॥ अथ गणपत्यथर्वशीर्षम् ॥

श्रीगणेशाय नमः ॥ ॐ भद्रं कर्णेभिः श्रृणुयाम देवाः ॥ भद्रं पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिः ॥ व्यशेम देवहितं यदायुः ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः ॥ स्वस्ति न पूषा विश्ववेदाः ॥ स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः ॥ स्वस्ति नो बृहस्पतिर्दधातु ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ अथगणेशाथर्वशीर्षं व्याख्यास्यामः ॥

ॐ नमस्ते गणपतये ॥ त्वमेव प्रत्यक्षं तत्वमसि ॥ त्वमेव केवलं कर्तासि ॥ त्वमेवकेवलं धर्तासि ॥ त्वमेव केवलं हर्तासि ॥ त्वमेव सर्वं खल्विदं ब्रह्मासि ॥ त्वं साक्षादात्मासि नित्यं ॥ ऋतंवच्मि ॥ सत्यंवच्मि ॥ अव त्वं मां ॥ अव वक्तारं ॥ अव श्रोतारं ॥ अव दातारं ॥ अव धातारं ॥ अवानूचानमवशिष्यम् ॥ अव पश्चात्तात् ॥ अव पुरस्ताम् ॥ अवोत्तरात्तात् ॥ अव दक्षिणात्तात् ॥ अव चोर्ध्वात्तात् ॥ अवाधरात्तात् ॥ सर्वतो मां पाहि पाहि समन्तात् ॥ त्वं वाङ्मयस्त्वं चिन्मयः ॥ त्वामानन्दमयस्त्वं ब्रह्ममयः ॥ त्वं सच्चिदानंदाद्वितीयो सि ॥ त्वं प्रत्यक्षं ब्रह्मासि ॥ त्वं ज्ञानमयो

विज्ञानमयोऽसि । सर्वंजगदिदंत्वत्तो जायते ॥ सर्वं जगदिदं त्वतस्तिष्ठति ॥ सर्वं जगदिदं त्वयि लयमेष्यति ।। सर्वं जगदिदं त्वयि प्रत्येति ।। त्वं भूमिरापोनलोनिलोनभः ॥ त्वं चत्वारि वाक्पदानि ॥ त्वं गुणत्रयातीतः ।। त्वं कालत्रयातीतः ॥ त्वं देहत्रयतीतः ॥ त्वं मूलाधारस्थितो सिनित्यं ॥ त्वं शक्तित्रयात्मकः ॥ त्वां योगिनो ध्यायंतिनित्यं । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रन्त्व मग्निस्त्वंवायुस्त्वंसूर्यस्त्वंचंद्रमास्त्वं ब्रह्म भूर्भुवःस्वरोम ॥ गणादीन् पूर्वमुच्चार्य वर्णादींस्तदनंतरम् ।। अनुस्वारः परतरः ॥ अर्धेन्दुलसितं ॥ तारेण रुद्धं ॥ एतत्तवमनुस्वरूपम् ॥ गकारः पूर्वरूपं ॥ अकारोमध्यमरूपं ॥ अनुस्वारश्चांत्यरूपं ॥ बिंदुरुत्तररूपं ॥ नादः संधानं ।। संहिता संधिः ।। सैषा गणेशविद्या ॥ गणकऋषिः ॥ निचृद्गायत्रीछंदः ॥ गणपतिर्देवता ॥ ॐ गं ॐ ॥

ओं एकदंतायविद्महे वक्रतुण्डायधीमहि ।। तन्नोदंतिः प्रचोदयात ।। एकदंतंचतुर्हस्तं पाशमंकुशधारिणम् ॥ रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥ रक्तं लंबोदरं शूर्पकर्णकं रक्तवाससं । रक्तगंधानुलिप्तांगं रक्तपुष्पैः सुपूजितम् ॥ भक्तानुकंपिनं देवं जगत्कारणमच्युतम् ॥ आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम ॥ एवं ध्यायति योनित्यंसयोगीयोगिनां वरः ।। नमोव्रातपतये नमो गणपतये नम प्रमथपतये नमस्ते अस्तु लंबोदरायैकदंताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः ॥ एतदथर्वशीर्षं यो धीते ॥ स ब्रह्मभूयाय कल्पते ॥ स सर्वतः सुखमेधते ॥ स सर्वविघ्नैर्न बाध्यते ॥ स पंचमहापातकोपपातकात् प्रमुच्यते ।। सायमधीयानो दिवसकृतं पापं नाशयति ॥ प्रातरधीयानो रात्रिकृतं पापं नाशयति ॥ सायंप्रातः प्रयुंजानोऽपापो भवति ॥

सर्वत्राधीयानोऽपविघ्नोभवति ।। धर्ममर्थकामंमोक्षं च विंदति ।। इदमथर्वशीर्षमशिष्यायनदेयं ।। योयदि मोहाद्दास्यति सपापीयान् भवति ।। सहस्रावर्तनात् यंयंकाममधीते तं तमनेनसाधयेत् ।। अनेनगणपतिमभिषिंचति सवाग्मीभवति ।। चतुर्थ्यामनश्नन् जपति सविद्यावान् भवति ।। इत्यथर्वणवाक्यं ।। ब्राह्माद्याचरणंविद्यात् ।। नबिभेतिकदाचनेति ।। योदूर्वांकुरैर्यजति सवैश्रवणोपमोभवति ।। योलाजैर्यजति सयशोवान्भवति समेधावान्भवति योमोदकसहस्रेणयजति सवांछितफलमवाप्नोति ।। यःसाज्यसमिद्भिर्यजति ससर्वंलभते ससर्वंलभते ।। अष्टौब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वींभवति ।। सूर्यग्रहणे महानद्यां प्रतिमासन्निधौवाजप्त्वा ससिद्धमंत्रो भवति ।। महाविघ्नात्प्रमुच्यते ।। महाप्रत्यवायात्प्रमुच्यते ।। महापापात्प्रमुच्यते ।। स सर्वविद्भवति स सर्वविद्भवति ।। य एवं वेद ।। इत्युपनिषत् ।। ओं भद्रं कर्णेभिः० ।। २ ।। स्वस्तिनइन्द्रो० ।। २ ।।

।। इति गणपत्यथर्वशीर्षं समाप्तम् ।।

श्रीगुरुभ्यो नमः

श्रीवल्लभेशोपनिषत्

ओं सहनाववतु इति शान्तिः

प्रथमोऽध्यायः

अथ भगवन्तं मरीचिं काश्यपः पप्रच्छ का वा वल्लभा को वा वल्लभेश ? मरीचिरवदत् । सर्वलोकनायिका ब्रह्मशक्तिः वैनायकी माया सिद्धलक्ष्मीः वल्लभा । तत्पतिः परमात्मा वल्लभेशः । कथं गणपतिरिति ? ब्रह्मविष्णुरुद्रादीनां अन्नादिब्रह्मणां महदादितत्त्वानां गणानां पतिः गणपतिः । केन गजानन इति ? नराकारा माया गजाकारः पुरुषः । प्रकृतिपुरुषाभेदाकृतिधरो गजाननः । कथं दशभुज इति ? सदात्मनः सूक्ष्मभूतान्यजायन्त । शब्दस्पर्शरूपरसगन्धात्मकानि सूक्ष्मभूतगणानि स्वस्वगुणोपेतसूक्ष्मभूतसमूहदेहजातानि स्थूलसूक्ष्म-कारणात्मकानि विश्वानि । अतः पञ्चभूतमयानि विश्वानि त्रिविधात्मकं विश्वं जगत् । तत्सृष्टा तदनुप्रविश्य सच्चत्यच्चाभवत् । तयोर्योगेनन सत्यं ब्रह्म जगत् ब्रह्माभेदैकाकृतिधरो वल्लभेशः । कण्ठाधो जगन्मयः । तुरीयं ब्रह्ममूर्धा । द्वयोरभेदः पञ्चमंब्रह्म । पंचमं व्याकृतमव्याकृतमिदं प्रविश्य अन्तर्याम्यभवत् । व्योम्नः पुष्टिपतिं वायोर्मनसश्च रतिपतिं अग्नेर्गिरिजापतिं अद्भ्यो रमापतिं अन्नात् भूमिपतिं सशक्तिमसृजत् । सशक्तिकानां पञ्चानां अभेदा-कृतिमयत्वात दशबाहुकः । वराहं चिन्हं गदा । भूमेः व्रीह्यग्रम् विष्णोः चक्रम् श्रियः पद्मं । रुद्रस्य रुजा । गौर्याः पाशम् रतेः उत्पलम् मारस्य इक्षुकार्मुकम् पुष्टेः बीजापूरम् पुष्टिपतेः विषाणम् एवं दशायुधधरः । दशानां अभेदाकृतिमयः कण्ठाधः वल्लभेशः

दशबाहुकः । गजाकारःतुरीयो मूर्धा । तच्चिह्नं शुण्डा । नानाविध-रत्नपूरितरत्नघटं तदायुधम् । एकादशायुधराजितैकादशकरः वल्लभेशः । केन रक्तवर्ण इति ? वर्णेषु आद्यं लोहितम् अयं देवेष्वाद्यत्वात् रक्तवर्णोऽभवत् । केन त्रिनेत्र इति ? प्रपञ्चत्रयसाक्षित्वात त्रिनेत्रः, केन चन्द्रचूड इति ? त्रिविधात्मकं जगत् मृतम् । तुरीयं अमृतात्मकं अमृतं चन्द्ररूपकम् । तुरीयब्रह्म मस्तकत्वात् चंद्रचूडः । कथं चिन्तामणिद्वीपपतिरिति ? अविद्यात्मकं जगत् । विद्यात्मकं तुरीयम् । चित्तप्रकाशकत्वात् चिन्तामणिः । तुरीयस्थिति-गत्वात् चिन्तामणिद्वीपपतिरिति । कथं विश्वोत्पत्तिविपत्तिसंस्थितिकर इति ? स्वगुणेभ्यः ब्रह्मविष्णुरुद्रान् सृष्ट्वा सृष्ट्यादीनि तेभ्यो दत्वा तैः कारयति । कथं विघ्नराज इति ? जगन्मयः प्रति-बन्धात्मकः सद्भावधरः कालः विघ्नः । तन्नियामकोऽयं विघ्नराज इति ॥

इति प्रथमोध्यायः ॥

॥ अथ द्वितीयोऽध्यायः ॥

काश्यपः पप्रच्छ । कथं मे भगिनीपतिरिति ? मरीचिराह । ओं तत् सत् इति ब्रह्म त्रिविधं सत्यं ज्ञानमनन्तमिति । चतुर्विधं जगदाधारभूतं । पञ्चमं प्रणवात्मकम् । तत् पदं निर्गुणं ज्ञानात्मकं अनन्तं असि पदं सत् ब्रह्म विभावरहितं स्वसंवेद्यात्मकं ओंकारं ब्रह्म एव । विशुद्धसत्वमायायाः समष्टिव्यष्टिव्यक्तद्यभेदमास्थाय तुरीयपदगो भूत्वा चिन्तामणिद्वीपपतिरभवत् । तच्छक्तिः विशुद्धसत्व

प्रधाना माया सिद्धलक्ष्मीः । सा च मे तपसा वल्लभेति नाम्ना मे सुता अभवत् । चिन्तामणिद्वीपपतिः अयं गणपतिमूर्तिधरो भूत्वा विधिना मे पुत्रीं गृहीत्वा वल्लभेशो अभवत् । ओं ब्रह्मैव वल्लभेश इति । अयं ब्रह्माण्डे कान् कान् भक्तान् अन्वगृह्णात् ? मरीचिराह । चतुर्विधपुरुषार्थसंयोगाभेदमयं पञ्चमं ब्रह्मभूयं । ब्रह्मभूयपदगो वल्लभेशः । ब्रह्मभूयस्य चत्वारो द्वाराः । धर्मार्थ-काममोक्षा इति । धर्मस्य देवता विष्णुः । अर्थस्य रुद्रः । कामस्य शक्तिः । मोक्षस्य सूर्यः । धर्मद्वाररक्षकौ रमानारायणौ । अर्थद्वाररक्षकौ उमामहेश्वरौ । कामद्वारपालकौ रतिकन्दर्पौ । मोक्षद्वारपालकौ महीवराहौ । यज्ञस्कन्दपुष्टीशब्रह्माणः चतुर्णां प्रत्यधिदेवताः । ब्रह्माण्डे चैषां दर्शनं दत्वा अन्वगृह्णादिति । भण्डासुरवधे देव्या वरान् दत्वा विघ्नयन्त्रभेदनार्थं तस्य स्मरणात् आविर्भूय विघ्नयन्त्रं भित्वा ललितामन्वगृह्णात् कामेश्वरीं कामदेवतां । विष्णुतपसा तुष्टः रुद्रनेत्राग्निदग्धां लक्ष्मीं बिल्वेन वृक्षेण उज्जीवयित्वा विष्णवे दत्वा तं अन्वगृह्णात् । पार्वतीतपसा तुष्टः शिवेन सह पार्वतीं संयोज्य तयोः वरानदात् । दक्षिणामूर्तितपसा तुष्टः पार्वतीं तेन समयोजयत् । सरस्वतीं ब्रह्मणा च । रुद्रनेत्राग्निदग्धं कामं जीवयित्वा रत्या समयोजयत् भूमिमपि वराहेण । प्रभां सूर्येण । पुष्टिपतितपसा तुष्टः दर्शनं दत्वा सारूप्यमदात् । यज्ञमूर्तितपसा तुष्टः दर्शनं दत्वा ब्रह्मणस्पतियज्ञं स्वप्रियतरं चक्रे । स्कन्दतपसा तुष्टः तारकभेदकशक्तिमदात् । तेन सह वल्लीं समयोजयत् । एवं नानादेवान् मुनीन् वा अन्वगृह्णादिति ॥

इति द्वितीयोऽध्यायः ॥

अथ तृतीयोऽध्याय: ।।

काश्यप उवाच । आत्मविद्यां अनुब्रूहीति । त होवाच मरीचिः । गणकोऋषिरस्यास्तु देवता वल्लभेश्वरः निचृद्गायत्रीछन्दोऽस्य गं बीजं सर्वकारणंम् । शक्तिस्स्यात् प्रणवस्तुर्यः स्वाहा वै कीलकं स्मृतं । गामित्यादिदीर्घषट्कः षड्बीजसंयुताः क्रमात् । षडङ्गश्चेति कथितानियोज्याश्चाकारादिषु क्रमात् ।

ध्यानं

बीजापूरगदेक्षुकार्मुकरुजाचक्राब्जपशोत्पल-
व्रीहृयग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः ।
ध्येयो वल्लभया सपद्मकरयाश्लिष्टोज्वलद्भूषया
विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नेश्वरोऽभीष्टदः ।।

तारः श्रीशक्तिकन्दर्पमहाविघ्नेशबीजकाः ।।
गणपतेश्च संबुद्धिः वरदद्वितयं ततः ।।

ततः सर्वजनं मे च वशमानयसंयुतः ।
स्वाहया च महामन्त्रो ह्यष्टाविंशतिवर्णकः ।।

चतुर्थं वरवरदसंयुतो मन्त्र उत्तमः ।
कामेशीवरदश्चैव प्रीतिदश्चेति कथ्यते ।।

एवं भेदद्वयेनैव मन्त्रोऽयं परिकीर्तितः ।
संबुध्यन्तमहामन्त्रः ब्रह्मभूयादिसाधकः ।।

अन्यः कामप्रदः प्रोक्तः कामिनां शक्तिमार्गतः ।

काश्यप उवाच :—

नानाकामसिध्यै मन्त्रानस्य ब्रूहीति ।।

मरीचिराह :-

श्रीविद्यागणनाथस्य योगः कामप्रपूरकः ।
कएईलह्रीं षड्बीजा प्रथमःखण्ड उच्यते ।।
हसकहलह्रीं गणपते च वरदद्वितयम् ।
द्वितीयखण्डश्चेति सकलह्रीं ततः परम् ।।

सर्वजनं मे वशमानय स्वाहा महामनुः ।
त्रिचत्वारिंशद्वर्णमनुः तद्यन्त्रे पूज्य उच्यते ।।

गायत्री गणनाथस्य संयोगो ब्रह्मदायकः ।
भुक्तिमुक्तिप्रदो ब्रह्मतेजःपुञ्जःप्रमोददः ।।

गायत्र्याः प्रथमः पादः प्रणवेन समन्वितः ।
वल्लभेशस्य षड्बीजैः प्रथमःखण्ड उच्यते ।।

ततो द्वितीयपादस्तु संबुद्धिवरदद्वयम् ।
द्वितीय खण्ड इति च तृतीयचरण स्ततः ।।

वल्लभेशशिष्टभागाः तृतीयः खण्ड उच्यते ।
त्रिपञ्चाशद्वर्णमन्त्रः ब्रह्मतेजःप्रदायकः ।।

भर्गविद्येति कथिता विद्येयं वेदमार्गिभिः ।
एकाक्षरषडर्णाभ्यां पुटिता पूर्वपृष्ठयोः ।।

गायत्री त्रिपदा देवी भर्गविद्याऽपरा स्मृता ।
बालागणेशसंयोगः श्रीविद्याकामदायकः ।।

प्रथमं वाग्भवं पश्चात् षड्बीजाः कामबीजकम् ।
संबुद्धिश्च गणपतेः वरदद्वितयं ततः ।।

सौः पश्चात् शिष्टमन्त्रस्याद्बालागणपतेर्मनुः ।
नीलकण्ठस्य त्र्यक्षर्याः योगेनैव विषान्तकः ॥

वशमानय स्थानेषु विषं नाशाय चोच्यते ।
तारो ज्योंसः सःज्यों सूर्यवस्वर्णश्च ॥

ततः परं षड्बीजाश्च गणेशस्य संबुद्धिः ।
वरदद्वयं ज्यों सः सर्वरोगान् हरहर सः ज्यों स्वाहयामनुः ॥

सर्वरोगहरो मन्त्रः गणेशस्य प्रविस्तृतः ।
अघोरगणनाथस्य संयोगः शत्रुनाशकः ॥

कृत्याभिचारशमनः सर्वाभीष्टप्रदायकः ।
ओं गं गः प्रथमस्फुरादि च वमान्तकम् ॥

षड्बीजा वरदान्तं च साध्यं च स्वाहया मनुः ।
खण्डत्रयेषु गणपतेः ऐंब्लूं योज्य ससाधकम् ॥

विद्यां देहीति स्वाहाया च सर्वविद्याप्रदायकः ।
वश्यादिषड्कर्मसिध्यै तत्तद्बीजेन साध्यतः ॥

जपात्तत्तत्सिद्धिदाता वल्लभेशो घृणानिधिः ।
सर्वसंपत्समृध्यै च श्रीधराशक्तिबीजकान् ॥

खण्डत्रयेषु संयोज्य संपदं देहि साध्यकम् ।
संयोज्य च जपः कार्यः संपद्वृध्यै क्रमेण च ॥
एवं तस्य मन्त्रभेदाः कथिताः तत्प्रसादतः ॥

इति तृतीयोऽध्यायः ॥

अथ तुरीयोऽध्यायः ।।

काश्यप उवाच । तदाराधनविधिं मह्यं ब्रूहीति ? तँहोवाच मरीचिः । शैव वैष्णव सौर शाक्त गाणेशैरप्युपास्योऽयं वल्लभेशः । सिन्दूररक्तचन्दनगणेशाक्षगणपदचिन्हानि । तेषां धारणं कृत्वा जप्योऽयं पूजनीयश्च । उषःकालो गणेशस्यातिप्रियंकरः । अपरान्हार्धरात्रिकालं विना अन्यकालेषु जपः कार्यः यजनं । कवचहृदयावृत्तिस्तुतिसहस्रनामजपानि । मन्त्रसिद्धिसाधकहोमतर्पणमार्जनान्यपि तस्य तोषदानि । गणेशाग्नौ होमः एकोवा ऋङ्मंत्राभ्यां । कार्यः । शतसहस्रसंख्या क्रमेण वा काले सहस्रजप एव वरः । स्वदन्तार्कमूलविग्रहे यंत्रे शोणादिशिलायां च यजनं शस्यते । अभिषेकाय शोणशिला । लोकगणसिध्यै यन्त्रम् । देवताविग्रहसिध्यै बिंबं । पुरुषसूक्तब्रह्मणस्पतिसूक्त ऋङमंत्रेषु चैकेन नित्यं यजनम् शुक्रवार च तुर्थ्यौ प्रियंकरौ । बिन्दुत्रिकोणषट्कोणाष्टदलषोडशदलवृत्तत्रयभूपुरत्रययुतोयंत्रः । बिन्दौ तारो बीजम् त्रिकोणान्तः चत्वारो बीजाः । षट्कोणेषु षड्बीजाः । गामित्यादयः सन्धिषु । दळेषु शिष्टवर्णाः । अग्रेषु गायत्री । षोडशदळेषु ऋङमन्त्राः । मातृकाबीजपाशाङ्कुशा वृत्तेषु । भूपुरेषु यन्त्राङ्गानि । रमारमेशोमामहेशरतिकन्दर्पमहींवराहा प्रथमावृतिदेवताः । आमोदप्रमोदसुमुखदुर्मुखाऽविघ्नविघ्नकर्तारः द्वितीयावृतेः । अङ्गदेवतास्तृतीयस्य । तुरीयस्य मातरः । पंञ्चमस्य दिगीशाः तीव्राज्वालिन्याद्याः पीठशक्तयः । शूराद्याः द्वारदेवताः । आवाहनासनाद्युपचारैः कार्यं नित्यार्चनम् ।

गणेशार्चनपरःसर्वविघ्नैःप्रमुच्यते । सर्वसिद्धिं लभते । धर्मार्थकाममोक्षब्रह्मभूयानि लभते इति । य इमां वल्लभेशोपनिषदमधीते स सर्वविघ्नात प्रमुच्यते । सर्वाभीष्टं लभते । ब्रह्म प्राप्नोति । ब्रह्म प्राप्नोतीत्युपनिषत् ।। इति तुरीयोऽध्यायः ।।

।। समाप्तेयं वल्लभेशोपनिषत् ।।

गणेशप्रियसप्तमुद्रालक्षणानि ।।

ततो गणेशमुद्राणा उच्यन्ते लक्षणान्यथ—

उत्तानोर्ध्वमुखी मध्या सरला बद्धमुष्टिका ।
दन्तमुद्रा समाख्याता सर्वागमविशारदैः ।।

वाममुष्टेस्तु तर्जन्या दक्षमुष्टेस्तु तर्जनीम् ।
संयोज्यांगुष्ठकाग्राभ्यां तर्जन्यग्रे स्वके क्षिपेत् ।।

एषा पाशाह्वया मुद्रा विद्वद्भिः परिकीर्तिता ।
ऋज्वीञ्च मध्यमां कृत्वा तर्जनीं मध्यपर्वणि ।।

संयोज्यऽकुञ्चयेत् किंचित् मुद्रैषाङ्कुशसंज्ञिका ।
तर्जनीमध्यमासंधिनिर्गतांगुष्ठमुष्टिका ।।

अधोमुखी दीर्घरूपा मध्यमा विघ्नमुद्रिका ।
तले तलं तु करयोः तिर्यक्संयोज्यचांङ्गुलीः ।।

संहताः प्रसृताः कुर्यात् मुद्रा परशुसंज्ञिका ।
उर्ध्वास्यं दक्षिणं हस्तमानम्रविरलाङ्गुलिम् ।।

किंचिन्निम्नतलं कुर्यात् मुद्रैषा लड्डुकाभिधा ।
उत्तानवाममुष्टिस्तु बीजापूराह्वया मता ।।

दन्तपाशाङ्कुशविघ्नपरशुलड्डुकाह्वयाः ।
बीजापूराह्वया चेति गणेशस्य प्रिया मताः ।।

।। इति ।।

अष्टमातृकाध्यानम् ॥

ब्राह्मी स्वर्णसमा ध्येया मृगचर्मविभूषिता ।
अक्षमालाभये दण्डकुण्डिके दधती करैः ॥

त्रिशिखं परशुं हस्तैर्डमरुं नृकपालकम् ।
बिभ्राणां चन्द्रगौराङ्गीं माहेशीं भावयेच्छुभाम् ॥

गुणखट्वाङ्गदण्डाङ्कुशान् वहन्तीं कराम्बुजैः ।
इन्द्रगोपारुणां ध्यायेत् कौमारीं करुणालयाम् ॥

अरिशङ्खकपालानि घण्टां च करपङ्कजैः ।
बिभ्राणां वैष्णवीं ध्यायेन्नीलमेघसमप्रभाम् ॥

हलं च मुसलं दोर्भिर्दधानां खङ्गखेटकौ ।
वाराहीं भावयेच्छक्तिमञ्जनाद्रिसमप्रभाम् ॥


तोमराङ्कुशसद्वज्रविद्युद्युक्तकराम्बुजाम् ।
इन्द्राणीं भावयेन्मन्त्री नीलवर्णसुभूषणाम् ॥

धारयन्तीं शूलखड्गौ कपालं नृशिरः करैः ।
चामुण्डां शोणवर्णां च मुण्डमालायुतां स्मरेत् ॥

स्वर्णाभामक्षमालां च बीजापूरकपालके ।
पद्मं च दधतीं हस्तैर्महालक्ष्मीं स्मरेत्सुधीः ॥

॥ इति ॥

स्वस्तिक पद्मम् – Swastika Padmam



स्वस्तिकपद्मम् लेखन प्रकारः

1. प्रथमं तण्डुलरजसा चतुरश्रं विलिख्य
2. तन्मध्ये पूर्वं पश्चिमत एकां रेखां विलिख्य
3. तदुपरि दक्षिणोत्तरतश्च एकां रेखा विलिख्य
4. तत्र पूर्वपश्चिमतो या रेखा तस्याः पूर्वाग्रं किञ्चिद्दक्षिणतो गमयित्वा पूर्वचतुरश्ररेखया संयोजयेत् ॥
5. अस्या एव पश्चिमाग्रन्तु किञ्चदुत्तरतो गमयित्वा पश्चिमचतुरश्ररेखया संबध्नीयात् ।
6. दक्षिणोत्तरतो या रेखा तस्यास्तु दक्षिणाग्रं किञ्चित्पश्चिमतो गमयित्वा दक्षिणचतुरश्ररेखया संबध्नीयात् ॥
7. अस्या उत्तराग्रं तु किञ्चित्पूर्वतो गमयित्वा उत्तरचतुरश्र रेखया संबध्नीयात् ।

एवंविलिख्य ईशाननिर्ऋतिखण्डयोस्तण्डुलचूर्णानि प्रविकीर्य अग्निवायुखण्डयोस्तु रजनीचूर्णानि प्रविकिरेत ॥

एवं स्वस्तिक पद्मलेखन प्रकारः समाप्तम् ॥

"इति प्रपंचसारसार संग्रहे"

P.T.O.

Drawing of Swasthikapadmam

1. Take Rice floor and draw a square.
2. In the middle of it draw a line from East to West.
3. On that draw a line from South to North bisecting the East - West line.
4. Extend the Eastern end towards South and join it to the Square's Eastern side.
5. Extend Western end towards North and join it to the Square's western side.
6. Extend the South point of South North line towards West and join it to the Square's southern side.
7. Extend the North Point towards East and join it to the Square's Northern side.

Having drawn as above fill the North East block and South west block with Ricefloor (white) and fill the South East block and North west blocks with Turmeric powder (yellow)

From Prapancha Sara Sara Sangraham

।। होम प्रकरणम् ।।

अथ होमद्रव्याणि –

जपाद्दशांशहोमोऽष्टद्रव्यैः मिळितैः ।

मोदकपृथुकसलाजाः ससक्तवश्चेक्षुनाळिकेरफलाः ।
तिलाः कदळीफलसहितानीत्यष्टद्रव्याणि सम्प्रदिष्टानि ।।

अन्यैर्द्रव्यैश्चेत्

स्वर्णाप्त्यै मधुनाथ गव्यपयसा गोसिद्धये सर्पिषा
लक्ष्म्यै शर्करया जुहोतु यशसे दध्ना च सर्वर्धये ।
अन्नैरन्नसमृद्धये च सतिलैः द्रव्याप्तये तण्डुलैः
जातीभिः पतये कुसुम्भकुसुमैरश्वारिजैर्वाससे ।।
पद्मैर्भूपतिमुत्पलैः नृपवधूः तन्मन्त्रिणः कैरवैः
अश्वत्थादिसमिद्भिरग्रजमुखान् वर्णान् वधूः पिष्टजैः ।
पुत्तल्यादिभिरन्वहञ्च वशयेत् जुह्वन्ननावृष्टये
लोणैर्वृष्टिसमृद्धये च जुहुयान्मन्त्री पुनर्वेतसैः ।।

अयमर्थ :–

संख्यानुक्ते सहस्रं इति न्यायात् । एतैः उक्तद्रव्यैः सर्वं सहस्रसंख्यं तत्तत्प्रयोजनावाप्त्यै जुहुयात् । कुसुम्भाख्यंकुसुमं, अश्वारिः (करवीरं) उत्पलं (नीलोत्पलं) कैरवं (श्वेतोत्पलम्) अश्वत्थादिसमिधः । अश्वत्थ वट उदुम्बर प्लक्षाणां समिधः । अग्रजमुखाःवर्णाः ब्राह्मणादिचत्वारो वर्णाः । पिष्टजैः पुत्तल्यादिभिरिति पिष्टनिर्मिताभिः साध्यप्रकृतिभिः इत्यर्थः ।। एतैः

उक्तपद्मप्रभृतिभिः हुते भूपतिप्रभृतयस्तु उक्ताः साध्याः वशीभवन्ति इत्यभिप्रायः । लोणं (लवणं) तैः अनावृष्टये जुहुयात् । वैतसं वेतससमित् तैः वृष्टयर्थं जुहुयात् इत्यर्थः ॥

प्रत्येकमथवा मिश्रैः हुनेत् सर्वार्थसिद्धये । पूर्वोक्ताष्टद्रव्यैः इत्यर्थः ॥

भृगुवारे विशेषेण नारिकेलेन दूर्वया ।
आवत्सरं हुनेन्मन्त्री श्रियमायुश्च विन्दति ॥
अयुतं नियुतं वापि तिलदूर्वाज्यपायसैः ।
अपस्माराह्ववेतालाः सद्यो नश्यन्ति किं पुनः ॥
अपामार्गसमिद्धोमात् ग्रहा नश्यन्ति षण्मुखाः ।
पद्महोमेन साम्राज्यं लभते नात्र संशयः ॥
उत्पलैः वश्यमथवा रक्तपद्मेन वा हुनेत् ।
दध्ना सर्वसमृद्धिस्स्यात् धान्यैरन्नपतिर्भवेत् ॥
वृष्टिकामः प्रजुहुयात् वेतसानां समिद्वरैः ।
पायसं गुडसंमिश्रं कदलीफलसंयुतम् ॥
आज्याक्तं नालिकेरैश्च सर्वकामार्थसिद्धये ।
इति कल्पोक्तं किंचित् लिखितम् ॥

अष्टद्रव्यहोमप्रमाणम्–

मोदका अखण्डिता ग्रासमिताः ॥ पृथुकलाजसक्तवो मुष्टिपरिमिताः । इक्षुप्रमाणं श्लोक एवोक्तम् । नारिकेळं अष्टधा खण्डितम् तिलाः चुळुकप्रमाणः शतसङ्ख्याका वा कदळीफलमल्पं यद्यखण्डितं पृथु चेद्यथारुचि खण्डितम् ॥

तान्त्रिकनित्यहोम विधानम्

साधकः स्वस्तिपद्मं विरच्य तस्मिन् गणेशं साङ्गं सावरणं षोढशोपचारैः संपूज्य तदुत्तरतः लौकिकाग्निम् प्रतिष्ठाप्य । तस्मिन्नग्नौ साङ्गं सावरणं गणपतिं संपूज्य अष्टद्रव्यैः मध्वाज्यमिश्रितैः ग्रासमितैः त्रिसंख्यं पंचसंख्यं वा हुनेत् ।

तत्यथा ।।

---

1. श्रीगुरु स्तोत्रम्ः

आब्रह्म लोकात् अशोषा दालोकालोकपर्वतात् ।
येवसन्ति द्विजा देवास्तेभ्यो नित्यं नमाम्यहम् ।।

ओं नमो ब्रह्मादिभ्यो ब्रह्मविद्या संप्रदाय कर्तृभ्यो वंशर्षिभ्यो नमो गुरुभ्यः । सर्वोपप्लवरहित प्रज्ञानघन प्रत्यगर्थो ब्रह्मैवाहमस्मि सोहमस्मि ब्रह्माहमस्मि ।।

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयम् भैरवम्
सिद्धौघं वटुकत्रयं पदयुगं दूतीकृतं मण्डलम् ।
वीराद्यष्ट चतुष्क षष्टि नवकं वीरावली पञ्चकम्
श्रीमन्मालिनिमन्त्रराजसहितं वंदे गुरोर्मण्डलम् ।।

गुरुर्ब्रह्मा गुरुर्विष्णु र्गुरुर्देवो महेश्वरः ।।
गुरुस्साक्षात् परब्रह्मा तस्मै श्रीगुरवे नमः ।।

चिदानन्दमयीं नौमि वामोरुन्त्यस्त वल्लभां
मूर्ति श्रीविघ्नराजस्य दशहस्तां शुभाप्तये ॥
रमारमापतिमुखैः ऋध्यामोदादिभिस्तथा
षडङ्गैः मातृभिः दिक्पैः आवृतं सुमुखं भजे ॥

2. द्वारदेवता पूजा

श्रीं ह्रीं क्लीं भद्रकाल्यै नमः ॥ (दक्षभागे)

३ भैरवाय नमः ॥ (वामभागे)

३ लम्बोदराय नमः ॥ (ऊर्ध्वभागे)

3. तत्वाचमनम् –

ओं गं आत्मतत्वाय स्वाहा ॥
ओं गं विद्यातत्वाय स्वाहा ॥
ओं गं शिवतत्वाय स्वाहा ॥
ओं गं सर्वतत्वाय स्वाहा ॥

4. श्रीगुरुपादुका स्मरणं :–

5. घंटा पूजा :–

आगमर्थं च देवानां गमनार्थं च रक्षसाम् ।
कुर्याद घंटारवं तत्र देवताह्वानलाञ्छनम् ॥
॥ इति घंटानादं कृत्वा ।

6. सङ्कल्पः

शुल्काम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोप शान्तये ।।
मूलेन प्राणानायम्य ।
देशकालौ संकीर्त्य ॥

सकल वेदसार प्रणवाकारस्य सकल भुवन परिपालनाय ऊरीकृत दिव्य गजावतारस्य, दूरीकृताखिल प्रपंच्च मायाकारस्य, देहत्रयाणां गुणत्रयाणां, च मूल भूते, मूलाधार प्रथम चक्रे कृतालयस्य, सकललोक नायकस्य, इन्द्रादि देवतानां अग्रस्य, पृथिव्यादि पञ्चभूत स्वरूपस्य, सर्ववेदशास्त्र यज्ञ, मन्त्र तन्त्र धर्मकर्मादि साक्षिभूतस्य, संवत्सरादि सकलकाल रूपस्य, शरीरस्थित इन्द्रिय धातु रस वायु मनसादि अन्तः करणकार्य कारणस्य, सर्वज्ञत्व, सर्वव्यापकत्व सर्वशक्तत्व स्वरूपस्य, सर्वविघ्न विनाशकस्य, श्रीसिद्धलक्ष्मी सहित श्रीमहागणपति प्रसाद सिद्ध्यर्थं, सर्वविघ्न दोष परिहरणेन कृत-क्रियमाण करिष्यमाण सर्वपुण्य कर्मणां रक्षणेन यथा विधि शास्त्रोक्त फलोन्मुख कर्म संपूर्त्या समग्र फलावाप्त्यर्थं अमुक गोत्रोत्पन्न .... नक्षत्र .... राश्यैजातस्य .... शर्मणः .... सकुटुम्बस्य सपुत्र पौत्रकस्य मम / अस्य / यजमानस्य, क्षेम स्थैर्यवीर्य विजय अभय अयुः आरोग्य सिध्यर्थं महागणपति प्रसाद सिध्यर्थं महागणपति प्रसादेन सर्वविघ्न निवारणार्थं तन्त्रोक्त / दैवज्ञउक्त – विधानेन श्रीमहागणपति होमकर्म करिष्ये ।।

7. दीपपूजा

दीपदेवि महादेवि शुभं भवतु मे सदा ॥
यावत्पूजा समाप्तिः स्यात्तावत्प्रज्वल सुस्थिरा ॥
इति दीपे पुष्पाञ्जलिं दद्यात् ॥

8. मूलमन्त्रादि जपः

ऋष्यादि न्यासं कृत्वा –
यथाशक्ति जपमाचरेत ॥

9. कलश पूजा

कलशं गंधपुष्पाक्षतैः अलंकृत्य - संपूज्य - यथा
गंगायै नमः नर्मदायै नमः
यमुनायै नमः सिन्धवे नमः
गोदावर्यै नमः कावेर्यै नमः
सरस्वत्यै नमः

गंगेचयमुनेचै व गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरी जलेस्मिन् सन्निधिंकुरु ॥
आयान्तु श्रीमहागणपति ह्वनार्थं दुरितक्षयकारकाः ॥
मूलेन (8) अष्ट वारं अभिमन्त्र्य - धेनुमुद्रां प्रदर्श्य ;
तज्जलेन पूजोपकरणानि आत्मानं च प्रोक्षयेत् ॥

10. शङ्ख पूजा

शङ्खं च आधारं प्रोक्ष्य, अलंकृत्य, मण्डलोपरि संस्थाप्य ।
गायत्री मन्त्रेण जलं पूरयित्वा –
शङ्खाय नमः इत्यभ्यर्च्य, स्पर्शेण जपं कृत्वा,

शङ्खंचन्द्रार्क दैवत्यं वारुणं च अभिषेचनं ।
पृष्टे प्रजापतिस्तत् अग्रे गङ्गा सरस्वति ॥
त्वंपुरा सागरोत्पन्नः विष्णुना विदृतः करे ॥
पूजितः सर्व देवैश्च पाञ्चजन्य नमोस्तुते ॥
पाञ्चजन्याय विद्महे । पवन राजाय धीमहि ।
तन्नो शङ्खः प्रचोदयात् ॥

मूलेन 8 वारं जपित्वा - प्रोक्षणानि कृत्वा ॥

11. आत्म पूजा :—

1. आत्मने नमः
2. अन्तरात्मने नमः
3. परमात्मने नमः
4. ज्ञानात्मने नमः

12. पीठ पूजा :—

1. ३ तीव्रायै नमः
2. ३ ज्वलिन्यै नमः
3. ३ नन्दायै नमः
4. ३ भोगदायै नमः
5. ३ कामरूपिण्यै नमः
6. ३ उग्रायै नमः
7. ३ तेजोवत्यै नमः
8. ३ सत्यायै नमः
9. ३ विघ्ननाशिन्यै नमः
10. ३ सर्वशक्ति कमलासनाय नमः

1. ३ धर्माय नमः
2. ३ ज्ञानाय नमः
3. ३ वैराग्याय नमः
4. ३ ऐश्वर्याय नमः
5. ३ अधर्माय नमः
6. ३ अज्ञानाय नमः
7. ३ अवैराग्याय नमः
8. ३ अनैश्वर्याय नमः

13. ध्यानं, आवाहनादि उपचारः

त्रिखंड मुद्रामण्डित शिखण्डे कुसुमाञ्जलौ हस्ते समानीय–बीजापूर गदेक्षुकार्मुक रुजा........... इष्टार्थदः ॥

गणानांत्वा गणपतिगुँ........... सादनम् ॥ मूलम इति ध्यात्वा, अस्मिन स्वस्ति पद्मे/यन्त्रे/अग्ने ध्यायामि - आवाहयामि ।

आवाहनादि, षडङ्ग, गणेशप्रिय सप्त मुद्रां प्रदर्श्य ॥

(दन्त, पाश, अङ्कुश, विघ्न, परशु, लड्डुक, बीजापूर-सप्तमुद्राः) यथा

1.	३	आसनं	कल्पयामि	नमः
2.	३	पाद्यं	,,	,,
3.	३	अर्घ्यं	,,	,,
4.	३	आचमनीयं	,,	,,
5.	३	स्नानं	,,	,,
6.	३	वस्त्रोत्तरीयम्	,,	,,
7.	३	भूषणं	,,	,,
8.	३	गन्धम्	,,	,,
9.	३	पुष्पम्	,,	,,

14. अर्चनादि :—

षोडशनामानिः (16)

1	श्रीं ह्रीं क्लीं	सुमुखाय	नमः ॥
2	३	एकदन्ताय	नमः ॥
3	३	कपिलाय	नमः ॥
4	३	गजकर्णकाय	नमः ॥

5	श्रीं ह्रीं क्लीं	लम्बोदराय	नमः	॥
6	३	विकटाय	नमः	॥
7	३	विघ्नराजाय	नमः	॥
8	३	गणाधिपाय	नमः	॥
9	३	धूमकेतवे	नमः	॥
10	३	गणाध्यक्षाय	नमः	॥
11	३	फालचन्द्राय	नमः	॥
12	३	गजाननाय	नमः	॥
13	३	वक्रतुण्डाय	नमः	॥
14	३	शूर्पकर्णाय	नमः	॥
15	३	हेरम्बाय	नमः	॥
16	३	स्कन्दपूर्वजाय	नमः	॥

एकविंशतिनामानिः (21)

1	गणंजयाय	नमः	12	निधये	नमः
2	गणपतये	,,	13	सुमंगलाय	,,
3	हेरम्बाय	,,	14	बीजाय	,,
4	धरणीधराय	,,	15	आशापूरकाय	,,
5	महागणपतये	,,	16	वरदाय	,,
6	लक्षप्रदाय	,,	17	शिवाय	,,
7	क्षिप्रप्रसादनाय	,,	18	काश्यपाय	,,
8	अमोघसिद्धये	,,	19	नन्दनाय	,,
9	अमिताय	,,	20	वाचासिद्धाय	,,
10	मन्त्राय	,,	21	ढुंढिविनायकाय	
11	चिन्तामणये	,,			

15. आवरण पूजा :—

मूलं० श्री महागणपति श्री पादुकां पूजयामि नमः (दशवारं)।

1	३	ओं गां	हृदयाय नमः	। हृदयशक्ति	श्री०	पा०	पू० नमः
2	३	श्रीं गीं	शिरसे स्वाहा	।। शिरश्शक्ति	,,	,,	,,
3	३	ह्रीं गूं	शिखायै वषट्	।। शिखाशक्ति	,,	,,	,,
4	३	क्लीं गैं	कवचायहुं	।। कवचशक्ति	,,	,,	,,
5	३	ग्लौं गौं	नेत्रत्रयाय वषट्	।। नेत्रशक्ति	,,	,,	,,
6	३	गं गः	अस्त्राय फट्	।। अस्त्रशक्ति	,,	,,	,,

गुरुमण्डलम् :—

1	३	विनायक सिद्धाचार्य	श्री० पा०	पू० नमः
2	३	कवीश्वर	,,	,,
3	३	विरूपाक्ष	,,	,,
4	३	विश्व	,,	,,
5	३	ब्रह्मण्य	,,	,,
6	३	निधीश	,,	,,
7	३	गजाधिराज	,,	,,
8	३	वरप्रद	,,	,,
9	३	विजय	,,	,,
10	३	दुर्जय	,,	,,
11	३	जय	,,	,,
12	३	दुःखारि	,,	,,
13	३	सुखारि	,,	,,
14	३	परमात्म	,,	,,

15	३	सर्वभूतात्म सिद्धाचार्य	श्री० पा०	पू० नमः
16	३	महानन्द	,,	,,
17	३	फालचन्द्र	,,	,,
18	३	सद्योजात	,,	,,
19	३	वुद्ध	,,	,,
20	३	शूर	,,	,,
21	३	परमेष्टि गुरु		,,
22	३	परम गुरु		,,
23	३	स्वगुरु		,,

प्रथमावरणम् :—

1	३	श्री श्रीपति	श्री० पा०	पू० नमः
2	३	गिरिजा गिरिजापति	,,	,,
3	३	रति रतिपति	,,	,,
4	३	महो महीपति	,,	,,

द्वितीयावरणम् :—

1	३	ऋद्ध्यामोद	श्री० पा०	पू० नमः
2	३	समृद्धि प्रमोद	,,	,,
3	३	कान्तिसुमुख	,,	,,
4	३	मदनावति दुर्मुख	,,	,,
5	३	मदद्रवाविघ्न	,,	,,
6	३	द्राविणीविघ्नकर्तृ	,,	,,
7	३	वसुधारा शङ्खनिधि	,,	,,
8	३	वसुमति पद्मनिधि	,,	,,

तृतीयावरणम् :—

1.	३	ओं गां	हृदयशक्ति	श्रीं० पा०	पू० नमः
2.	३	श्रीं गीं	शिरश्शक्ति	,,	,,
3.	३	ह्रीं गूं	शिखाशक्ति	,,	,,
4.	३	क्लीं गैं	कवचशक्ति	,,	,,
5.	३	ग्लौं गौं	नेत्रशक्ति	,,	,,
6.	३	गं गः	अस्त्रशक्ति	,,	,,

चतुर्थावरणम् :—

1. ३ आं ब्राह्मि पू० नमः
2. ३ ईं माहेश्वरी ,,
3. ३ ऊं कौमारी ,,
4. ३ ॠं वैष्णवी ,,
5. ३ लूं वाराही पू० नमः
6. ३ ऐं माहेन्द्री ,,
7. ३ औं चामुण्डा ,,
8. ३ अः महालक्ष्मि ,,

पञ्चमावरणम् :—

1. ३ लां इन्द्राय वज्रहस्ताय सुराधिपतये ऐरावतवाहनाय सपरिवाराय नमः

इन्द्र श्रीं० पा० पू० नमः

2. ३ रां अग्नये शक्तिहस्थाय तेजोधिपतये अजवाहनाय सपरिवाराय नमः

अग्नि श्रीं० पा० पू० नमः

3. ३ डां यमाय दण्डहस्थाय प्रेताधिपतये महिषवाहनाय सपरिवाराय नमः

यम श्रीं० पा० पू० नमः

4. ३ क्षां निर्ऋतये खड्गहस्थाय रक्षोधिपतये नरवाहनाय सपरिवाराय नमः

निर्ऋति श्रीं० पा० पू० नमः

5. ३ वां वरुणाय पाशहस्थाय जलाधिपतये मकरवाहनाय सपरिवाराय नमः

वरुण श्रीं० पा० पू० नमः

6. ३ यां वायवे ध्वजहस्थाय प्राणाधिपतये रुरुवाहनाय सपरिवाराय नमः

वायु श्रीं० पा० पू० नमः

7. ३ सां सोमाय शङ्खहस्थाय नक्षत्राधिपतये अश्ववाहनाय सपरिवाराय नमः

सोम श्रीं० पा० पू० नमः

8. ३ हां ईशानाय त्रिशूलहस्थाय विद्याधिपतये वृषभवाहनाय सपरिवाराय नमः

ईशान श्रीं० पा० पू० नमः

3. मूलं श्रीं प० - पू० - नमः

आवरण देवता सहित महागणपतये नमः समस्तोपचारान् समर्पयामि ।।

धूपं

दशाङ्गं गुग्गुलोपेतं सुगन्धं सुमनोहरम् ।
धूपं दास्यामि देवेश गृहणत्वं गजानन ।।
महागणपतये नमः धूपमाघ्रापयामि ।।

दीपं

साज्यं त्रिवर्त्ती संयुक्तं वह्निना योजितंमया ।
गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापहम् ॥

धूप दीपानन्तरं आचमनीयं समर्पयामि ॥

1. दन्त 2. पाश 3. अङकुश 4. विघ्न 5. परशु 6. लड्डुक 7. बीजापूर - गणेशप्रिय सप्त मुद्रां प्रदर्शयेत ॥
(मुद्रालक्षणं अस्मिन ग्रंथे अन्यत्र वर्तते, द्रष्टुं ज्ञातव्यम्)

नैवेद्यम् :– निवेदयेत् ॥

कर्पूर नीराजनम् :–

नीराजनं सुमङ्गल्यं सर्वमंगलकारणम्
गृहाण परया भक्त्यार्पितं ते गणाधिप ॥

कर्पूरनीरजनं समर्पयामि ॥

मंत्रपुष्पंम् :— समर्पयामि

नमस्कारान :— प्रदक्षिण नमस्कारान् समर्पयामि

प्रार्थना स्तोत्रम् :–

गजाननं भूतगणाधिसेवितम्
कपित्थ जम्बूफलसार भक्षितम् -
उमासुतम् शोकविनाश कारणम्
नमामि विघ्नेश्वर पाद। पङ्कजम् ॥

वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभा
अविघ्नं कुरुमे देव सर्वकार्येषु सर्वदा ॥

पूजा समाप्तम्

होम प्रारम्भ :-

स्थण्डिलं / कुण्डम् परिकल्प्य, मूलेन निरीक्ष्य, फट् इति सामान्योदकेन प्रोक्ष्य, कुशेन ताडइत्वा, "हुं" इत्यवकुण्ठ्य ।

भूर्भुवस्सुवरों इति अग्निं प्रतिष्टाप्य - अग्नं प्रज्वाल्य ।

अग्निमुखान्तम् :-

अथ शृक्शृवौ अग्नौ प्रतितप्य दर्भैः समृज्य, पुनः प्रतितप्य; सासान्योदकेन प्रोक्ष्य, निधाय, दर्भान अद्भिः सम्स्पृश्य, अग्नौ प्रहरति ।

अथ आज्य पात्रे आज्यं निरूप्य, उदीचोङ्गारान् निरूह्य, तेषु आज्यमधिश्रित्य, मूलेन प्रोक्ष्य ।

द्वे दर्भाग्रे प्रच्छित्य प्रक्षाल्य, प्रत्यस्य । ज्वलता तृणेन अवद्योत्य, त्रिः पर्यग्निकृत्वा उदगुद्वास्य । अङ्गारान्प्रत्यूह्या ।। आज्यस्थालीं स्वपुरतो निधाय ।

आज्ये "हुं" इति अवकुण्ठ्य, "फट" इति अस्त्रेण संरक्ष्य, धेनु योनि मुद्रां प्रदर्श्य ।

द्वौ दर्भौ प्रादेशमात्रे पवित्रे कृत्वा, उदगग्राभ्यां पुनराहारमाज्यं त्रिरुत्पूय, पवित्रग्रन्थिं विस्रस्य । अपउपस्पृश्य, प्रागग्रं अग्नौ प्रहरति ।

आज्यं मूलेन सप्तवार मभिमन्त्र्य ।

अथाग्निं परिषिञ्चति –

अदितेनुमन्यस्व
अनुमतेनुमन्यस्व
सरस्वतेनुमन्यस्व
देव सवितः प्रसुव - इति परिषिञ्चय ।

मूलमंत्रमुच्चार्य - अस्मिन् अग्नौं सिद्धलक्ष्मीसहित श्री महागणपतिं साङ्गम्, सपरिवारम्, सावरणम् आवाहयामि नमः।

इति आवाहन संस्थापन सन्निधापन सन्निरुद्ध सम्मुखी अवकुण्ठनादि षण्मुद्राः प्रदर्श्य । वन्दन धेनु योनि मुद्राश्च प्रदर्शयेत् ॥

अथ हृदयादि षडङ्ग मुद्राः प्रदर्शयेत् । महागणपति प्रिय पाशादि सप्तमुद्राः प्रदर्शयेत् ॥

अथ अग्नौ, महागणपतिं गन्ध पुष्पादि पञ्चोपचारैः संपूज्य ।

अथ मूलं......... स्वाहा दशवारं आज्येन जुहुयात ।

अथ षडङ्गदेवता मपि आज्येन स्वाहान्तं जुहुयात ॥

अथ गुरुमण्डल देवता मपि स्वाहान्तं आज्येन जुहुयात् ।

अथ पूर्वोक्त महागणपति पञ्चावरण देवताः स्वाहान्तेन प्रत्येकं जुहुयात् ॥

पुनः मूलेन दशवारं आज्यहुतिं दद्यातं ।

अथः अष्टद्रव्य होमः –

अष्टद्रव्यैः मध्वाज्य मिश्रितैः ग्रासमितैः, त्रिसंख्यं पञ्चसंख्यं वा जुहुयात् ।

संभृताष्टद्रव्यं त्रिधा कृत्वा एकमंशं निवेदयेत्, द्वावंशौ जुहुयात् ।

तत्यथा—

३ मूलं० महागणपतये स्वाहा ।

सतिविभवे—

मोदकं, दूर्वा (त्रयम्) स्वेतार्कसमित्, पद्म पुष्पम्, आज्यम् एतैः

पृथक पृथक, यथा शक्ति, अष्टाविंशति, (28) एकपंचाशात् (51) अष्टोत्तरशत (108) एतदन्यतम संख्यया जुहुयात । अत्र नारिकेल त्वगादीन् मिलितान् "जातवेदसे" इति मन्त्रेण अग्नौ प्रक्षिपेत् ॥

ततः शृतपर्यन्तम् - मूलजपं, चतुरावृत्तितर्पणं, अथर्वशीर्ष पारायणं च कुर्यात् ।

पूर्णाहुति :-

ततो होमावशिष्टेनाज्येन सृचं पूरइत्वा फलं पुष्पं निधाय सृवेणाच्छाद्य-

पूर्ण मदः पूर्ण मिदं पूर्णात् पूर्ण मुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवाव शिष्यते ॥

इतः पूर्वं प्राण बुद्धि देह धर्माधिकारतः जाग्रत स्वप्न सुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्थाभ्यां पद्भ्यां उदरेण शिश्ना यत् स्मृतम् यदुक्तम् यत्कृतम् तत् सर्वं ब्रह्मार्पणं भवतु स्वाहा । मूलेन वैषट ॥

॥ इति उत्थितो जुहुयात् ॥

उत्तर परिषेचनम् -

अदितेऽन्वमङ्गुस्था ।
अनुमतेऽन्वमङ्गुस्था ।
सरस्वतेऽन्वमङ्गुस्था ।
देव सवितः प्रासावीः ।

अग्नौ यन्त्रे च उपचारान कृत्वा निवेदनम् कुर्यात् ।

बलिदानम् -

३ महागणपति पार्षदवेभ्यो नमः बलिं समर्पयामि ।

कर्पूरनीराजनम् –

मन्त्रपुष्पम् –

३ ओं तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्तिः प्रचोदयात ।।

पुष्पांजलिः –

३ नमो नरगजाकृते नलिनवर्ण देहाकृते
नरासुरसुरेडित श्रुतिशिरोद्यदङ्घ्रिद्वये ।
नगेश्वरवरात्मजानयन पद्मभानो नमः
नतार्तिहरणाङ्घ्रियुक् कलितयेष पुष्पाञ्जलिः ।।

छत्रं, चामरं, वाद्यं, नृत्यादि समस्त राजोपचार भक्त्यो-पचारान समर्पयामि ।

उद्वासनम् -

गृहीत पुष्पं हस्तं, अग्नेः पुरतः त्रिः प्रदक्षिणं आवृत्य, तेजोरूप मग्निं स्वस्मिन् लीनं भावइत्वा, पुष्पाणि यंत्रे स्थापयेत् ।

तदनन्तरं यथा शक्ति मूलमन्त्र जपं कृत्वा, उत्तरन्यासान विधाय दिग्विमूकं कुर्यात् ।

गणानान्त्वा - इति मन्त्रं, भूर्भुवस्युवरों - इति व्यहृतिः जपित्वा अग्निरूपं महागणपतिं यथास्थानं प्रतिष्टापयामि इति उद्वासयेत् । ततो यन्त्रस्थ महागणपतिं यथास्थानं प्रतिष्टापयामि इति उद्वासयेत ।

ततः शङ्खतीर्थं प्रसादं, रक्षा, होमभस्मं च स्वीकुर्यात ।

समर्पणं -

कायेनवाच मनसेन्द्रियैर्वा बुध्यात्मनावा प्रकृतैस्वभावात्
करोमियद्यत्सकलं परस्मैनारायणायेति समर्पयामि ॥

मया अनुष्टित महागणपति पूजा होमाख्य कर्मद्वयं तत्सर्वं ब्रह्मार्पण मस्तु ॥

इति शिवम
होम विधानम् समाप्तम्

श्री महागणपति होमः षट्पात्रविधानम्

अथ सङ्कल्प :-

सर्ववेदसार प्रणवाकारस्य, सकल भुवन परिपालनाय, ऊरीकृतदिव्य गजावतारस्य, दूरीकृताखिल प्रपञ्च मायाकारस्य, देहत्रयाणां गुणत्रयाणां च मूलभूते, सकल लोक नायकस्य, इन्द्रादि देवतानां अग्रस्य, पृथिव्यादि पञ्चभूत स्वरूपाय, सकलवेद शास्त्र यज्ञ मन्त्र तन्त्र धर्म कर्मादि सारभूतस्य, संवत्सरादि सकलकाल स्वरूपस्य, शरीरस्थित इन्द्रिय धातु रस वायु मनसादि अन्तः-करण कार्य कारणस्य सर्वज्ञत्व, सर्वव्यापकत्व, सर्वशक्तत्व स्वरूप, सर्वविघ्नदोष परिहरणेन, कृत क्रियमाण करिष्यमाण सर्व पुण्य कर्माणां रक्षणेन यथाविधि शस्त्रोक्त फलोन्मुख कर्म संपूर्त्या

समग्र फलावाप्यर्थं........

श्री महागणपति होम कर्म करिष्ये ॥

पूजामण्डपस्य ईशानदिग्भागे चतुरश्राकाकार हस्तायाम-मङ्गुष्टोन्नतं स्थण्डिलं परिकल्प्य, मूलेन निरीक्ष्य, फट इति सामान्यार्घ्योदकेन प्रोक्ष्य, कुशेन ताडयित्वा, हुं इत्यवगुण्ठ्य, स्थण्डिलोपरि मध्यम दक्षिणोत्तरेषु क्रमेण प्रागग्रास्तिस्रोरेखा विलिख्य, तदुपरि मध्य पश्चिम पुर्वेषु उदगग्रास्तिस्रोरेखा विलिख्य तास रेखास उल्लेख क्रमैण ।

श्रीं ह्रीं क्लीं ब्रह्मणे नमः । ३ यमाय नमः ।
३ सोमाय नमः । ३ रुद्राय नमः ।
३ विष्णवे नमः । ३ इन्द्राय नमः ।
इत्यभ्यर्चयेत् ॥

ततः स्वदेहे षडङ्गन्यासं कुर्यात् ।

यथा :—

श्रीं ह्रीं क्लीं सचस्रार्चिषे हृदयाय नमः ।
३ स्वस्तिपूर्णाय शिरसे स्वाह ।
३ उत्तिष्टपुरुषाय शिखायै वषट् ।
३ धूमव्यापिने कवचाय हुम् ।
३ सप्तजिह्वाय नेत्रत्रयाय वौषट् ।
३ धनुर्धराय अस्राय फट् ॥

अनेनैव षडङ्गेन अग्नीशासुरवायु कोणेषु मध्ये दिक्षु च स्थण्डिलं अभ्यर्च्य, तत्र अष्टकोण त्रिकोणात्मकं अग्निचक्रं प्रवेशरीत्या विलिख्य, त्रिकोणे दिगष्टकं विभाव्य, तत्र स्वाग्रादि-प्रादक्षिण्येन दिक्षु मध्ये च क्रमात्-तत्र ।

३ पीतायै नमः ।
३ श्वेतायै नमः ।
३ अरुणायै नमः ।
३ कृष्णायै नमः ।
३ धूम्रायै नमः ।
३ तीव्रायै नमः ।
३ स्फुलिङ्गिन्यै नमः ।
३ रुचिरायै नमः ।
३ ज्वालिन्यै नमः ।

इति पीठशक्तीः समर्चयेत् ॥

ततः पीठमध्ये :–

३ तं तमसे नमः ।
३ रं रजसे नमः ।
३ सं सत्वाव नमः ।
३ आं अत्मने नमः ।
३ अं अन्तरात्मने नमः ।
३ पं परमात्मने नमः ।
३ ह्रीं ज्ञनात्मने नमः ।

इति पूजयेत् ॥

ततस्त्रिकोणे :—

३ ओं ह्रीं वागीश्वराभ्यां नमः ॥

इति मन्त्रेण, जनिष्यमाण वह्नेः पितरौ वागीश्वरीवागीश्वरौ सम्पूज्य, तयोर्मियुतीभावं भावइत्वा,

अरणेः, सूर्यकान्ताद्वा वह्निमुत्पाद्य द्विज गृहाद्वा आनीय मृत्पात्रे ताम्रपात्रेवा अग्निं स्थण्डिलाद् बहिः अग्नेय्य ऐशान्यां नैऋत्यां वा दिशि निधाय, तन्मध्यात् क्रव्यादांश एकमङ्गारं फट् इति अस्त्रमन्त्रेण नैर्ऋत्यां परित्यज्य, अग्निं मूलेन वीक्ष्य, अस्त्रेण प्रोक्ष्य, अस्त्रेण कुशैः ताडयित्वा कवचेनावकुण्ठ्य, धेनुयोनिमुद्रे प्रदर्श्य, ततः–

३ ओं रं वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहा–

इति मूलाधारोद्गतं संविदग्नि ललाटनेत्रद्वारा निर्गमय्य, तं वागीश्वर बीजस्य वागीश्वरी योन्यां प्रवेश बुध्द्या बाह्याग्नौ संयोजयेत् ।।

ततः ३ कवचाय हुम्, इति मन्त्रेण इन्धनैराच्छाद्य,

३ अग्निं प्रज्वलितंवन्दे जातवेदं हुताशनम् सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ।। इतिउपस्थय,

३ उत्तिष्ट पुरुष हरितपिङ्गल लोहिताक्ष सर्वकर्माणि साधय मे देहि दापय स्वाहा–इति वह्निमुत्याप्य,

ततः "ओं ह्रीं" इति स्थण्डिलोपरि अग्निं त्रिवारं भ्रामयित्वा, स्थण्डिले स्थापयेत् ।।

३ "चित्पिङ्गल हन हन दह दह पच पच सर्वज्ञापय स्वाहा ।।"
इति प्रज्वाल्य, ज्वालिनीमुद्रां प्रदर्य,

(प्रक्तोयं निधाय) वागीश्वरीगर्भे धृतं ध्यात्वा ।।

३ ऐं नमः अस्य होमाग्नेः गर्भाधानकर्म कल्पयामि नमः,

३ ऐं नमः अस्य होमाग्नेः पुंसवनकर्म कल्पयामि नमः,

३ ऐं नमः अस्य होमाग्नेः सीमन्तोन्नयनकर्म कल्पयामि नमः,

३ ऐं तमः अस्य होमाग्नेः जातकर्म कल्पयामि नमः,

३ ऐं नमः अस्य होमाग्नेः महागणप -
त्यग्निरिति नामकरणकर्म कल्पयामि नमः,

३ ऐं नमः अस्य महागणपत्यग्नेः
अन्नप्राशनकर्म कल्पयामि नमः,

३ ऐं नमः अस्य महागणपत्यग्नेः
चौलकर्म कल्पयामि नमः,

३ ऐं नमः अस्य महागणपत्यग्नेः
उपनयनकर्म कल्पयामि नमः,

३ ऐं नमः अस्य महागणपत्यग्नेः
गोदानकर्म कल्पयामि नमः,

३ ऐं नमः महागणपत्यग्नेः
विवाहकर्म कल्पयामि नमः

।। इति तत्तत्कर्मभावनया अक्षतैरभ्यर्चयेत् ।।

।। परिस्तरणं - पात्रासाधनम् ।।

ततः सामन्यार्घ्योदकेन अग्निं मूलेन परिषिच्य, अग्निमलंकृत्य, प्रागग्रै रुदगग्रैश्च कुशैः परिस्तीर्य, उत्तरतो दर्भानास्तीर्य, दर्विं आज्यस्थालीं प्रोक्षणीं प्रणीतां इतरदर्वीं इध्मं च द्वन्द्वन्यञ्चि (अधोबिलं) पात्राणि सादयित्वा, द्वौ दर्भौ प्रादेशमात्रे पवित्रे कृत्वा, अद्भिरनुमृज्य, सामान्यार्घ्योदकेन षट् पात्राणि प्रोक्ष्य, प्रोक्षणी पात्रमादाय पुरतो निधाय, अक्षतैः सह सामान्यार्घ्योदकेन पूरयित्वा, हस्तयोः अङ्गुष्टोपकनिष्टिकाभ्यां उदगग्राभ्यां, पवित्राभ्यां

मूलेन त्रिः प्रागुत्पूय, मूलेन सप्तधा अभिमन्त्र्य, उत्तानानि पात्राणि कृत्वा, इध्मं विस्रस्य त्रिः प्रोक्ष्य, प्रोक्षणीपात्रं दक्षिणतो निधाय, प्रणीतापात्रमादाय षुरतो निधाय पवित्रे तस्मिन् निधाय, अक्षतैः सह अंकुशमुद्रया मूलेन सामान्यार्घ्योदकेन पूरयित्वा पूर्ववदुत्पूय, घ्राणसममुद्धृत्य, पात्रासादानादुत्तरतो दर्भेषु सादयित्वा।

"वरूणाय नमः" इति गन्धपुष्पाक्षतैरभ्यर्च्य, दर्भैः प्रच्छाद्य, पवित्रे आज्यपात्रे निधाया, अग्नेः दक्षिणातो ब्रह्माणं दर्भेषु निषाद्य ॥

ब्रह्मवरणं -

"अस्मिन् श्रीमहागणपतिहोमकर्मणि ब्रह्माणं त्वां वृणे" -
ओं ब्रह्मणे नमः सकलाराधनैः स्वर्चितम्

॥ इति ब्रह्मवरण पूजने कुर्यात् ॥

अपरेणाग्नि पवित्रान्तर्हितायां आज्यस्थाल्यां आज्यं निरूप्य उदीचोऽङ्गारान् निरूह्य, तेषु आज्यं अधिश्रित्य, ज्वलता तृणेन, अवद्योत्य द्वे दर्भाग्रे प्रच्छिद्य प्रक्षाल्य प्रत्यस्य त्रिः पर्यग्निकृत्वा उदगुद्वास्य अङ्गारान्प्रत्यूह्य, आज्यस्थालीं स्वपुरतो निधाय, मूलेन सप्तवारमभिमन्त्र्य, ईक्षणप्रोक्षणताडनावकुण्ठनानि कृत्वा, उदगग्राभ्यां पवित्राभ्यां पुनराहारमाज्यं त्रिरुत्पूय, पवित्रग्रन्थिं विस्रस्य, अपउपस्पृश्य, प्रागग्रं अग्नौ प्रहरति ।

अथ दर्व्यौ अग्नौ प्रतितप्य दर्भैः संमृज्य, पुनः प्रतितप्य, प्रोक्ष्य, निधाय, दर्भान् अद्भिः संस्पृश्य, अग्नौ प्रहरति ॥

इध्ममादाय परिधीन् परिदधाति-स्थूलं उदगग्रं पश्चात्, अणीयांसं दीर्घं प्रागग्रं दक्षिणतः, अणिष्टं ह्रसिष्टं प्रागग्रं उत्तरतः, अग्निपरिस्तरणयोर्मध्ये अन्योन्यसंस्पृष्टान् विधाय, मध्यमं परिधिं दक्षिणहस्तेनोपस्पृश्य, अग्नेः दक्षिणपूर्व-उत्तरपूर्वदेशयोः आधारसमिधौ निधाय अथाग्निं परिषिञ्चति—

अदितेऽनुमन्यस्व,

अनुमतेऽनुमन्यस्व,

सरस्वतेऽनुमन्यस्व,

देव सवितः प्रसुव, इति परिषिच्य, अग्निमलंकृत्य, इध्ममादाय, द्विरभिघार्य, मूलमध्ययोः मध्यं मृगीमुद्रया गृहीत्वा,

"अस्मिन् श्रीमहागणपतिहोमकर्मणि ब्रह्मन् इध्मं आधास्ये" इति ब्रह्माण मनुज्ञाप्य, "ओं आधत्स्व" इति तेन अनुज्ञातः, हस्ताभ्यां इध्मं आदधाति। स्रुवेण आज्य मादाय तूष्णीं आघारावाघारयति ।। यथा —

(इतरदर्व्या) वायव्यादाग्नेयान्तं - स्वाहा। प्रजापतय इदं न मम।

(प्रधानदर्व्या) नैरृत्यादीशानान्तं - स्वाहा। इन्द्रायेदं न मम।

(उत्तरार्धपूर्वार्धे) अग्नये स्वाहा। अग्नय इदं।

(दक्षिणार्धपूर्वार्धे) सोमाय स्वाहा। सोमायेदं।

(समं पूर्वेण मध्ये) अग्नये स्वाहा। अग्नय इदम् ।।

आरम्भप्रभृति एतत्क्षणपर्यन्तं मध्ये सम्भावितसमस्त दोष-प्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि। ओं भूर्भुवः सुवः स्वाहा। प्रजापतय इदम् ।।

अथाग्निंध्यायेत् -

त्रिणयनमरुणप्ताबद्धमौलिं सुशुक्लां-
शुकमरुणमनेकाकल्पमम्भोजसंस्थम् ।
अभिमतवरशक्ति स्वस्तिकाभीतिहस्तं
नमत कनकमालालंकृतांसं कृशानुम् ॥

अथ अष्टकोणे स्वाग्रादिप्रादक्षिण्येन–

1. ३ जातवेदसे नमः । 2. ३ सप्तजिह्वाय नमः ।
3. ३ हव्यवाहनाय नमः । 4. ३ अश्वोदरा नमः ।
5. ३ वैश्वानराय नमः । 6. ३ कौमारतेजसे नमः ।
7. ३ विश्वमुखाय नमः । 8. ३ देवमुखाय नमः ।

इति अभिपूज्य

षट्कोणे षडङ्गं यथा–

३ सहस्रार्चिषे हृदयाय नमः ।
३ स्वस्तिपूर्णाय शिरसे स्वाहा ।
३ उत्तिष्टपुरुषाय शिखायै वषट् ।
३ धूमव्यापिने कवचाय हुम् ।
३ सप्तजिह्वाय नेत्रत्रयाय वौषट् ।
३ धनुर्धराय अस्त्राय फट् । ॥ इत्यभ्यर्च्य ॥

त्रिकोणे -

३ ओं वैश्वानर जातवेद इहावह,
लोहिताक्ष सर्वकर्माणि साधय स्वाहा ।
इति मन्त्रेण अग्निं पुष्पाक्षतैः अर्चयेत ॥

अथ अग्नेः सप्तजिह्वासु एकैकां आज्याहुतिं कुर्यात् ।। यथा

३ हिरण्यायै नमः स्वाहा - हिरण्याया इदं न मम (ऐशान्यां)

३ कनकायै " " कनकाया " " (प्राच्यां)

३ रक्तायै " " रक्ताया " " (आग्नेय्यां)

३ कृष्णायै " " कृष्णाया " " (नैर्ऋत्यां)

३ सुप्रभायै " " सुप्रभाया " " (पश्चिमायां)

३ अतिरिक्तायै " " अतिरिक्ताया " " (वायव्ययां)

३ बहुरूपायै " " बहुरूपाया " " (मध्ये)

ततस्तिस्त्र आहुतीर्जुहुयात् ।। यथा–

३ वैश्वानर जातवेद इहावह लोहिताक्ष
सर्वकर्माणि साधय स्वाहा — अग्नय इदम्

३ उत्तिष्टपुरुष हरितपिङ्गल लोहिताक्ष सर्वकर्माणि
साधय मे देहि दापय स्वाहा — अग्नय इदम् ।

३ चितिपिङ्गल हन हन दह दह पच पच
सर्वज्ञाज्ञापय स्वाहा — अग्नय इदम् ।।

अथ अग्नेर्मध्यभागे स्थितायां दक्षिणोत्तरायतायां बहुरूपाख्य-जिह्वायां श्री महागणपतिं आवाह्या ।। यथा–

(त्रिखण्डमुद्रामण्डित शिखण्डे कुसुमगर्भितेऽञ्जलौ हस्ते समानीय)

ध्यानं—

बीजापूर गदेक्षुकार्मुकरुजा चक्राब्ज पाशोत्पल -
व्रीह्यग्रस्वविषाणरत्न कलशप्रोद्यत्कराम्भोरुहः ।
ध्येयो वल्लभया सपद्म करयाश्लिष्टोज्वलद् भूषया
विश्वोत्पत्ति विपत्ति संस्थितिकरो विघ्नेश इष्टार्थदः ॥

इति ध्यात्वा - मूलं उच्चार्य - श्री सिद्धलक्ष्मी सहित श्री महागणपति साङ्गम् सपरिवारम् सावरणम् आवाहयामि नमः ।
इति आवाहनादि षण्मुद्राः वंदन, धेनु - योनि मुद्राश्च प्रदर्शयेत ॥
अथ हृदयादि षडङ्गमुद्राः प्रदर्शयेत ॥
अथ महागणपति प्रिय पाशादि सप्तमुद्राः प्रदर्शयेत ॥
अथ उपचारमन्त्रैः गन्धादीन् पञ्चोपचारान् आचर्य ॥

अथ पीठशक्तिं अर्चयेत् । यथा-

1. ३ तीव्रायै नमः
2. ३ ज्वालिन्यै नमः
3. ३ नन्दायै नमः
4. ३ भोगदायै नमः
5. ३ कामरूपिण्यै नमः
6. ३ उग्रायै नमः
7. ३ तेजोवत्यै नमः
8. ३ सत्यायै नमः
9. ३ विघ्ननाशिन्यै नमः

॥ इति ॥

अथ धर्माद्यष्टकं अर्चयेत् ॥ यथा-

1. ३ ॠं धर्माय नमः
2. ३ ॠं ज्ञानाय नमः
3. ३ लुं वैराग्याय नमः
4. ३ लूं ऐश्वर्याय नमः
5. ३ ॠं अधर्माय नमः
6. ३ ॠं अज्ञानाय नमः
7. ३ लुं अवैराग्याय नमः
8. ३ लूं अनैश्वर्याय नमः

अथ–

३ मूलं......... स्वाहा । (दशवारं जुहुयात)

ततो देवस्याङ्गे अग्नीशासुरवायु कोणेषु दिक्षुच–

३ ओं गां हृदयशक्त्यै स्वाहा ।

३ श्रीं गीं शिरश्शक्त्यै ,,

३ ह्रीं गूं शिखाशक्त्यै ,,

३ क्लीं गैं कवचशक्त्यै ,,

३ ग्लौं गौं नेत्र शक्त्यै ,,

३ गं गः अस्त्र शक्त्यै ,,

३ विनायक सिद्धाचार्याय स्वाहा ।

३ कवीश्वर सिद्धाचार्याय ,,

३ विरूपाक्ष सिद्धाचार्याय ,,

३ विश्व सिद्धाचार्याय ,,

३ ब्रह्मण्य सिद्धाचार्याय ,,

३ निधीश सिद्धाचार्याय ,,

३ गजाधिराज सिद्धाचार्याय ,,

३ वरप्रद सिद्धाचार्याय ,,

३ विजय सिद्धाचार्याय ,,

३ दुर्जय सिद्धाचार्याय ,,

३ जय सिद्धाचार्याय ,,

३ दुःखारि सिद्धाचार्याय ,,

३ सुखावह सिद्धाचार्याय स्वाहा ।
३ परमात्म सिद्धाचार्याय ,,
३ सर्वभूतात्म सिद्धाचार्याय ,,
३ महानन्द सिद्धाचार्याय ,,
३ फालचन्द्र सिद्धाचार्याय ,,
३ सद्योजात सिद्धाचार्याय ,,
३ बुद्ध सिद्धाचार्याय ,,
३ शूर सिद्धाचार्याय ,,

ततः परमेष्टिगुरुमन्त्रेण परमेष्टिगुरुं, परमगुरुमन्त्रेण परमगुरुं, स्वगुरुमन्त्रेण स्वगुरुं च जुहुयात् ॥

आवरण देवता होमः -

३ श्रीश्रीपतये स्वाहा ।
३ गिरिजागिरिजापतये ,,
३ रतिरतिपतये ,,
३ महीमहीपतये ,,
३ ऋद्ध्यामोदाय ,,
३ समृद्धिप्रमोदाय ,,
३ कान्तिसुमुखाय ,,
३ मदनावतीदुर्मुखाय ,,
३ मदद्रवाविघ्नाय ,,
३ द्राविणीविघ्नकर्त्रे ,,
३ वसुधाराशङ्खनिधये ,,
३ वसुमतीपद्मनिधये ,,

३	ओं	गां	हृदय शक्त्यै	स्वाहा ।
३	श्रीं	गीं	शिरश्शक्त्यै	,,
३	ह्रीं	गूं	शिखाशक्त्यै	,,
३	क्लीं	गैं	कवचशक्त्यै	,,
३	ग्लौं	गौं	नेत्रशक्त्यै	,,
३	गं	गः	अस्त्रशक्त्यै	,,

३	आं	ब्राह्मै	स्वाहा ।
३	ईं	माहेश्वर्यै	,,
३	ऊं	कौमर्यै	,,
३	ॠं	वैष्णव्यै	,,
३	ॡं	वाराह्यै	,,
३	ऐं	माहेन्द्र्यै	,,
३	औं	चामुण्डायै	,,
३	अः	महालक्ष्म्यै	,,

३	लां	सपरिवार	सुराधिपति	इन्द्राय	स्वाहा ।
३	रां	सपरिवार	तेजोधिपति	अग्नये	,,
३	टां	सपरिवार	प्रेताधिपति	यमाय	,,
३	क्षां	सपरिवार	रक्षोऽधिपति	निर्ऋतये	,,
३	वां	सपरिवार	जलाधिपति	वरुणाय	,,
३	यां	सपरिवार	प्राणाधिपति	वायवे	,,
३	सां	सपरिवार	नक्षत्राधिपति	सोमाय	,,
३	हां	सपरिवार	विद्याऽधिपति	ईशानाय	,,

३ मूलं पञ्चमावरण देवताय श्री महागणपतये स्वाहा ॥

(दशवारं जुहुयात्)

अथ - अष्टद्रव्यहोमं महागणपति मूल मन्त्रेण हुनेत ।

अष्टद्रव्यैः मध्वाज्य मिश्रितैः ग्रासमितैः त्रिसंख्यं पंचसंख्यं वा हुनेत् ।

संभृताष्टद्रव्यं त्रिधा कृत्वा एकमंशं निवेदयेत् - द्वावंशौ जुहुयात ।

३ मूलं महागणपतये स्वाहा ।

ततो होमाशिष्टेनाज्येन स्त्रुचं पूरयित्वा पुष्पं फलं अग्नें निधाय स्त्रुवेणाच्छाद्य ॥

॥ मूलेन वौषट् ॥

। इति उत्थितो जुहुयात् ॥

॥ बलिप्रदानम् ॥

कुण्डदक्षभागे सामान्याघ्योंदकेन वृत्तचतुरश्रात्मकं मण्डलं परिकल्प्य—

३ ऐं व्यापकमण्डलाय नमः ।

इति अभ्यर्च्य, अर्धभक्तपूरितोदकं साक्षीरादित्रयं बलिपात्रं तत्र विन्यस्य –

३ ओं गां गीं गूं गैं गौ गः महागणपतये वरवरद सर्वजनं मे वशमानय सर्वोपचारसहितं इमं बलिं गृह्ण गृह्ण स्वाहा ।

इत्युच्चरन् । बलिपात्रे सामान्याघ्योंदकं विसृजेत् ।

ततो पादौ प्रक्षाल्य आचम्य योनि मुद्रया प्रणमेत् ॥

ततो महाव्याहृति होमः । यथा—

३ भूरग्नये च पृथिव्यै च महतेच स्वाहा ।
अग्नये पृथिव्यै महत इदम् ।

३ भुवो वायवे चान्तरिक्षाय महते च स्वाहा ।
वायवे अन्तरिक्षाय महत इदम् ।

३ सुवरादित्याय च दिवे च महते च स्वाहा ।
आदित्याय दिवे महत इदम् ।

३ भूर्भुवः सुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा । चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यो महत इदम् ॥

इति चतस्र आहुतौराज्येन कृत्वा ॥

॥ पूर्णाहुति ॥

३ ओं इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः जाग्रत्स्वप्न-सुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेणशिश्ना यत्स्मृतं यत्कृतं यदुक्तं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा । परब्रह्मण इदम् ॥

इति ब्रह्मार्पणहुतिं विदध्यात् ॥

॥ अथ जयादि होमं ॥

एतत्कर्मसमृद्ध्यर्थं जयादि होमं करिष्ये ।

चित्तं च स्वाहा । चित्तायेदम् ॥

चित्तिश्च ,, । चित्त्या इदम् ॥

आकूतं च ,, । आकूतायेदम् ॥

आकूतिश्च ,, । आकूत्या इदम् ॥

विज्ञातं च ,, । विज्ञातायेदम् ॥

विज्ञानं ,, । विज्ञानायेदम् ॥

मनश्च ,, । मनस इदम् ॥

शक्करीश्च ,, । शक्करीभ्य इदम् ॥

दर्शश्च ,, । दर्शायेदम् ॥

पूर्णमासश्च ,, । पूर्णमासायेदम् ॥

बृहच्च ,, । बृहत इदम् ॥

रथन्तरं च ,, । रथन्तरायेदम् ॥

प्रजापतिर्जयानिद्राय वृष्णे प्रायच्छदुग्रःपृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स हि हव्यो वभूव स्वाहा । प्रजापतय इदम् ॥

अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरौधायामस्मिन्कर्मन्नस्यां देवहूत्यॉं स्वाहा । अग्नय इदम् ॥

इन्द्रो ज्येष्ठानामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यॉं स्वाहा । न्द्रायेदम् ॥

यमः पृथिव्या अधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षेत्रस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याँ स्वाहा । यमायेदम् ॥

वायुरन्तरिक्षस्याधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां येवहूत्याँ स्वाहा । वायव इदम् ॥

सूर्यो दिवोऽधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यां स्वाहा । सूर्यायेदम् ॥

चद्रमा नक्षत्राणामाधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याँ स्वाहा । चन्द्रमस इदम् ॥

बृहस्पतिर्ब्रह्मणोऽधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याँ स्वाहा । बृहस्पतय इदम् ॥

मित्रः सत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याँ स्वाहा । मित्रायेदम् ॥

वरुणोऽपामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याँ स्वाहा । वरुणायेदम् ॥

समुद्रः स्रोत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याँ स्वाहा । समुद्रायेदम् ॥

अन्नँ साम्राज्यानामधिपति तन्मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्य। पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याँ स्वाहा । अन्नायेदम् ॥

सोम ओषधीनामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याँ स्वाहा । सोमायेदम् ॥

सविता प्रसवानामधिपतिः स मावत्वस्मिन् ब्रह्यन्नस्मिन् क्षत्रेस्यामाशिस्यस्यां पुरोधायामस्न्किर्मन्नस्यां देवहूत्याँ स्वाहा । सवित्र इदम् ॥

रुद्रःपशूनामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याँ स्वाहा रुद्रायेदम् ॥

अप उपस्पृश्य ॥

त्वष्टा रूपाणामधिपतिः स मावत्वस्मिन् ब्रह्मंन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याँ स्वाहा । त्वष्ट्र इदम् ॥

विष्णुः पर्वतानामधिपतिः स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याँ स्वाहा । विष्णव इदम ॥

मरुतो गणानामधिपतयस्ते मावन्त्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याँ स्वाहा । मरुद्भ्य इदम् ॥

पितरः पितामहाः परेवरे ततास्ततामहा इह मावत । अस्मिन्ब्रह्मन्नस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यां स्वाहा । पितृभ्य ईदम् ॥ अप उपस्पृश्य

ऋताषाडृतधामाऽग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा । अग्नये गन्धर्वायेदम् ॥

ताभ्यः स्वाहा । ओषधीभ्योऽप्सरोभ्य इदम् ॥

सँहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा । सूर्याय गन्धर्वायेदम् ॥

ताभ्यः स्वाहा । मरीचिभ्योऽप्सरोभ्य इदम् ॥

सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो वेकुरयो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा । चन्द्रमसे गन्धर्वायेदम् ॥

ताभ्यः स्वाहा । नक्षत्रेभ्योऽप्सरोभ्य इदम् ॥

भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसः स्तवा नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा । यज्ञाय गन्धर्वायेदम् ॥

ताभ्यः स्वाहा । दक्षिणाभ्योऽप्सरोभ्य इदम् ॥

प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्यक्सामान्यप्सरसो वह्नयो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ॥ मनसे गन्धर्वायेदम् ॥

ताभ्यः स्वाहा । ऋक्सामभ्योऽप्सरोभ्य इदम् ॥

इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽप्सरसो मुदा नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा । वाताय गन्धर्वायेदम् ॥

ताभ्यः स्वाहा । अद्भ्योऽप्सरोभ्य इदम् ॥

भुवनस्य पते यस्य त उपरि गृहा इह च । सनोरा-स्वाज्यानिँ रायस्पोषँ सुवीर्यँ संवत्सरीणाँ स्वस्तिँ स्वाहा । भुवनस्य पत्य इदम् ॥

परमेष्ठयधिपतिर्मृत्युर्गन्धर्वस्तस्य विश्वमप्सरसो भुवो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा । मृत्यवे गन्धर्वायेदम् ॥

ताभ्यः स्वाहा ॥ विश्वस्मा अप्सरोभ्य इदम् ॥

सुक्षितिर्सुभूतिर्भद्रकृथ्सुवर्वान्पर्जन्यो गन्धर्वस्तस्य विद्युतोऽप्स-रसो रुचो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा । पर्जन्याय गन्धर्वायेदम् ॥

ताभ्यः स्वाहा । विद्युद्भ्यऽप्सरोभ्य इदम् ॥

दूरे हेतिरमृडयो मृत्युर्गन्धर्वस्तस्य प्रजा अप्सरसो भीरवो नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा । मृत्यवे गन्धर्वायेदम् ॥

ताभ्यः स्वाहा । प्रजाभ्योऽप्सरोभ्य इदम् ॥

चारु: कृपणकाशी कामो गन्धर्वस्तस्याधयोऽप्सरस: शोचयन्तीर्नाम स इदं ब्रह्मक्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा । कामाय गन्धर्वायेदम् ॥

ताभ्य: स्वाहा । आधिभ्योऽप्सरोभ्य इदम् ॥

स नो भुवनस्य पते यस्य त उपरि गृहा इह च । उरु ब्रह्मणेऽस्मै क्षत्राय महिशर्म यच्छ स्वाहा । भुवनस्य पत्ये ब्रह्मण इदम् ॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव यत्कामास्ते जुहुमस्तन्नो अस्तु वयँ स्याम पतयो रयीणाँ स्वाहा । प्रजापतय इदम् ॥

भू: स्वाहा । अग्नय इदम् ॥

भुव: स्वाहा । वायव इदम् ॥

सुव: स्वाहा । सूर्यायेदम् ॥

यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम् अग्निष्टथ्स्वष्टकृद्विद्वांन्थ्सर्वँ स्विष्टँसुहुतं करोतु स्वाहा । अग्नये स्विष्टकृत इदम् ॥

चरुकर्मसु प्रधानदर्व्याज्येन निधानक्रमात् परिध्यञ्जनं कृत्वा, लेपकार्यं कुर्यात् । आज्यस्थाल्या दक्षिणत: प्रधानदर्वीं निधाय, इतरदर्वीं मध्ये निधाय, पात्रासादनार्थंदर्भानादाय, प्रधानदर्व्यामग्रं इतरस्यां मध्यं आज्यस्थाल्यां मूलं इत्युदगपवर्ग क्रमेण त्रिरक्त्वा, अक्तस्य बर्हिषस्तृणमपादाय, प्रज्ञातं निधाय, दक्षिणेत्तरभ्यां पाणिभ्यां प्रधानदर्व्या बर्हि: प्रतिष्ठाप्व, दक्षणेन करेणाग्नौ प्रहरति । त्रिरुद्यम्य, अपात्ततृणमग्नौ प्रहरति । तत् त्रिरङ्गल्या निर्दिश्य,

अग्निमभिमन्त्रयते । अथ भूमिमुपस्पृश्य, परिधीन्प्रहरति मध्यमं परिधिमग्नौ प्रहृत्य, अन्यौ परिधी हस्ताभ्यामादाय युगपदग्नौ प्रहरन् उत्तरार्ध्यस्याग्रमङ्गारेषूपोहति । दर्वीद्वयेन संस्रावं परिधीनभिजुहोति ।। (स्वाहा) ।।

वसुभ्यो रुद्रेभ्य आदित्येभ्यः सँस्रावभागेभ्य इदम ।।

ओं भूर्भुवः सुवः स्वाहा । प्रजापतय इदम् ।।

अस्मिन् महागणपतिहोमकर्मणि अविज्ञातप्रायश्चित्तादीनि ह्रोष्यामि ।।

अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु । अग्ने तदस्य कल्पय त्वँ हि वेत्थ यथातथँ स्वाहा । अग्नय इदम् ।।

पुरुषसंमितो यज्ञो यज्ञः पुरुषसंमितः । अग्ने तदस्य कल्पय त्वँ हि वेत्थ यथातथँ स्वाहा । अग्नय इदम् ।।

यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्तासः । अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाँ ऋतुशो यजाति स्वाहा । अग्नय इदम् ।।

भूः स्वाहा । अग्नय इदभ् ।।

भुवः स्वाहा । वायव इदम् ।।

सुवः स्वाहा । सूर्यायेदम् ।।

ओं भूर्बुवःसुवः स्वाहा । प्रजापतय इदम् ।।

अस्मिन् श्रीमहगणपतिहोमकर्मणि मध्ये सम्भावितसमस्तमन्त्र–लोपतन्त्रलोपद्रव्यलोपक्रियालोपाज्यलोपन्यूनातिरेकविस्मृतिविपर्यास – प्रायश्चित्तार्थं सर्वप्रायश्चित्तं ह्रोष्यामि ।

ओं भूर्भुवः सुवः स्वाहा । प्रजापतय इदम् ॥
श्रीविष्णवे स्वाहा । विष्णवे परमात्मन इदम् ॥

नमो रुद्राय पशुपतये स्वाहा । रुद्राय पशुपतय इदम् । अप उपस्पृश्य ॥

सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धामप्रियाणि । सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्वा घृतेन स्वाहा । अग्नये सप्तवत इदम् ॥

आज्यपात्रादीनुत्तरतो निधाय, प्राणायामं कृत्वा, अग्निं परिषिञ्चति ॥

अदितेऽन्वमँस्थाः ।
अनुमतेऽन्वमँस्थाः ।
सरस्वतेऽन्वमँस्थाः ।
देव सवितः प्रासावोः ॥

ततः प्रणीतापात्रं स्वस्यः पुरतः आदाय,

"पूर्णमसि पूर्णं मे भूयाः । सदसि सन्मे भूयाः । सर्वमसि सर्वं मे भूयाः ॥" इति अन्यजलं निनीय, तज्जलं प्रागादिप्रदक्षिणं

प्राच्यां दिशी, देवा ऋत्विजो मार्जयन्ताम् ।
दक्षिणस्यां दिशी, मासाः पितरो मार्जयन्ताम् ।
प्रतीच्यां दिशि, गृहाः पशवो मार्जयन्ताम् ।
उदीच्यां दिशि, आप ओषधयो वनस्पतयो मार्जयन्ताम् ॥
ऊर्ध्वायां दिशि, यज्ञः संवत्सरो यज्ञपतिर्मार्जयन्ताम् ॥
इति प्रतिदिशमुत्सृज्य, पुरस्तात् अक्षतोपरि निस्राव्य, तेन—

ब्राह्मणेष्वमृतं हितं येन देवाः पवित्रेणात्मानं पुनते सदा तेन सहस्रधारेण पावमान्यः पुनन्तु मा,

इत्यात्मानं प्रोक्ष्य, दक्षिणतो निषादितं ब्रह्माणं संपूज्य, तस्य वरं दत्त्वा, प्रागादिपरिस्तरणमुत्तरे विसृजेत् ।

अग्निं प्रज्वलितं वन्दे जातवेदं हुताँशनम् ।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम् ॥ इति ॥ स्वाहा ।
उपस्थाय चिदग्निं,
अग्नि उपस्तानं करिष्ये ।

उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन् । आयुः प्रजाँ रयिमस्मासु धेहि अजस्रो दीदिहि नो दुरोणे ॥

श्रीमहागणपत्यग्निं आत्मन्युद्वासयामि नमः इति उद्वास्य, हृदये अञ्जलिं दद्यात् ॥

तद्भूतितिलकं, "त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं अगस्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्मेऽस्तु त्र्यायुषम् । शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिँसीः ॥" इति मन्त्रेण धारयेत् ॥

॥ इति महागणपति होमप्रकरणम् सम्पूर्णम् ॥

॥ श्रीगणपतिविधानम् ॥

गणक ऋषिः । निचृद्गायत्री छन्दः । महागणपतिः देवता । ओं बीजं गं कीलकं । ह्रीं शक्तिः । ओं श्रीं ह्रीं क्लीं ग्लौं गं गां हृदयाय नमः इत्यादिषडङ्गानि ॥

आसनध्यानम् –

मन्दाराद्यैः कल्पवृक्षविशेषैः विशिष्टतरफलदैः ।
शिशिरितचतुरांशेऽन्तर्बालातपचन्द्रिकाकुले च तले ॥ १ ॥
ऐक्षवजलनिधिलहरीकणजालवाहिना च गन्धवहेन ।
संसेविते सुरतरुसुमनःश्रितमधुपपक्षचलनपरेण ॥ २ ॥
रत्नमये मणिवज्रप्रवालफलपुष्पपल्लवस्य सतः ।
महतोऽधस्तात् ऋतुभिस्संसेवितस्य कल्पतरोः ॥ ३ ॥
सिह्ममुखपादपीठगलिपिमयपद्मे त्रिषटकोणोल्लसिते ।
आसीनस्त्वेकरदो बृहदुदरो दशभुजोऽरुणो गजवदनः ॥ ४ ॥

तत्र लिपिमयपद्मे इत्यादीनामयमर्थः–

त्रिकोणमध्ये प्रणवं गं इति साध्यादियुतं लिखित्वा श्रीं ह्रीं क्लीं ग्लौं इत्येभिः तं संवेष्टय षट्कोणेषु बीजषट्कं तदन्तरालेषु अङ्गषट्कं अष्टदलेषु मन्त्रपदाष्टकं तद्बहिः वृत्तत्रये मातृकया पाशाङ्कुशेन च संवेष्ट्य तद्बहिः भूपुरद्वये आं ह्रीं इति कोणेषु दिक्विदिक्भेदेन विलिखेदिति ॥

अथ दीक्षाकलशविधिः उच्यते ॥

मध्ये च दिग्दळानां चतुष्टयाग्रे प्रविन्यसेत् कलशान् ।
क्षीरद्रुबिल्वरोहिणपिप्पलफलिनीत्वग्भवैः क्वाथैः ॥ १ ॥
संपूरयेद्यथावत् क्रमात् समावाह्य गणपतिमिथुनानि ।
अभ्यर्च्य चोपचारैः हुत्वा विधिवत्पुनस्समभिषिंचेत् ॥ २ ॥
अथमर्थः— क्षीरद्रुमाः = अश्वत्थ वट उदुम्बर ल्पक्षाः ।
रोहिणं = वटवृक्षं ॥ पिप्पल = अश्वत्थं ॥ फलिनी = जंबु ॥

चतुर्दलं विलिख्य तत्कर्णिकायां च तेषु चतुर्दलाग्रेषु च उक्तैः एतैः क्वाथोदकैः क्रमेण एकैकेन एकैकलशं संपुरयेत् । तत्र दिकस्थकलशचतुष्टये रमारमेशादिचतुष्टयं सशक्तिकं मध्ये कलशे गणपतिं च समावाह्य षोढशोपचारैः संपूज्य पुनः तत्समीपे अग्निं समाधाय गणपतिं समावाह्य पूर्वोक्तै. अष्टद्रव्यैः दीक्षाहोमं कृत्वा तान् कलशान् प्राग्दलकलशादिक्रमेण गुरुः शिष्यमभिषिञ्चेत् । पुनः उक्तसंख्या पुरश्चर्या । पश्चात् अग्नौ विघ्नं सपरिवारं संपूज्य अष्टद्रव्यैः मिलितैः जपाद्दशांशं पुरश्चरणहोमं कुर्यात् ॥

गणपतिध्यानम्–

बीजापुरगदेक्षुकार्मुकरुजाचक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशप्रोद्यत्कराम्भोरुहः ।
ध्येयो वल्लभया सपद्मकरयाश्लिष्टोज्वलद्भूषाया
विश्वोत्पत्तिविपत्तिसंस्थितिकरो विघ्नो विशिष्टार्थदः ॥

करषङ्कजधृतकलशस्रुतमणिमुक्ताप्रवलावर्षेण ।
अविरतधारं विकिरन् परितः साधकसमग्रसंपत्यै ॥
मदजललोलुपमधुकरमालां निर्भरकर्णतालताडनया ।
निर्वासयन् मुहुर्मुहुः अमरासुरैश्च सेवितो युगपत् ॥

एवं स्वरूपध्यानम्— एवं महागणपतिरूपं आत्मानं ध्यात्वा पुनः सपरिवारान् ध्यायेत् ॥

अग्रेऽथ बिल्वमभितश्च रमारमेशौ तद्दक्षिणे वटजुषौ गिरिजावृषाङ्कौ ।
पृष्ठेऽथ पिप्पलजुषौ रतिपुष्पबाणौ सव्ये प्रियङ्गुमभितश्च महीवराहौ।1।

ध्येयौ च पद्मयुगचक्रदरौ पुरोक्तौ पाशाङ्कुशाढ्यपरशुत्रिशिखैरथान्यौ ।
युग्मोत्पलेक्षुमयचापशरैः तृतीयावन्यौं शुकाह्वकलमाग्रगदारथाङ्गैः ॥२॥

ध्येयाः षट्कोणाश्रिषु परितः पाशाङ्कुशाभयेष्टकराः ।
सप्रमदाः गणपतयो रक्ताकराः प्रभिन्नमदविवशाः ॥ ३ ॥

अग्राश्रावामोदप्रमोदसुमुखौ च तमभितोऽश्रयुगे ।
पृष्ठे च दुर्मुखाख्यो तमभितोऽविघ्नविघ्नकर्तारौ ॥ ४ ॥

सव्यापसव्यभागे तस्य ध्येयौ च शङ्खपुष्पनिधी ।
मौक्तिकमाणिक्याभौ वर्षन्तौ धारया धनानि सदा ॥ ५ ॥

ऋद्धिसमृद्धिश्चान्या कान्तिर्मदनावती मदद्रवया ।
द्राविणिवसुधाराख्ये वसुमत्यपि विघ्ननिधियुगप्रमदाः ॥ ६ ॥

अग्रे बिल्वमभितश्चेत्यादिग्रन्थानामयमर्थः–

पूर्वोक्तबीजापूरेत्यादिमार्गेण स्वात्मानं गणपतिरूपं ध्यात्वा पुनरग्रे बिल्ववृक्षं ध्यात्वा तदभितः रमारमेशौ ध्यायेत् । सपद्मयुगा रमा। सचक्रदरो रमेशः। दक्षिणभागे वटवृक्षं ध्यात्वा तदभितः गिरिजावृषाङ्कौ ध्यायेत् । सपाशाङ्कुशा गिरिजा । सपरशुशूली वृषाङ्कः । पुनश्च पश्चिमभागे पिप्पलवृक्षं ध्यात्वा तदभितः रतिपुष्पबाणौ ध्यायेत् । सोत्पलयुग्मा रतिः । सेक्षुचापपुष्पबाणः पुष्पबाणाख्यः । पुनः सव्यभागे प्रियङ्गुवृक्षं ध्यायेत् । प्रियङ्गुः जंबु । तदभितःमहीवराहौ ध्यायेत् । सशुककलमाग्रा मही । कलमाग्रं धान्यविशेषः । सगदाचक्रःवराहः । चतस्रो मूर्तय एवं ध्येयाः ॥ तद्बहिः षट्कोणेषु षड्विघ्नान् ध्यायेत् ।

प्रथममग्रकोणे ऋद्धिशक्तिमामोदविघ्नञ्च ध्यायेत् । तद्दक्षिण-कोणे समृद्धिशक्तिं प्रमोदविघ्नञ्च ध्यायेत् । उत्तरकोणे तद्वामकोणे कान्तिशक्तिं सुमुखविघ्नञ्च ध्यायेत् । पृष्टकोणे (देवस्य) मदनावतीशक्तिं दुर्मुखविघ्नञ्च ध्यायेत् । तद्दक्षिणतः मदद्रवाशक्तिं अविघ्नञ्च ध्यायेत् । उत्तरकोणे तद्वामकोणे द्रविणीशक्तिं विघ्नकर्तारञ्च ध्यायेत् । एते विघ्नाः सपाशाङ्कुशाभयवरकराः प्रभिन्नमदविवशाश्च ध्येयाः । एतेषां षड्विघ्नानां उत्तरपार्श्वे वसुधाराशक्तिं शङ्खनिधिञ्च ध्यायेत् । दक्षिणपार्श्वे वसुमतीशक्तिं पद्मनिधिं (पुष्पनिधिं) च ध्यायेत् । वसुधाराशङ्खनिधी मौक्तिकभौ । वसुमतीपद्मनिधी माणिक्याभौ । एतौ उभावपि वर्षन्तौ धाराधनानि सदा ।। इति ।।

ओं नमो भगवत्यै सच्चिदानन्दरूपिण्यै ।।

।। श्रीगणेशमूलमन्त्रपदमाला ।।

ओं मित्येतदजस्य कण्ठविवरं भित्वा बहिर्निर्गतं
चोमित्येव समस्तकर्म ऋषिभिः प्रारभ्यते मानुषैः ।
ओमित्येव सदा जपन्ति यतयः स्वात्मैकनिष्ठाः परं
चोंकाराकृतिवक्त्रमिन्दुनिटिलं विघ्नेश्वरं भावये ।। १ ।।

श्रीं वीजं श्रमदुःखजन्ममरणव्याध्याधिभीनाशकं
मृत्युक्रोधनशान्तिबिन्दुविलदूर्णाकृति श्रीप्रदं ।
स्वान्तस्थात्मशरस्य लक्ष्यमजरस्वात्मावबोधप्रदम
श्रीश्रीनायकसेवितेभवदनप्रेमास्पदं भावये ।। २ ।।

ह्रीं बीजं हृदयत्रिकोणविलसन्मध्यासनस्थं सदा
चाकाशानलवामलोचननिशनाथार्धवर्णात्मकम् ।
मायाकार्यजगत्प्रकाशकमुमारूपं स्वशक्तिप्रदं
मायातीतपदप्रदं हृदि भजे लोकेश्वराराधितम् ॥ ३ ॥

क्लीं बीजं कलिधातुवत्कलयतां सर्वेष्टदं देहिनां
धातृक्ष्मायुतशान्तिबिन्दुविलसद्वर्णात्मकं कामदम् ।
श्रीकृष्णप्रियमिन्दिरासुतमनःप्रीत्येकहेतुं परं
हृत्पद्मे कलये सदा कलिहरं कालारिपुत्रप्रियम् ॥ ४ ॥

ग्लौं बीजं गुणरूपनिर्गुणपरब्रह्मादिशक्तेः महा-
हङ्काराकृतिदण्डिनीप्रियमजश्रीनाथरुद्रेष्टदम् ।
सर्वाकर्षिणि देवराजभुवनार्णेन्द्वात्मकं श्रीकरं
चित्ते विघ्ननिवारणाय गिरिजाजातप्रियं भावये ॥ ५ ॥

गंगासुतं गन्धमुखोपचारप्रियं खगारोहणभागिनेयम् ।
गंगासुताद्यं वरगन्धतत्वमूलाम्बुजस्थं हृदि भावयेऽहम् ॥ ६ ॥

गणपतये वरगुणनिधये सुरगणपतये नतजनततये ।
मणिगणभूषितचरणयुगाश्रित मलहरणे चण ते नमः ॥ ७ ॥

वराभये मोदकमेकदन्तं करांबुजातैस्सततं धरन्तम् ।
वराङ्गचन्द्रं परभक्तिसान्द्रैर्जनैर्भजन्तं कलये सदाऽन्तः ॥ ८ ॥

वरद नतजनानां सन्ततं वक्रतुण्ड
स्वरमयनिजगात्र स्वात्मबोधैकहेतो ।
करलसदमृताम्भःपूर्णपात्राद्य मह्यं
गरगलसुत शीघ्रं देहि मद्बोधमीड्यम् ॥ ९ ॥

सर्वजनं परिपालय शर्वज पर्वसुधाकरगर्वहर ।
पर्वतनाथसुतासुत पालय खर्वं मा कुरु दीनमिमम् ॥ १० ॥

मेदोऽस्थिमांसरुधिरान्त्रमये शरीरे
मेदिन्यबग्निमरुदंबरलास्यमाने ।
मे दारुणं मदमुखाधमुमाज हृत्वा
मेधाह्वयासनवरे वस दन्तिवक्त्र ॥ ११ ॥

वशं कुरु त्वं शिवजात मां ते वशीकृताशेषसमस्तलोक ।
वसार्णसंशोभितमूलपद्मलसच्छ्रियाऽलिङ्गित वारणास्य ॥ १२ ॥

आनयाशु पदवारिजान्तिकं मां नयादिगुणवर्जितं तव ।
हानिहीनपदजामृतस्य ते पानयोग्यमिभवक्त्र मां कुरु ॥ १३ ॥

स्वाहा स्वरूपेण विराजसे त्वं सुधाशनानां प्रियकर्मणीड्य ।
स्वधा स्वरूपेण तु पित्र्यकर्मण्युमासुतेज्यामय विश्वमूर्ते ॥ १४ ॥

अष्टाविंशतिवर्णपत्रलसितं हारं गणेशप्रियं
कष्टाऽनिष्टहरं चतुर्दशपदैः पुष्पैर्मनोहारकम् ।
तुष्ट्यादिप्रदसद्गुरूत्तमपदांभोजे चिदानन्ददं
शिष्टेष्टोऽहमनन्तसूत्रहृदयाऽऽबद्धं सुभक्त्याऽर्पये ॥ १५ ॥

श्री शिवायै नमः ।

श्री स्वामि शास्त्रि (अनन्तानन्दनाथः) विरचितम्

॥ ब्रह्मणस्पतिसूक्तम् ॥

ब्रह्मणस्पतेत्वमस्ययन्ता ॥ सूक्तस्यबोधितनयंचजिन्व ॥
विश्वंतद्भद्रंयदवन्तिदेवाः ॥ बृहद्वदेमविदथेसुवीराः ॥
सईंगँसत्येभिस्सखिभिश्शुचद्भिः ॥ गोधायसंविधनसैरतर्दत् ॥
ब्रह्मणस्पतिर्वृषभैर्वराहैः ॥ धर्मस्वेदेभिर्द्रविणंव्यानट् ॥

ब्रह्मणस्पतेरभवद्यथावशं ।। सत्योमन्युर्महिकर्माकरिष्यतः ।।
योगाउदाजथ्सदिवेविचाभजत् ।। महीवरीतिश्शवसासरत्पृथक् ।।
इन्धानोअग्निवनवद्वनुष्यतः ।। कृतब्रह्माशूशुवद्रातहव्यइत् ।।
जातेनजातमतिसृत्सप्रसृगँसते ।। यय्यय्युजंकृणुतेब्रह्मणस्पतिः ।।
ब्रह्मणस्पतेसुयमस्यविश्वहा ।। रायस्स्यामरथ्योविवस्वतः ।।
वीरेषुवीरागँउपपृङ्ग्धिनस्त्वं ।। यदीशानोब्रह्मणावेषिमेहव्यं ।।
सइज्जनेनसविशासजन्मना ।। सपुत्रैर्वाजं भरतेधनानृभिः ।।
देवानांयःपितरमाविवासति ।। श्रद्धामनाहविषाब्रह्मणस्पतिं ।।

।। इति ब्रह्मणस्पतिसूक्तम् ।।

।। श्रीवक्रतुण्डषडक्षरी ।।

वन्दे वारिजकान्तिपादयुगळं वन्दारुभक्तेष्टदं
सन्देहास्पदचित्तदूरगमुमानन्दप्रदं सुन्दरम् ।
मन्देन्द्वारकवीनविद्गुरुनुतं मन्दारमालाप्रियं
नन्देष्टात्मजमातुलं गजमुखं छन्दोमयं भावये ।। १ ।।

क्रव्यादेन्द्रसुरेन्द्रभावितपदं हव्याशिहस्तात्मजं
गव्याज्याहुतिसुप्रियं भयहरं नव्योपहारप्रियम् ।
कव्यादांबुजभानुमण्डलगतं दिव्यौषधं रोगिणां
दिव्यौघादिपरीवृतं गजमुखं भव्येष्टदं भावये ।। २ ।।

तुङ्गोर्वीधरनाथजादृतपदं गङ्गाधरस्येष्टदं
शृंगैकोज्ज्वलमङ्गाहीनसुखदं शृङ्गारसारं परम् ।
भृङ्गाशोभितगण्डयुग्ममगराट्शृंगस्थिताम्बासुतं
साङ्गोपांगमुपाश्रये गजमुखं गङ्गासुताराधितम् ।। ३ ।।

डामर्यादिसमस्तभूतनिवहव्यामोहकृल्लोचनं
सोमार्द्धोज्वलशेखरं मम हृदारामे वसन्तं मुदा ।
वामाक्ष्याश्रितवामपार्श्वममलं रामेण संपूजितं
सामादिश्रुतिबोधितं गजमुखं क्षेमङ्करं भावये ॥ ४ ॥

यज्ञं यो वितनोति चिद्धुतवहे प्राज्ञस्स्वचित्तान्तरे
प्रज्ञां तस्य ददन्तमादिपुरुषं प्राज्ञैरुपास्यं सदा ।
आज्ञाचक्रगषण्मुखेष्टवरदं स्वज्ञानदं देहिनां
अज्ञानाद्रिमहापविं गजमुखं यज्ञेश्वरं भावयै ॥ ५ ॥

हुंकाराहतदैत्यभुतनिवहं हिंकारवाक्यप्रियं
शङ्कारातिभयार्तिमोहममताहङ्कारनशप्रदम् ।
गंकाराख्यमहामनुं प्रजपतामोंकारलक्ष्यप्रदं
ठंकारेन्दुशिरोधरं गजमुखं शंकारकं भावये ॥ ६ ॥

वक्रतुण्डषडर्णाब्जग्रथिता मालिका मया ।
अनन्तसौख्यदा श्रीमच्चिदानन्दपदेऽर्पिता ॥

श्री स्वामि शास्त्री (आनन्तानन्दनाथ) विरतिम्

शिवम्

॥ महागणपति स्तोत्र निरूपणम् ॥

महागणपतेर्वक्ष्ये स्तोत्रं तत्वनिरूपणम् ।
जीवस्हाङ्गे कलौ शीघ्रं जीवन्मुक्तिप्रदायकम् ॥

अस्य श्री महागणपतेः स्तोत्रस्य भैरव ऋषिः गायत्र्यं छन्दः श्री महागणपतिर्देवता गं बीजं ह्रीं शक्तिः कुरु कुरु कीलकम् । जीवन्मुक्तिकामनार्थे महागणपति स्तवराज पाठे विनियोगः ॥

॥ ध्यानम् ॥

द्विचतुर्दशवर्ण भूषिताङ्गँ शशिसूर्याग्नि विलोचनं सुरेशम् ।
अहि भूषितकण्ठमक्षसूत्रं भ्रमयन्तं हृदये स्मरे गणेशम् ॥

तारं नारदगीतमाद्यमनिशं यः साधगेन्द्रो जपे-
द्रात्रावह्नि निशमुखे शवगृहे शून्यालये वा प्रभो ।
तस्य स्मेरमुखाम्बुजाः प्रतिदिनं लावण्यदर्पोज्वलाः
स्वर्वेश्याश्च वशीभवन्ति त्रिदिवे भूमौ समस्ता नृपाः ॥

सकलं सकलं जपेद्यदा गणनाथप्रियमन्त्रमेव यः ।
सकलंक्ष्मापति मूर्धसु स्फुरच्चरणाब्जो भुवि शोभते च सः ॥
कमलां कमलास्पृही च यो हृदये ध्यायति देवमध्यगाम् ।
तवमन्त्रप्रभावतस्तदा कमला सद्मनि तस्य निश्चला ॥

कामराजमनिशं स्मरातुरो यो जपेद्धृति गणेंश तावकम् ।
उर्वशीवदन पद्मषट्पदो धीयतेऽधरपरागकामृतम् ॥
मठं जपेद्यौ निशिशून्यगेहे विमुक्तकेशो गणनाथ भक्त्या ।
रणे रिपुरिन्द्रसमान् विजित्यप्राप्नोति राज्यं नृपचक्रवर्ती ॥
शिवार्णमन्तर्यदि साधको जपेदरण्यभूमौ शिवसन्निधौ विभो ।
चरा चरेवै विचरेद्विमाने जगत्यशेषामर चक्रवर्ती ॥
गणपतय इति मूल मनुं यो जपते भजते शृणुते पठते ।
गणकिन्नर सिद्धसुरासुरैर्नमितो लयते गणपत्यं सः ॥
वरवरदेति च मन्त्रमिमं यो भजते निशि वा दिवसेऽप्यनिशम् ।
वदने वसने सदने वसने हृदि वाक् कमलां तव भक्तिरपि ॥
सर्व जनं मे इति मन्त्रराजं जपन्ति ये भोजनकावसाने ।
भजन्ति ते वन्दनचन्दनादि वृक्षेषु लीलां सुरसुन्दरीभिः ॥

वशमनायेति भगवन् जयदि पति स्मरतप्तहृदयश्च ।
वशमेति किन्नरसुताप्युर्वशी सततं सुरत्वदक्षा ॥
स्वाहेति मन्त्राक्षरयुग्मतेज्जपेद् दिनान्तेऽप्यशनादिकाले ।
रोगा अशेषा विलयं प्रयान्ति तमांसि सूर्येऽभ्युदिने यथाशु ॥
पद्महस्तममृतांशुसन्निभं शङ्खयुग्ममपरं च दधानाम् ।
त्र्यक्षमग्नि सदृशं स्मरन्ति ये ते प्रयान्ति त्रिदिवं विमानगाः ॥
बिन्दुत्र्यश्रदशारवासवकलावेदाश्रमध्ये विभो
ये ध्यायन्ति भवन्त्यमीडयवपुषं त्रैलोक्यरक्षापरम ।
जित्वाभूमिमनल्पकल्पनिवहान् भूत्क्षा सहायैर्युताः ।
पश्चाद्यान्ति गणेश तावकपदं देवासुरैर्दुर्लभम् ॥

इति गणपतेः स्तोत्रं मन्त्रात्मकं परमं जपेत् ।
पठति शृणुयात् भक्त्या नित्यं समस्तरहस्यकम् ।
इह धनपतिर्लक्ष्मीमायुःसुतां लभतेऽचिराद्
व्रजति त्रिदिवं जीवन्मुक्तः परत्र स साधकः ॥

इति स्तवोत्तमम् देवि महागणपतेः परम् ।
गोप्यं गुप्तं सदा गोप्यं पञ्चाङ्गं सुरसुन्दरि ।
पञ्चाङ्गं गणेशस्य रहस्यं मम पार्वति ।
विना शिष्याय नो दद्यात् साधकाय विना तथा ॥
विना दानं नदातव्यं विना दानं न ग्राहयेत् ।
अन्यथा सिद्धहानिःस्यात् सर्वथा दानमाचरेत् ॥
पटलं पद्धतिं वर्म मन्त्रनाम सहस्रकम् ।
स्तोत्रं पञ्चाङ्गमनिशं गोपनीयं प्रयत्नतः ॥

महागणपति निरूपणम् - रुद्रयामलम्

॥ श्रीगणेश्वरैकविंशतिनामानि ॥

ओं गणंजयाय नमः	१	ओं निधये नमः	१२
गणपतये नमः	२	सुमंगलाय नमः	१३
हेरंबाय नमः	३	बीजाय नमः	१४
धरणीधराय नमः	४	आशापूरकाय नमः	१५
महागणपतये नमः	५	वरदाय नमः	१६
लक्षप्रदाय नमः	६	शिवाय नमः	१७
क्षिप्रप्रसादनाय तमः	७	काश्यपाय नमः	१८
अमोघसिद्धये नमः	८	नन्दनाय नमः	१९
अमिताय नमः	९	वाचासिद्धाय नमः	२०
मन्त्राय नमः	१०	दुंढिविनायकाय नमः	२१
चिन्तामणये नमः	११		

॥ इति एकविंशतिनामानि ॥

गणंजयो गणपतिर्हेरंबो धरणीधरः ।
महगणपतिर्लक्षप्रदः क्षिप्रप्रसादनः ॥
अमोघसिद्धिरमितो मन्त्रश्चिन्तामणिर्निधिः ।
सुमंगलो बीजमाशापूरको वरदः शिवः ॥
काश्यपो नन्दनो वाचासिद्धो दुंढिविनायकः
मोदकैरेभिरत्रैकविंशत्या नामभिः पुमान् ।
यः स्तौति मद्गतमना मदाराधनतत्परः
स्तुतो नाम्नां सहस्रेण तेनाहं नात्र संशयः ॥

नमो नमः सुरवरपूजितांघ्रये नमो नमो निरुपममंगलात्मने ।
नमो नमो विपुलपदैकसिद्धये नमो नमः करिकलभाननाय ते ॥

॥ शिवम् ॥

।। श्रीविघ्नेश्वराष्टोत्तरशतनामावळिः ।।

ओं विनायकाय नम
विघ्नराजाय
गौरीपुत्राय
गणेश्वराय
स्कन्दाग्रजाय
अव्ययाय
पूताय
दक्षाय
अध्यक्षाय
द्विजप्रियाय १०
अग्निगर्भच्छिदे
इन्द्रश्रीप्रदाय
वाणीप्रदाय
अव्ययाय
सर्वसिद्धिप्रदाय
शर्वतनयाय
शर्वरीप्रियाय
सर्वात्मकाय
सृष्टिकर्त्रे
देवाय २०
अनेकार्चिताय
शिवाय
शुद्धाय
बुद्धिप्रियाय
शान्ताय
ब्रह्मचारिणे
गजाननाय
द्वैमात्रेयाय
मुनिस्तुत्याय
भक्तसंयुताय
भक्तविघ्नविनाशनाय ३०
एकदन्ताय
चतुर्बाहवे
चतुराय
शक्तिसंयुताय
लम्बोदराय नमः
शूर्पकर्णाय
हरये
ब्रह्मविदुत्तमाय
कालाय
ग्रहपतये ४०
कामिने
सोमसूर्याग्निलोचनाय
पाशाङ्कुशधराय
चण्डाय
गुणातीताय
निरञ्जनाय
अकल्मषाय

ओं स्वयंसिद्धाय नमः
सिद्धार्चितपदाम्बुजाय
बीजापूरफलासक्ताय ५०
वरदाय
शाश्वताय
कृतिने
द्विजप्रियाय
वीतभयाय
गदिने
चक्रिणे
इक्षुचापधृते
श्रीदाय
अजाय नमः ६०
उत्पलकराय
श्रीपतये
स्तुतिहर्षिताय
कुलाद्रिभेत्त्रे
जटिलाय
कलिकल्मषनाशनाय
चन्द्रचूडामणये
कान्ताय
पापहारिणे
समाहिताय ७०

ओं आश्रिताय नमः
श्रीकराय
सौम्याय
भक्तवाञ्छितदायकाय
शान्ताय
कैवल्यसुखदाय
सच्चिदानन्दविग्रहाय
ज्ञानिने
दयायुताय
दान्ताय ८०
ब्रह्मद्वेषविवर्जिताय नमः
प्रमत्तदैत्यभयदाय
श्रीकण्ठाय
विबुधेश्वराय
रमार्चिताय
विधये
नागराजयज्ञोपवीतवते
स्थूलकण्ठाय
स्वयंकर्त्रे
समाघोषप्रियाय ९०
पराय
स्थूलतुण्डाय
अग्रण्ये

ओं धीराय नमः
वागीशाय
सिद्धिदायकाय
दूर्वाबिल्वप्रियाय
अव्यक्तमूर्तये
अद्भुतमूर्तिमते
शैलेन्द्रतनुजोत्सङ्गखेलोत्सु-
कमानसाय १००

ओं स्वलावण्यसुधासारजित-
मन्मथविग्रहाय नमः
समस्तजगदाधाराय
मायिने
मूषकवाहनाय
हृष्टाय
तुष्टाय
प्रसन्नात्मने
सर्वसिद्धिप्रदायकाय १०

।। इत्यष्टोत्तरशतनामावळिस्समाप्ता ।।

श्रीवल्लभमहागणपति त्रिशती नामावली

ध्यान श्लोकः

बीजापूरगदेक्षुकार्मुकरुजा चक्राब्जपाशोत्पल
श्रीह्मग्रस्वविषाणरत्नकलश प्रोद्यत्करांभोरुहः ।

ध्येयो वल्लभया सपद्मकरयाश्लिष्टोज्जलद्भूषया
विश्वोत्पत्ति विपत्ति संस्थिति करोविघ्नो विशिष्टार्थदः ।।

मूषिकवाहन मोदकहस्त चामरकर्ण विलंबितसूत्र
वामनरूप महेश्वरपुत्र विघ्न विनायक पाद नमस्ते ।

ओं ओंकार गणपतये नमः	ओं श्रींकाराय नमः
ओंकार प्रणवरूपाय	श्रींलक्ष्यै
ओंकार मूर्तये	श्रीं महागणणेशाय
ओंकाराय	श्री वल्लभाय
ओंकार मन्त्राय	श्री गणेशाय
ओंकार बिन्दुरूपाय	श्री वीर गणेशाय
ओंकार रूपाय	श्री वीर लक्ष्म्यै
ओंकार ना ।	श्री धैर्य गणेशाय २०
ओंकार मयाय	श्री वीर पुरेन्द्राय
ओंकार मूलाधारवासाय १०	ह्रीकार गणेशाय
श्रींकार गणपतये	ह्रींकार मयाय
श्रींकार वल्लभाय	ह्रींकार सिंहाय

ओं ह्लींकार बालाय नमः
ह्लींकार पीठाय
ह्लींकार रूपाय
ह्लींकार वर्णाय
ह्लींकार कलाय
ह्लींकार लयाय ३०
ह्लींकार वरदाय
ह्लींकार फलदाय
क्लींकार गणेशाय
क्लींकार मन्मथाय
क्लींकाराय
क्लीं मूलाधाराय
क्लीं वासाय
क्लींकार मोहनाय
क्लींकारोन्नत रूपाय
क्लींकार वश्याय ४०
क्लींकार नाथाय
क्लींकार हेरंबाय
क्लींकार रूपाय
ग्लौं गणपतये
ग्लौंकार बीजाय
ग्लौंकाराक्षराय
ग्लौंकार बिन्दुमध्यगाय

ओं ग्लौंकार वासाय नम
गं गणपतये
गं गणनाथाय ५०
गं गणाधिपाय
गं गणाध्यक्षाय
गं गणाय
गं गगनाय
गं गंगाय
गं गमनाय
गं गानविद्याप्रदाय
गं घंटानादप्रियाय
गं गकाराय
गणपतये ६०
गजमुखाय
गजहस्ताय
गजारूपाय
गजरूढ़ाया
गजारुढ़ाय
गजाय
गणेश्वराय
गन्ध हस्ताय
गर्जिताय
गताय

ओं गं वाह्याय नमः
णकार गणपतये
णाळाय
णळिंगाय
णळप्रियाव
णळेशाय
णळकोमळाय
णकरीशाय
णकरिकाय
णणणंकाय
णणोशाय
णणीणप्रियाय
परब्रह्माय
परहन्त्रे
परमूर्तये
पराय
परमात्मने
परानन्दाय
परमेष्ठिने
परात्पराय
पद्माक्षाय
पद्मालयापतये
पराक्रमिणे

७० ओं तत्व गणपतये
तत्व गम्याय
तर्क वेत्रे
तत्त्वविदे नमः
तत्व रहिताय
तमोहिताय
तत्वज्ञानाय
तरुणाय १००
तरुणि भृङ्गाय
तरुणि प्रभाय
८० यज्ञगणपतये
यज्ञकाय
यशस्विने
यज्ञकृते
यज्ञाय
यमभीति निवर्तकाय
यमहृतये
यज्ञफलप्रदाय ११०
यमधाराय
यमप्रदाय
०९ यथेष्टवरप्रदाय
वरगणपतये
वरदाय

ओं वसुधापतये नमः

वज्रोद्भवभयसंहर्त्रे
वल्लभा रमणीशाय
वक्षस्थल मणिभ्राजिने
वज्र धारिणे १२०
वश्याय
वकार रूपाय
वशिने
वरप्रदाय
रज गणपतये
रजकराय
रमानाथाय
रत्नाभरण भषिताय
रहस्यज्ञाय
रसाधाराय १३०
रथस्थाय
रथावासाय
रंजित प्रदाय
रवि कोटि प्रकाशाय
रम्याय
वरद वल्लभाय
वकाराय
वरुणप्रियात

ओं वज्रधराय नमः

वरद वररदाय १४०
वन्दिताय
वश्यकराय
वदनप्रियाय
वसवे
वसुप्रियाय
वरदप्रियाय
रविगणपतये
रत्नकिरीटाय
रत्नमोहनाय
रत्नभूषणाय १५०
रत्नकाय
रत्न मन्त्रपाय
रसाचलाय
रसातलाय
रत्नकंकणाय
रवोधीशाय
रवापानाय
रत्नासनाय
दकाररूपाय
दमनाय १६०
दण्डकारिणे

ओं दयाधमिताय नमः
दैत्यगमनाय
दण्डनीत्यादि विज्ञात्रे
दया वहाय
दक्षव्वसनकराय
दक्षाय
दतकाय
दमोजघ्नाय
सर्ववश्यगणपतये १७०
सर्वातमने
सर्वज्ञाय
सर्व सौख्य प्रदायिने
सर्व दुःखघ्ने
सर्व रोग हृते
सर्व जनप्रियाय
सर्म शास्त्रकलापधराय
सर्व दुःख विनाशाय
सर्वदुष्ट प्रशमनाय
जय गणपतये १८०
जनार्दनाय
जपाराध्याय
जगन् मान्याय
जयावहाय

ओं जन पालाया नमः
जगत् सृष्टये
जप्याय
जन लोचनाय
जगती पालाय
जयन्ताय १९०
नटन गणपतये
नद्याय
नदीश गंभीराय
नत भूदेवाय
नष्टद्रव्य प्रदायकाय
नयज्ञाय
नमितारये
नन्दाय
नटविद्या विशारदाय
नवत्यानां संत्रात्रे २००
नवांबर विधारणाय
मेघ ढंबर गणपतये
मेघ वाहनाय
मेरु वासाय
मेरुःनिलयाय
मेघ वर्णाय
मेघ नादाय

ओं मेघ डंबराय नमः
मेघ गर्जिताय
मेघ रूपाय २१०
येघ घोषाय
मेघ वाहनाय
वश्य गणपतये
वज्रश्वराय
वरप्रदाय
वज्रदंताय
वश्यप्रदाय
वश्याय
वशिने
वटुकेशाय २२०
वराभयाय
वसुमते
वटवे
शरगणपतये
शर्मधाम्ने
शरणाय
शर्मवद्वसुघनाय
शरधाराय
शशिधराय
शतक्रतु वरप्रदाय २३०
शतानन्दादि सेव्याय
शमित देवाय
शराय
शशिनाथाय
महाभय विनाशनाय
महेश्वर प्रियाय
मत्तदण्डकराय
महाकीर्तये
महा भुजाय
महोन्नतये २४०
महोत्साहाय
महामायाय
महामदाय
महाकोपाय
नाग गणपतये
नागाधीशाय
नायकाय
नाशितारातये
नामस्मरण पापघ्ने
नाथाय २
नाभिपदार्थ पद्मभुवे
नागराज वल्लभप्रियाय
नाट्य विद्या विशारदाय
नाट्य प्रियाय
नाटय नाथाय

यवन गणपतये
यमवीषूदनाय
यमवीजिताय
थज्वते
यज्ञपतये
यज्ञनाशनाय
यज्ञप्रियाय
यज्ञवाहाय
यज्ञांगाय
यज्ञसखाय
यज्ञप्रियाय
यज्ञरूपाय
यज्ञ वन्द्याय
यति रक्षकाय
यति पूजिताय
स्वामि गणपतये
स्वर्ण वरदाय
स्वर्ण कर्षणाय
स्वाश्रयाय
स्वस्तिकृते
स्वस्तिकाय
स्वर्णकक्षाय
स्वर्ण ताटंक भूषणाय

स्वाहा सभाजिताय
स्वरशास्त्रस्वरूपकृते
हादि विद्याय
हादि रूपाय
हरिहर प्रियाय
हरण्यादि पतये
हाहा हूहू गणपतये
हरि गणपतये
हाटक प्रियाय
हतगजाधिपाय
हयाश्रयाय
हंस प्रियाय २९०
हंसाय
हंस पूजिताय
हनुमत सेविताय
हकार रूपाय
हरिस्तुताय
हरांक वास्तव्याय
हरिनीलप्रभाय
हरिद्राबिंब पूजिताय
हरिघ्य मुख देवता सर्वेष्ट
सिद्धिताय
मूलमन्त्र गणपतये ३००

।। गपतिसहस्त्रनामावळिः ।।

ओं गणेश्वराय नम:
गणक्रीडाय
गणनाथाय
गणाधिपाय
एकदंष्ट्राय
वक्रतुण्डाय
गजवक्त्राय
महोदराय
लम्बोदराय
धूम्रवर्णाय १०
विकटाय
विघ्ननायकाय
सुमुखाय
दुर्मुखाय
बुद्धाय
विघ्नराजाय
गजाननाय
भीमाय
प्रमोदाय
आमोदाय २०
सुरानन्दया
मदोत्कटाय

ओं हेरम्बाय
शम्बराय
शम्भवे
लम्बकर्णाय
महाबलाय
नन्दनाय
अलम्पटाय
अभीरवे ३०
मेघनादाय
गणञ्जयाय
विनायकाय
विरूपाक्षाय
धीरशूराय
वरप्रदाय
महागणपतये
बुद्धिप्रियाय
क्षिप्रप्रसादनाय नम
रुद्रप्रियाय ४०
गणाध्यक्षाय
उमापुत्राय
अघनाशनाय
कुमारगुरवे

ओं ईशानपुत्राय नमः
मूषकवाहनाय
सिद्धिप्रियाय
सिद्धिपतये
सिद्धाय
सिद्धिविनायकाय ५०
अविघ्नाय
तुंबुरवे
सिंहवाहनाय
मोहिनीप्रियाय
कटङ्कटाय
राजपुत्राय
शालकाय
सम्मिताय
अमिताय
कूश्माण्डसामसम्भूतये
दुर्जयाय
धूर्जयाय
जयाय
भूपतये
भुवनेशानाय
भूतानांपतये
अव्ययाय

ओं विश्वकर्त्रे
विश्वमुखाय
विश्वरूपाय ७०
निधये
घृणये
कवये
कवीनामृषभाय
ब्रह्मण्याय
ब्रह्मरस्पतये
ज्येष्टराजाय
निधिपतये
निधिप्रियपतिप्रियाय
हिरण्मयपुरान्तःस्थाय ८०
सूर्यमण्डलमध्यगाय नमः
कराहतिध्वस्तसिन्धुसलिलाय
पूषदन्तभिदे
उमाङ्ककेळिकुतुकिने
मुक्तिदाय
कुलपालनाय
किरीटिने
कुण्डलिने
हारिणे
वनमालिने ९०

ओं मनोमयाय नमः
वैमुख्यहतदैत्यश्रिये
पादाहतिजितक्षितये
सद्योजातस्वर्णमुंजमेखलिने
दुर्निमित्तहृते
दुस्स्वप्नहृते
प्रसहनाय
गुणिने
नादप्रतिष्ठिताय
सुरूपाय १००
सर्वनेत्राधिवासाय
वीरासनाश्रयाय
पीताम्बराय
खण्डरदाय
खण्डेन्दुकृतशेखराय
चित्राङ्कश्यामदशनाय
भालचन्द्राय
चतुर्भुजाय
योगाधिपाय
तारकस्थाय ११०
पुरुषाया
गजकर्णकाय
गणाधिराजाय

ओं विजयस्थिराय नमः
गजपतिध्वजिने
देवदेवाय
स्मरप्राणदीपकाय
वायुकीलकाय
विपश्चिद्वरदाय
नादोन्नादभिन्नबलाहकाय १२०
वराहरदनाय
मृत्युञ्जयाय
व्याघ्राजिनाम्बराये
इच्छाशक्तिधराय
देवत्रात्रे
दैत्यविमर्दनाय
शम्भुवक्त्रोद्भवाय
शम्भुकोपघ्ने
शम्भुहास्यभुवे
शम्भुतेसेज १३०
शिवाशोकहारिणे
गौरीसुखावहाय
उमाङ्गमलजाय
गौरीतेजोभुवे
स्वर्धुनीभवाय
यज्ञकायाय

ओं महानादाय
गिरिवर्ष्मणे
शुभाननाय
सर्वात्मने १४०
सर्वदेवात्मने
ब्रह्ममूर्ध्ने
ककुप्छ्रुतये नमः
ब्रह्माण्डकुम्भाय
चिद्व्योमभालाय
सत्यशिरोरुहाय
जगज्जन्मलयोन्मेषनिमेषाय
अग्न्यर्कसोमदृशे
गिरीन्द्रैकरदाय
धर्माधर्मोष्ठाय १५०
सामबृंहिताय
ग्रहर्क्षदशनाय
वाणीजिह्वाय
वासनासिकाय
कुलाचलांसाय
सोमार्कघण्टाय
रुद्रशिरोधराय
नदीनदभुजाय
सर्पाङ्गलीकाय

ओं तारकानखाय १६०
भ्रूमध्यसंस्थितकराय
ब्रह्मविद्यामदोत्कटाय
व्योमनाभये
श्रीहृदयाय
मेरुपृष्ठाय
अर्णबोदराय
कुक्षिस्थयक्षगन्धर्वरक्षः-
किन्नरमानुषाय
पृथ्वीकटये
सृष्टिलिङ्गाय
शैलोरवे १७०
दस्रजानुकाय
पाताजङ्घाय
मुनिपदे
कालाङ्गुष्ठाय
त्रयीतनवे
ज्योतिर्मण्डललाङ्गूलाय
हृदयालाननिश्चलाय
हृत्पद्मकर्णिकाशालि-
वियत्केळिसरोवराय
सद्भक्तध्याननिगडाया
पूजावारीनिवारिताय १८०

प्रतापिने
कश्यपसुताय
गणपाय
विष्टपिने
बलिने
यशस्विने
धार्मिकाय
स्वोजसे
प्रथमाय
प्रथमेश्वराय १९०
चिन्तामणिद्वीपपतये
कल्पद्रुमवनालयाय
रत्नमण्डपमध्यस्थाय
रत्नसिंहासनाश्रयाय
तीव्राशिरोधृतपदाय
ज्वालिनीमौळिलालिताय
नन्दानन्दितपीठश्रिये
भोगदाभूषितासनाय
सकामदायिनीपीठाय
स्फुरदुग्रासनाश्रयाय २००
तेजोवतीशिरोरत्नाय
सत्यानित्यावतंसिताय
सविघ्ननाशिनीपीठाय

ओं सर्वशक्त्यम्बुजाश्रयाय नमः
लिपिपद्मासनाधाराय
वह्निधामत्रयाश्रयाय
उन्नतप्रपदाय
गूढगुल्फाय
संवृत्तपार्ष्णिकाय
पीनजङ्घाय २१०
श्लिष्टजानवे
स्थूलोरवे
प्रोन्नमत्कटये
निम्ननाभये
स्थूलकुक्षये
पीनवक्षसे
बृहद्भुजाय
पीनस्कन्धाय
कम्बुकण्ठाय
लम्बोष्ठाय २२०
लम्बनासिकाय
भग्नवामरदाय
तुङ्गाय सव्यदन्ताय
महाहनवे
ह्रस्वनेत्रत्रयाय
शर्पकर्णाय

ओं निबिडमस्तकाय नमः
स्तबकाकारकुम्भाग्राय
रत्नमौळये
निरङ्कुशाय २३०
सर्पहारकटीसूत्राय
सर्पयज्ञोपवीतवते
सर्पकोटीरकटकाय
सर्पग्रैवेयकाङ्गदाय
सर्पकक्ष्योदराबन्धाय
सर्पराजोत्तरीयकाय
रक्ताय
रक्ताम्बरधराय
रक्तमाल्यविभूषणाय
रक्तेक्षणाय २४०
रक्तकराय
रक्तताल्वोष्ठपल्लवाय
श्वेताय
श्वेताम्बरधराय
श्वेतमाल्यविभूषणाय
श्वेतातपत्ररुचिराय
श्वेतचामरवीजिताय
सर्वावयवसम्पूर्णसर्वलक्षण-
लक्षिताय
सर्वाभरणशोभाढ्याय
सर्वशोभासमन्विताय २५०
सर्वमङ्गळमाङ्गल्याय
सर्वकारणकारणाय
सर्वदैककराय
शार्ङ्गिणे
बीजापूरिणे
गदाधराय
इक्षुचापधराय
शूलिने
चक्रपाणये
सरोजभृते २६०
पाशिने
धृतोत्पलाय
शालीमञ्जरीभृते
कल्पवल्लीधराय
विश्वाभयदैककराय
वशिने
अक्षमालाधराय
ज्ञानमुद्रावते
मुद्गरायुधाय २७०
पूर्णपात्रिणे
कम्बुधराय

ओं विधृतालिमुद्गकाय नमः
मातुलिङ्गधराय
चूतकलिकाभृते
कुठारते
पुष्करस्थस्वर्णघटीपूर्णरत्नाभि-
वर्षकाय
भारतीसुन्दरीनाथाय
विनायकरतिप्रियाय
महालक्ष्मीप्रियतमाय २८०
सिद्धलक्ष्मीमनोरमाय
रमारमेशपूर्वाङ्गाय
दक्षिणोमामहेश्वराय
महीवराहवामाङ्गाय
रतिकन्दर्पपश्चिमाय
आमोदमोदजनाय नमः
सप्रमोदप्रोदनाय
समेधितसमृद्धश्रिये
ऋद्धिसिद्धिप्रवर्तकाय
दत्तसौमुख्यसुमुखाय २९०
कान्तिकन्दलिताश्रयाय
मदनावत्याश्रिताङ्घ्रये
कृत्तदौर्मुख्यदुर्मुखाय
विघ्नसम्पल्लवोपघ्नसेवाय

ओं उन्निद्रमदद्रवाय
विघ्नकृन्निघ्नचरणाय
द्राविणीशक्तिसत्कृताय
तीव्राप्रसन्ननयनाय
ज्वालिनीपालितैकदृशे
मोहिनीमोहनाय ३००
भोगदायिनीकान्तिमण्डिताय
कामिनीकान्तवक्त्रश्रिये
आधिष्ठितवसुन्धराय
वसुधारामदोन्नद्धमहाशङ्ख-
निधिप्रभवे
नमद्वसुमतीमौळिमहापद्मनि-
धिप्रभवे
सर्वसद्गुरुसंसेव्याय
शोचिष्केशहृदाश्रयाय
ईशानमूर्ध्ने
देवेन्द्रशिखाय
पवननन्दनाय ३१०
अग्रप्रत्यग्रनयनाय
दिव्यास्त्राणां प्रयोगविदे
ऐरावतादिसर्वाशावारणाव-
रणप्रियाय
वज्राद्यस्त्रपरीवाराय

ओं गणचण्डसमाश्रयाय नमः
जयाजयपरीवाराय
विजयाविजयावहाय
अजितार्चितपादाब्जाय
नित्यानित्यावतंसिताय
विलासिनीकृतोल्लासाय ३२०
शौंडीसौन्दर्यमण्डिताय
अनन्तानन्तसुखाय
सुमङ्गळसुमङ्गळाय
इच्छाशक्तिज्ञानशक्तिक्रिया-
शक्तिनिषेविताय
सुभगासंश्रितपदाय
ललितालालिताश्रयाय
कामिनीकामनाय
काममालिनीकेळिलालिताय
सरस्वत्याश्रयाय
गौरीनन्दनाय ३३०
श्रीनिकेतनाय
गुरुगुप्तपदाय
वाचासिद्धाय
वागीश्वरीपतये
नळिनीकामुकाय
वामारामाय

ओं ज्येष्ठामनोरमाय नमः
रौद्रीमुद्रितपादाब्जाय
हुंबीजाय
तुङ्गशक्तिकाय ३४०
विश्वादिजननत्राणाय
स्वाहाशक्तये
सकीलकाय
अमृताब्धिकृतावासाय
मदघूर्णितलोचनाय
उच्छिष्टगणाय
उच्छिष्टगणेशाय
गणनायकाय
सार्वकालिकसंसिद्धये
नित्यशैवाय ३५०
दिगम्बराय
अनपायाय
अनन्तदृष्टये
अप्रमेयाय
अजरामराय
अनाविलाय
अप्रतिरथाय
अच्युताय
अमृताय

ओं अक्षराय नमः
अप्रतर्क्याय
अक्षयाय
अजय्याय
अनाधाराय
अनामयाय
अमलाय
अमोघसिद्धये
अद्वैताय
अघोराय
अप्रतिमानाय ३७०
अनाकाराय
अब्धिभूम्यग्निबलघ्नाय
अव्यक्तलक्षणाय
आधारपीठाय
आधाराय
आधाराधेयवर्जिताय
आखुकेतनाय
आशापूराकाय
आखुमहारथाय
इक्षुसागरमध्यस्थाय ३८०
इक्षुभक्षणलालसाय
इक्षुचापातिरेकश्रिये
३६०ओं इक्षुचापनिषेविताय नमः
इन्द्रगोपसमानश्रिये
इन्द्रनीलसमद्युतये
इन्दीवरदळश्यामाय
इन्दुमण्डलनिर्मलाय
इध्मप्रियाय
इडाभागाय
इराधाम्ने ३९०
इन्दिराप्रियाय
इक्ष्वाकुविघ्नविध्वंसिने
इतिकर्तव्यतेप्सिताय
ईशानमौळये
ईशानाय
ईशानसुताय
ईतिघ्ने
ईषणात्रयकल्पान्ताय
ईहामात्रविवर्जिताय
उपेन्द्राय ४००
उडुभृन्मौळये
उण्डेरकबलिप्रियाय
उन्नताननाय
उत्तुङ्गाय
उदारत्रिदशाग्रण्ये

ओं ऊर्जस्वते नमः
ऊष्मलमदाय
ऊहापोहदुरासदाय
ऋग्यजुस्सामसम्भूतये
ऋद्धिसिद्धिप्रवर्तकाय ४१०
ऋजुचित्तैकसुलभाय
ऋणत्रयविमोचकाय
स्वभक्तानां लुप्तविघ्नाय
सुरद्विषां लुप्तशक्तये
विमुखार्चानां लुप्तश्रिये
लूताविस्फोटनाशनाय
एकारपीठमध्यस्थाय
एकपादकृतासनाय
एजिताखिलदैत्यश्रिये
एधिताखिलसंश्रयाय ४२०
ऐश्वर्यनिधये
ऐश्वर्याय
ऐहिकामुष्मिकप्रदाय
ऐरंमदसमोन्मेषाय
ऐरावतनिभाननाय
ओंकारवाच्याय
ओङ्काराय
ओजस्वते

ओं ओषधीपतये
औदार्यनिधये ४३०
औद्धत्यधुर्याय
औन्नत्यनिःस्वनाय
सुरनागानामङ्कुशाय
सुरविद्विषामङ्कुशाय
अःसमस्तविसर्गान्तपदेषु-
परिकीर्तिताय
कमण्डलुधराय
कल्पाय
कपर्दिने
कलभाननाय
कर्मसाक्षिणे ४४०
कर्मकर्त्रे
कर्माकर्मफलप्रदाय
कदम्बगोलकाकाराय
कूश्माण्डगणनायकाय
कारुण्यदेहाय
कपिलाय
कथकाय
कटिसूत्रभृते
खर्वाय
खड्गप्रियाय ४५०

ओं खड्गस्वांतान्तस्थाय नमः
खनिर्मलाय
खल्वाटश्रृङ्गनिलयाय
खट्वाङ्गिने
खदुरासदाय
गणाढ्याय
गहनाय
गस्थाय
गद्यपद्यसुधार्णवाय
गद्यगानप्रियाय ४६०
गर्जाय
गीतगीर्वाणपूर्वजाय
गुह्याचाररताय
गुह्याय
गुह्यागमनिरूपिताय
गुहाशयाय
गुहाब्धिस्थाय
गुरुगम्याय
गुरोर्गुरवे
घण्टाघर्घरिकामालिने ४७०
घटकुम्भाय
घटोदराय
चण्डाय

ओं चण्डेश्वरसुहृदे
चण्डीशाय
चण्डविक्रमाय
चराचरपतये
चिन्तामणिचर्वणलालसाय
छन्दसे
छन्दोवपुषे ४८०
छन्दोदुर्लक्ष्याय
छन्दविग्रहाय
जगद्योनये
जगत्साक्षिणे
जगदीशाय
जगन्मयाय
जपाय
जपपराय
जप्याय
जिह्वासिंहासनप्रभवे ४९०
झलज्झलोल्ससद्दानझङ्कारि-
भ्रमराकुलाय
टङ्कारस्फारसंरावाय
टंकारिमणिनूपुराय
ठद्वयीपल्लवान्तस्थसर्वमन्त्रैक-
सिद्धिदाय

ओं डिण्डिमुण्डाय नमः
डाकिनीशाय
डामराय
डिण्डिमप्रियाय
ढक्कानिनादमुदिताय
ढौंकाय ५००
ढुंढिविनायकाय
तत्वानां परमाय तत्वाय
तत्वंपदनिरूपिताय
तारकाय
तारकान्तकाय
स्थाणवे
स्थाणुप्रियाय
स्थात्रे
स्थावराय जङ्गमाय जगते ५१०
दक्षयज्ञप्रमथनाय
दात्रे
दानवमोहनाय
दयावते
दण्डनायकाय
दन्तप्रभिन्नाभ्रमालाय
दैत्यवारणदारणाय
दष्ट्रालग्नद्विपघटाय ५२०

ओं देवार्थनृगजाकृतये
धनधान्यपतये
धन्याय
धनदाय
धरणीधराय
ध्यानैकप्रकटाय
ध्येयाय
ध्यानाय
ध्यानपरायणाय
नन्दाय ५३०
नन्दिप्रियाय
नादाय
नादमध्यप्रतिष्ठिताय
निष्कलाय
निर्मलाय
नित्याय
नित्यानित्याय
निरामयाय
परंव्योम्ने
परंधाम्ने ५४०
परमात्मने
परम्पदाय
परात्पराय

ओं पशुपतये नमः
पशुपाशविमोचकाय
पूर्णानन्दाय
परानन्दाय
पुराणपुरुषोत्तमाय
पद्मप्रसन्ननयनाय
प्रणताज्ञानमोचनाय ५५०
प्रमाणप्रत्ययातीताय
प्रणतार्तिनिवारणाय
फलहस्ताय
फणिपतये
फेत्कारक
फाणितप्रियाय
बाणर्चिताङ्घ्रियुगळाय
बालकेळिकुतूहलिने
ब्रह्मणे
ब्रह्मार्चितपदाय ५६०
ब्रह्मचारिणे
बृहस्पतये
बृहत्तमाय
ब्रह्मपराय
ब्रह्मण्याय
ब्रह्मवित्प्रियाय

ओं बृहन्नादाग्रचचीत्काराय नमः
ब्रह्माण्डावळिमेखलाय
भ्रूक्षेपदत्तलक्ष्मीकाय
भर्गाय ५७०
भद्राय
भयापहाय
भगवते
भक्तिसुलभाय
भूतिदाय
भूतिभूषणाय
भव्याय
भूतालयाय
भोगदात्रे
भ्रूमध्यगोचराय
मन्त्राय
मन्त्रपतये
मन्त्रिणे
मदमत्तमनोरमाय
मेखलावते
मन्दगतये
मतिमत्कमलेक्षणाय
महाबलाय
महावीर्याय

ओं महाप्राणाय नमः ५९०
महामनसे
यज्ञाय
यज्ञपतये
यज्ञगोप्त्रे
यज्ञफलदाय
यशस्कराय
योगगम्याय
याज्ञिकाय
याजकप्रियाय
रसाय ६००
रसप्रियाय
रस्याय
रञ्जकाय
रावणार्चिताय
रक्षोरक्षाकराय
रत्नगर्भाय
राज्यसुखप्रदाय
लक्ष्याय
लक्ष्यप्रदाय
लक्ष्याय ६१०
लयस्थाय
लड्डुकप्रियाय

ओं लानप्रियाय नमः
लास्यपराय
लाभकृते
लोकविश्रुताय
वरेण्याय
वह्निवदनाय
वन्द्याय
वेदान्तगोचराय ६२०
विकर्त्रे
विश्वतश्चक्षुषे
वामदेवाय
विश्वनेत्रे
वज्रिवज्रनिवारणाय
विश्वबन्धनविष्कम्भाधाराय
विश्वेश्वरप्रभवे
शब्दब्रह्मणे ६३०
शमप्राप्याय
शम्भुशक्तिगणेश्वराय
शास्त्रे
शिखाग्रनिलयाय
शरण्याय
शिखरीश्वराय
षड्ऋतुकुसुमस्रग्विणे

ओं षडाधाराय
षडक्षराय
संसारवैद्याय ६४०
सर्वज्ञाय
सवभषजभषजाय
सृष्टिस्थितिलयक्रीडाय
सुरकुञ्जरभेदनाय
सिन्दूरितमहाकुम्भाय
सदसव्द्यक्तिदायकाय
साक्षिणे
समुद्रमथनाय
स्वदक्षिणाय ६५०
स्वतन्त्राय
सत्यसङ्कल्पाय
सामगानरताय
सुखिने
हंसाय
हस्तिपिशाचीशाय
हवनाय
हव्यकव्यभुज
हव्याय
हुतप्रियाय ६६०
हर्षा

ओं हृल्लेखामन्त्रमध्यगाय नमः
क्षेत्राधिपाय
क्षमाभर्त्रे
क्षमापरपरायणाय
क्षिप्रक्षेमकराय
क्षेमानन्दाय
क्षोणीसुरद्रुमाय
धर्मप्रदाय
अर्थदाय ६७०
कामदात्रे
सौभाग्यवर्धनाय
विद्याप्रदाय
विभवदनाय
भक्तिमुक्तिफलप्रदाय
अभिरूप्यकराय
वीरश्रीप्रदाय
विजयप्रपाय
सर्ववश्यकराय
गर्भदोषघ्ने ६८०
पुत्रपौत्रदाय
मेधाय
कीर्तिदाय
शोकहारिणे

ओं दौर्भाग्यनाशनाय नमः
प्रतिवादिमुखस्तम्भाय
रुष्टचित्तप्रसादनाय
पराभिचारशमनाय
दुःखभञ्जनकारकाय
लवाय ६९०
त्रुटये
कलायै
काष्ठयै
निमेषाय
तत्पराय
क्षणाय
घटयै
मुहूर्ताय
प्रहराय
दिवानक्ताय ७००
अहर्निशाय
पक्षाय
मासाय
अयनाय
वर्षाय
युगाय
कल्पाय

ओं महालयाय नम
राशये
तारायै ७१०
तिथये
योगाय
वाराव
करणाय
अंशकाय
लग्नाय
होरायै
कालचक्राय
मेरवे
सप्तर्षिभ्यो ७२०
ध्रुवाय
राहवे
मन्दाय
कवये
जीवाय
बुधाय
भौमाय
शशिने
रवये
कालाय ७३०

ओं सृष्टये नमः
स्थितये
विश्वस्मै स्थावराय जङ्गमाय-यस्मै
भुवे
अद्भ्यो
अग्नये
मरुते
व्योम्ने
अहङ्कृतये
प्रकृतये ७४०
पुंसे
ब्रह्मणे
विष्णवे
शिवाय
रुद्राय
ईशाय
शक्तये
सदाशिवाय
त्रिदशेभ्यो
पितृभ्यो ७५०
सिद्धेभ्यो
यक्षेभ्यो
ओं रक्षोभ्यो नमः
किन्नरेभ्यो
साध्येभ्यो
विद्याधरेभ्यो
भूतेभ्यो
मनुष्येभ्यो
पशुभ्यो
स्वर्गेभ्यो ७६०
समुद्रेभ्यो
सरिद्भ्यो
शैलेभ्यो
भूयाय
भव्याय
भवोद्भवाय
साङ्ख्याय
पातञ्जलाय
योगाय
पुराणेभ्यो ७७०
श्रुत्यै
स्मृत्यै
वेदाङ्गेभ्यो
सदाचाराय
मीमांसायै

ओं न्यायविस्तराय नमः
आयुर्वेदाय
धनुर्वेदाय
गान्धर्वाय
काव्यनाटकाय ७८०
वैखानसाय
भागवताय
सात्वताय
पाञ्चरात्रकाय
शैवाय
पाशुपताय
कालामुखाय
भैरवशासनाय
शाक्ताय
वैनायकाय ७९०
सौराय
जैनाय
आर्हतसंहितायै
सते
असते
व्यक्ताय
अव्यक्ताय
सचेतनाय

ओं अचेतनाय नमः
बन्धाय ८००
मोक्षाय
सुखाय
भोगाय
अयोगाय
सत्याय
अणवे
महते
स्वस्ति
हुं नमः
फट् नमः ८१०
स्वधा नमः
स्वाहा नमः
श्रौषड् नमः
वौषड् नमः
वषण्णमः
नमो नमः
ज्ञानाय
विज्ञानाय
आनन्दाय
बोधाय ८२०
संविदे

ओं शमाय नमः
यमाय
एकस्मै
एकाक्षराधाराय
एकाक्षरपरायणाय
एकाग्रधिये
एकवीराय
एकानेकस्वपूरधृते
द्विरूपाय ८३०
द्विभुजाय
द्व्यक्षाय
द्विरदाय
द्वीपरक्षकाय
द्वैमातुराय
द्विवदनाय
द्वन्द्वातीताय
द्वयतिगाय
त्रिधाम्ने
त्रिकराय ७४०
त्रेतायै
त्रिवर्गफलदायकाय
त्रिगुणात्मने
त्रिलोकादये

ओं त्रिशक्तीशाय नमः
त्रिलोचनाय
चतुर्बाहवे
चतुर्दन्ताय
चतुरात्मने
चतुर्मुखाय ८५०
चतुर्विधोपायमयाय
चतुर्वर्णाश्रमाश्रयाय
चतुर्विधवचोवृत्तिपरिवृत्ति-
प्रवर्तकाय
चतुर्थीपूजनप्रीताय
चतुर्थीतिथिसम्भवाय
पञ्चाक्षरात्मने
पञ्चात्मने
पञ्चास्याय
पञ्चकृत्यकृते
पञ्चाधाराय ८६०
पञ्चवर्णाय
पञ्चाक्षरपरायणाय
पञ्चताळाय
पञ्चकराय
पञ्चप्रणवभाविताय
पञ्चब्रह्ममयस्फूर्तये

ओं पञ्चावरणवारिताय नमः
पञ्चभक्ष्यप्रियाय
पञ्चबाणाय
पञ्चशिवात्मकाय ८७०
शट्कोणपीठाय
षट्चक्रधाम्ने
षड्ग्रन्थिभेदकाय
षडध्वध्वान्तविध्वंसिने
षडङ्गुलमहाह्रदाय
षण्मुखाय
षण्मुखभ्रात्रे
षट्शक्तिपरिवारिताय
षड्वैरिवर्गविध्वंसिने
षडूर्मिभयभञ्जनाय ८८०
षट्तर्कदूराय
षट्कर्मनिरताय
षटरसाश्रयाय
सप्तपाताळचरणाय
सप्तद्वीपोरुमण्डलाय
सप्तस्वर्लोकमुकुटाय
सप्तसप्तिवरप्रदाय
सप्ताङ्गराज्यसुखदाय
सप्तर्षिगणमण्डिताय

ओं सप्तच्छन्दोनिधये नमः ८९०
सप्तहोत्रे
सप्तस्वराश्रयाय
सप्ताब्धिकेळिकासाराय
सप्तमातृनिषेविताय
सप्तच्छन्दोमोदमदाम
सप्तच्छन्दोमखप्रभवे
अष्टमूर्तिध्देयमूर्तये
अष्टप्रकृतिकारणाय
अष्टाङ्गयोगफलभुवे
अष्टपत्राम्बुजासनाय
अष्टशक्तिसमृद्धश्रिये ९००
अष्वैश्वर्यप्रदायकाय
अष्टपीठोपपीठश्रियै
अष्टमातृसमावृताय
अष्टभैरवसेव्याय
अष्टवसुवन्द्याय
अष्टमूर्तिभृते
अष्टचक्रस्फुरन्मूर्तये
अष्टद्रयहविःप्रियाय
नवनागासनाध्यासिने
नवनिध्यनुशासत्रे ९१०
नवद्वारपुपाधाराय

ओं नवाधारनिकेतनाय नमः
नवनारायणस्तुत्याय
नवदुर्गानिषेविताय
नवनाथमहानाथाय
नवनागविभूषणाय
नवरत्नविचित्राङ्गाय
नवशक्तिशिरोधृताय
दशात्मकाय
दशभुजाय ९२०
दशदिक्पतिवन्दिताय
दशाध्यायाय
दशप्राणाय
दशेन्द्रियनियामकाय
दशाक्षरमहामन्त्राय
दशाशाव्यापिविग्रहाय
एकादशभीरुद्रैः स्तुताय
एकादशाक्षराय
द्वादशोद्दण्डदोर्दण्डाय
द्वादशान्तनिकेतनाय ९३०
त्रयोदशाभिधाभिन्नविश्वेदेवा-
धिदैवताय
चतुर्दशेन्द्रवरदाय

ओं चतुर्दशमनुप्रभवे नमः
चतुर्दशादिविद्याढ्याय
चतुर्दशजगत्प्रभवे
सामपञ्चदशाय
पञ्चदशीशीतांशुनिर्मलाय
षोडशाधारनिलयाय
षोडशस्वरमातृकाय
षोडशान्तपदावासाय ९४०
षोडशेन्दुकलात्मकाय
कलासप्तदश्यै
सप्तदशाय
सप्तदशाक्षराय
सप्तदशद्वोपपतये
अष्टादशपुराणकृते
अष्टादशौषधीसृष्टये
अष्टादशविधिःस्मृताय
अष्टादशलिपिव्यष्टिसपष्ठि-
ज्ञानकोविदाय
एकविंशाय पुंसे ९५०
एकविंशत्यङ्गुळिपल्लवाय
चतुर्विंशतितत्त्वात्मने
पञ्चविंशाख्यपूरुषाय

ओं सप्तविंशतितारेशाय नमः
सप्तविंशतियोगकृते
द्वात्रिंशद्भैरवाधीशाय
चतुस्त्रिंशन्महाह्रदाय
षट्त्रिंशत्तत्वसम्भूतये
अष्टत्रिंशत्कळातनवे
नमदेकोनपञ्चाशन्मरुद्वर्गनिर-
ग्र्गळाय ९६०
पञ्चाशदक्षरश्रेण्यै
पञ्चाशद्रुद्रविग्रहाय
पञ्चाशद्विष्णुशक्तीशाय
पञ्चाशन्मातृकालयाय
द्विपञ्चाशद्वपुश्श्रेण्यै
त्रिषष्टचक्षरसंश्रयाय
चतुष्षष्टयर्णनिर्णेत्रे
चतुष्षष्टिकळानिधये
चतुष्षष्टिमहासिद्धयोगिनी-
बृन्दवन्दिताय
अष्टषष्टिमहातीर्थक्षेत्रभैरव-
भावाय ९७०
चतुर्नवतिमन्त्रात्मने
षण्णवत्यधिकप्रभवे
शतानन्दाय

ओं शतधृतये नमः
शतपत्रायतेक्षणाय
शतानीकाय
शतमखाय
शतधारावरायुधाय
सहस्रपत्रनिलयाय
सहस्रफणभूषणाय ९८०
सहस्रशीर्ष्णे पुरुषाय
सहस्राक्षाय
सहस्रपये
सहस्रनामसंस्तुत्याय
सहस्राक्षबलापहाय
दशसाहस्रफणभृत्फणिराज-
कृतासनाय
अष्टशीतिसहस्राद्यमहर्षिस्तो-
त्रयन्त्रिताय
लक्षाधीशप्रियाधाराय
लक्षाधारमनोमयाय
चतुर्लक्षजपप्रीताय ९९०
चतुर्लक्षप्रकाशिताय
चतुरशीतिलक्षाणां जीवानां-
देहसंस्थिताय
कोटिसूर्यप्रतीकाशाय

ओं कोटिचन्द्रांशुनिर्मलाय नमः ओं त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणत-

शिवाभवाध्युष्टकोटिविनायक- पादुकाय नमः

धुरन्धराय अनन्तनाम्ने

सप्तकोटिमहामन्त्रमन्त्रिताव- अनन्तश्रिये

यवद्युतये अनन्तानन्तसौख्यदाय १०००

।। श्रीगणपतिसहस्रनामावळिः समाप्ता ।।

Ananthananda Prakasan

Patrons & Donors

Smt. & Sri G. S. Murthy, Satyakumari	Kakinada
Sri Kasinath Sama	Hyderabad
Sri Koduri Satyamurthy	"
Smt. & Sri K. V. C. Rao & Bharathi	"
Smt. & Sri Parasa Rajeswara Rao, Usha	"
Smt. & Sri Pinapati Sambamoorthy, Sitamahalakshmi	"
Sri Hari Adiseshaiah	"
Smt. & Sri R. Murali Mohana Rao, Bhargavi	Bangalore
Sri Urutha Sriramamurthy	Vijayawada
Sri Malladi Sri Ramasastry	Bhimavaram
Smt. & Sri Pinapati Lalithananda Sri, Indira	"
Smr. & Sri Surampudi Sudarsana Rao, Jayalakshmi	"
Sri Rachakonda Suryanarayana Sastry	Bhongiri
Sri K. Siddi Mallaiah	"
Sri Misrilal Ghatani	"
Sri Sankara Raman	Kanchipuram
Sri M. V. Kamoji Rao	Gooty
Sri Goda Subramanya Sastri (Vedalaya)	Madras
Sri K. R. S. Chandru	"
Sri Kantilal Pandya	"
Sri Natwarlal Drolia	"
Smt. Y. Subbalakshmi & Kum. Gayathri	"
Smt. Kuruganti Rajyalakshmi & Jayalakshmi	"
Sri Harish Pandya	"
Smt. & Sri M. S. Murthy, Lalita	"
Smt. & Sri P. Manikanth, Geetha	"
Smt. & Sri P. Ganapathi Kumar, Rohini	"
Smt. & Sri Goteti Sreenivasa Rao, Lakshmi	"
Smt. & Sri P. Neelakantaiah, Sundaramma	Tenali
Sri Ashok Gupta	Secundrabad
Sri Veda Prakash	Delhi
Sri Devaki Nandan Jalan	Calcutta

Sri Vinod Kumar Sarma	Calcutta
Sri M. L. Arun	Madras
Sri Pramodkumar Agarwall (Jagannath Steels)	Hyderabad
Smt. & Sri K. R. Seetharaman	Madras
Smt. & Sri V. Ramanatha Sarma	Bhongiri
Smt. & Sri C. V. Venkateswaran, Syamala	Madras
Sri Kaviraj Seetharama Sastry	Varanasi
Sri K. Venkateswara Rao	Rajamundry
Smt. & Sri K. Parvathi Kumar	Vizag
Smt. & Sri Malladi Krishnamurthy, Prasanna	Madras
Smt. & Sri P. Mrityunjaya Sastry	Tenali
Smt. & Sri R. S. Prasad, Jyothi	Madras
Smt. & Sri Ch. P. Kumar, Krishnasri	"
Smt. & Sri V. B. Rajendraprasad, Vasundhara Devi	Hyderabad
Smt. & Sri Mallapragada Sri Ranga Rao	Machilipatnam
Smt. Santhammal (Moogambika Trust)	Madras
Sri Vyakaranam Lakshmikantha Sastri	Guntur
Smt. & Sri Kudapa Venkateswara Rao	Rajahmundry

We Acknowledge :

Photos : Sri D. V. S. Manyanam - Fotodrome - Madras
Sri P. Ganapathi Kumar - Photowala

Artisit : Sri Ankaiah - Madras

Lamination : M. S. Srinivas - Madras

Panchayatanam : Sri Sadguru Printers - Madras

Wraper & Picture Printing : Prasad Process - Madras

Book Printing : Stree Seva Mandir - Madras

शुद्धाशुद्ध पत्रिका

अशुद्धम्	पृष्ठम्	पंक्ति	शुद्धम्
मूर्ति	1	3	मूर्ति
न्यावाह्य	2	10	न्यावाह्य
वमावाह्य	"	12	देवमावाह्य
देवामाघः	3	4	वामाधः
विग्घेश्वरं	"	9	विघ्नेश्वरं
मिधुनेषु	4	2	मिथुनेषु
चतुशती	6	15	चतुश्शती
विन्घोत्सारणान्तम	7	1	विघ्नोत्सारणान्तम्
मूर्ध्नि	10	7	मूर्ध्नि
अस्राय	"	8	अस्त्राय
अस्रमन्त्रेण	"	8	अस्त्रमन्त्रेण
विभाव्य रेचयेत	11	9	विभाव्य इडया रेचयेत्
बध्नीयात्	12	10	बध्नीयात्
शक्तिभ्यौ	12	15	शक्तिभ्यो
ब्रह्मरन्धान्तम्	16	6	ब्रह्मरन्ध्रान्तम्
द्धिदले	"	18	द्विदले
मूर्ध्नि	"	20	मूर्ध्नि
नसः	21	17	नमः
सवर्लोकाय	22	4	सुवर्लोकाय
विध्न	25	21	विघ्न
त्रेण	29	4	मन्त्रेण
सर्मजनं	34	13	सर्वजनं
मूलेस	35	18	मूलेन
अङ्गुष्ठभ्यां	37	20	अङ्गुष्टाभ्यां

अशुद्धम्	पृष्ठम्	पंक्ति	शुद्धम्
धूम्राचिष्कलायै	45	8	धूम्रार्चिष्कलायै
वासनापेन्धन	50	11	वासनारूपेन्धन
कलघौतादि	51	13	कलधौतादि
गणोयन्त्रस्य	"	17	गणेशयन्त्रस्य
घ्येयो	54	13	ध्येयो
घ्यात्वा	"	15	ध्यात्वा
वस्रो	56	3	वस्त्रो
फ़ालचन्द्रा	60	12	फालचन्द्र
सायुघः	64	4	सयुधाः
सामान्याध्योदिकेन	65	12	सामान्यार्घ्योदकेन
सामान्याध्योकेन	67	5	सामान्यार्घ्योदकेन
पञ्चोमावरण	68	13	पञ्चमावरणदेवता
श्रीपदुकां	69	2	श्रीपादुकां
गजकर्णकाय	"	8	गजकर्णिकाय
सहसुनामादिना	70	2	सहस्रनामादिना
रसवद्यज्वन	71	3	रसवद्व्यञ्जन
ओंजुमः	"	6	ओंजुंसः
सानुगस्वं	72	21	सानुगस्त्वं
दृष्टय्वा	75	14	दृष्ट्वा
समात्पिः	"	21	समाप्तिः
आचभ्य	76	7	आचम्य
यथाशक्त	"	7	यथाशक्ति
निष्कियम्	"	18	निष्क्रियम्
धनज्वयः	77	2	धनञ्जयः
दुस्तमश	"	8	दुस्तमश्श

अशुद्धम्	पृष्ठम्	पंक्ति	शुद्धम्
प्रणुत्यति	77	12	प्रनृत्यति
स्वपाजमूल	"	16	स्वपादमूल
दुर्ग्रहाच्छिदेक	78	4	मुग्रहाच्छिदेक
गुरोस्त्तोत्र	"	5	गुरोस्तोत्रं
इष्टा	79	6	इष्ट
यथोपदिष्ठं	"	7	यथोपदिष्टं
संविद्वपेण	80	8	संविद्रूपेण
कृशले	"	11	कुलेशः
विशेपाध्र्योद्वालनम्	"	19	विशेषार्घ्योद्वासनम्
योगिनीनाग्	"	13	योगिनीनाम्
वषट्र	84	15,17,18	वषट्
भा	86	1	मां
भ	87	1	मां
अर्घरात्रे	"	19	अर्धरात्रे
करनामिक	90	1	करानामिक
गच्छन्ते	93	9	गच्छन्तं
भुज्जन्तं	"	9	भुज्यन्तं
आलस्यै	"	14	आलस्यं
विचित्राङ्गा	92	7	विचित्राङ्गाय
ब्रह्ममूर्था	98	13	ब्रह्ममूर्धा
वह्मभूथं	100	5	ब्रह्मभूयं
शिण्ट	103	1	शिष्ट
सन्दूररक्त	104	3	सिन्दूररक्त
अशोषा	109	7	अशेषा
वामोरुन्त्यस्य	110	1	वामोरुन्यस्त

अशुद्धम्	पृष्ठम्	पंक्ति	शुद्धम्
आगमर्थं	110	16	आगमार्थं
अयु:	111	19	आयु:
विदृत:	113	3	विधृत:
अिग्नं	121	4	अग्निं
सासान्योदकेन	"	7	सामान्योदकेन
पर्यग्निकृत्वा	"	12	पर्यग्निकृत्वा
पार्षदवेभ्यो	124	2	पार्षदेवेभ्यो
पृथक पृथक	123	1	पृथक् पृथक्
वैषट्	123	15	वौषट्
कर्माणां	125	19	कर्मणां
व्श्वेतायै	127	2	श्वेतायै
सत्वाव	"	10	सत्वाय
ज्ञनात्मने	"	10	ज्ञानात्मने
अत्मने	"	11	आत्मने
तयोर्मियुतीभावं	"	16	तयोर्मिथुनीभावं
वह्ने:	"	15	वह्ने
उपस्थय	128	8	उपस्थाय
वह्नि मुत्याप्य	"	10	वह्निमुत्थाप्य
प्रदर्य	"	14	प्रदर्श्य
प्रक्तोयं	"	15	प्राक्तोयं
रुदगग्रैश्च	129	16	रुदगग्रैश्च
षुरतो	130	3	पुरतो
ब्रह्मन्	131	11	ब्रह्मन्
इद्रायेदं	"	16	इन्द्रायेदं
उश्वोदरा	132	8	अश्वोदराय

अशुद्धम्	पृष्ठम्	पंक्ति	शुद्धम्
संस्यितिकरो	134	5	संस्थिति करो
योति	134	8	योनि
प्रदथंयेत्	134	9	प्रदर्शयेत
सद्माोजात	136	6	सद्योजात
माहेश्वयै	137	8	माहेश्वर्यै
कौमयै	"	9	कौमार्यै
विद्मा	"	22	विद्या
होमाशिष्टेना	138	9	होमावशिष्टेन
स्त्रुचं	138	9	स्रुचं
आचग्य	139	1	आचम्य
शिश्वा	"	15	शिश्ना
यत्कुतं	"	15	यत्कृतं
वभूव	140	16	बभूव
न्द्रायेदम्	"	22	इन्द्रायेदम्
चद्रमा	141	10	चन्द्रमा
ओपधीभ्यो	143	10	ओषधीभ्यो
प्सरोभ्य	"	22	अप्सरोभ्य
विद्युद्भ्य	144	19	विद्युद्भ्यो
भृः	145	11	भूः
प्रतिष्ठाप्व	"	21	प्रतिष्टाप्य
दक्षणेन	"	21	दक्षिणेन
भागेभ्थ	146	5	भागेभ्य
इदभ्	"	16	इदम्
भूर्बवः	"	19	भर्भुवः
प्रतोच्यां	147	19	प्रतीच्यां

अशुद्धम्	पृष्ठम्	पंक्ति	शुद्धम्
संसोविते	149	5	संसेविते
दीक्षकलश	149	16	दीक्षाकलश
धारथा	151	8	धराया
घ्यायेत्	152	1,2,3	ध्यायेत्
तद्दक्षिणन:	"	4	तद्दक्षिणत:
विलदर्णाकृति	"	18	विलसद्वर्णाकृति
निशनाथा	153	2	निशानाथा
लोकेश्वराराघितम्	"	4	लोकेश्वराराधितम
बोघैकहेतो	"	20	बोधैकहेतो
गरगलसूत	"	22	गरगलसुत
मङ्गाहीनसुखदं	155	20	मङ्गहीनसुखदं
दैत्यभुत	156	9	दैत्यभूत
नशप्रदम	"	10	नाशप्रदम्
आनन्तानन्दनाथ	"	15	अनन्तानन्दनाथ
विरतिम	"	15	विरचितम
जीवस्हाङ्ग	"	19	जीवस्याङ्ग
द्राव्रावह्वि	157	5	द्राव्रावह्नि
निशमुखे	"	5	निशामुखं
जयदि पति	158	1	यदि जपति
भ्युदिने	158	4	भ्युदिते
महगणपति	159	15	महागणपति



26.1.1900 6.9.1980

SRIVIDYA MARTANDA, SRIVIDYA VACHASPATI

Sri C.V. Swami Sastri

Compiler Of "SRI MAHAGANAPATI SAPARYA PADDATI"

An ardent Srividyopasaka and a Prominent Sishya of Sri Chidananda Nath of Guhananda Mandali, Madras.

- Performed many Kumbhabhisekams, Yantra-Pratistas and Chandi Homams at different places and got appreciations and honours from Jagadguru Sankaracharyas both in South and North India.

- Conducted Dikshapurvangas and initiated many sishyas and established Sustu Srividya Parampara. Wrote many books on Puja Kalpas and also on matters of TANTRAS.

* * *

APPRECIATION:

- The Compiler Sri Swami Sastrigal, I can say from my personal knowledge is an Ideal Guru, and is one who received in Himself the blessings of Lord Ganesa

- This volume brings together all the material necessary for the different aspects of Lord Ganapati worship, like MANTRAS, DHYANAS, the JAPAS, different NYASAS, MUDRAS, Chakras of Different AVARANAS, Ganapathi Homa, chaturavruti Tarpana, Stotrams Suktas, Adharvsirsha Upanishad, Vallabha Upanishad and Sahasra namavali

The symbolism of the Form of Ganapati accompanied by the Sakti has been very clearly explained giving the Philosophical and esoteric sacred meanings, specially in the VALLABHA UPANISHAD, which is a very rare collection from Tantras

- Dr, V. RAGHAVAN
University of Madras
14-1-1961

"SRI MAHAGANAPATI SAPARYA PADDATI"

PUBLISHERS:
DR. P.V B. MAHADEV, M Com, M H M
ANANTHANANDA PRAKASHAN
"SRIGURUKRIPA"
21 PAPATHI AMMAL STREET, MADRAS 600 024

PHONE
427824